# निर्वाचितसंस्कृतनाटकेषु अद्भुतरसविमर्शः

# (NIRVĀCITASAMṀSKṚTANĀṬAKEṢU ADBHUTARASAVIMARŚAḤ)

THESIS SUBMITTED FOR THE DEGREE
OF DOCTOR OF PHILOSOPHY IN
SANSKRIT UNDER THE
FACULTY OF ARTS
RABINDRA BHARATI UNIVERSITY

BY
SOMNATH CHATTOPADHYAY

DEPARTMENT OF SANSKRIT
RABINDRA BHARATI UNIVERSITY
KOLKATA, WEST BENGAL
2018

# कृतज्ञतास्वीकारः

रवीन्द्रभारतीविश्वविद्यालयीयानाम् अध्यापकप्रवराणां गोपालचन्द्रमिश्रमहाभागानां मार्गनिर्देशकानां निर्देशान्ऋते कथमपि अल्पबुद्धिमत्या मया अतलस्पर्शि संस्कृतनाट्यवाङ्मयं निर्मथ्य शोधबन्धोऽयं रचयितुं न शक्यते। तान् प्रति इदानीं मम अधमर्णत्वं सविनयं प्रकाश्यते । तेभ्यो भूयो भूयो नमः। विश्वविद्यालयस्यास्यान्ये मान्याः अध्यापकाः सदैव छात्रावात्सल्येन चाहर्निशं साहाय्यं कृतवन्तः। तान् प्रति अपि प्रणामो विनिवेद्यते ।

‘पिता स्वर्गः पिता धर्मः…’इति नीतिवाक्यं स्मृत्वा परमश्रद्धास्पदं पितरंतथा च ‘स्वर्गाद् गरियसी’ मातरं समुद्दिश्य आशीर्वादः प्रार्थ्यते।

संस्कृतसाहित्यपरिषदः ग्रन्थागारिकाणां मिठुरक्षितमहाभागानां साहाय्यमत्र अनस्वीकार्यम्। एतदर्थं तेभ्यः सर्वेभ्यः धन्यवादान् व्याहरामि।

अन्तिमे परमकारुणिकस्य ईश्वरस्य चरणकमले प्रणामं विनिवेद्य विरमामि।

विदुषां वशंवदस्य

सोमनाथचट्टोपाध्यायस्य

# आमुखम्

संस्कृतालंकारशास्त्रे रसप्रस्थानस्य सर्वातिशायि गुरुत्वं वर्तते । वयं सर्वे जानीमो यत् नव रसाः प्रायेण सर्वैरालंकारिकाः स्वीकृताः। तत्र पूर्वं मया एम.फिल् इत्युपाधिलाभाय 'संस्कृतनाट्यसाहित्ये करुणरसविमर्शः' इति कश्चन शोधप्रबन्धो रचितः। यद्यपि नाट्यविनिर्माणे शृङ्गार-वीररसयोः अङ्गित्वं सर्वैः नाट्यतत्त्वविद्भिः अङ्गीकृतम् । तथाहि उक्तमालंकारिकैः विश्वनाथैः – 'एक एव भवेदङ्गी शृङ्गारो वीर एव वा' इति । सर्वे तावत् वीरशृङ्गारादीनां गुणकीर्त्तने यथा मुखरा न तथा इतरेतराणां रसानाम् । परन्तु केचनैरालङ्कारिकैः अद्भूतादीनां रसानां प्राधान्यं स्वेषु अलङ्कारशास्त्रेषु माहात्म्येन प्रधानत्वेन च प्रकटीकृतम् । अतः मया अधुना पि.एइच्.डि इति उपाधिप्राप्तये गवेषणाविषयत्वेन संस्कृतनाटकेषु अद्भुतरसस्य प्रयोगविमर्शः इति गवेषणाप्रबन्धो गृहीतः।

संस्कृतनाट्यतत्त्वेतिहासे अद्भुतरस्य विशिष्टं स्थानं भजते। भरत-धनञ्जय-विश्वनाथादिभिरालंकारिकैः तदीयेषु अलंकारग्रन्थेषु रसस्यास्य गुरुत्वमभ्युपगतम्। तेषामाशयोऽयं यत् 'कार्यं निर्वहणेऽद्भुतम्'। मूलतः निर्वहणसन्धौ अद्भुररसव्यवहारः अत्यावश्यको निर्देशः नाट्याचार्याणाम् इति मम मतम् । अर्थान्नाटकस्यान्ते अद्भुतरसस्यावस्थितिः नाट्यकौशलदृष्ट्या अत्यावश्यकः इति निश्चप्रचम्। परमत्रेदमुल्लेख्यं यदद्यतकालं यावत् अद्भुतरसमाश्रित्य किमपि नाटकं न विरचितम् । किन्तु प्रायेण सर्वैः काव्यकृद्भिः तदीयकाव्य-नाटकानां स्थलविशेषे अद्भुतरस्य बहुविचित्रितः प्रयोगः अकारि ।

इतःपूर्वम् संस्कृतसाहित्यप्रपञ्चे अद्भुतरसमुपजीव्य किमपि गवेषणाकर्म नाभवदिति न। तानि गवेषणापत्राणि तावत्-

1. *Adbhutarasa* in Classical Sanskrit Dramas (Saraj Arvind Deshpande, Poona University, 1982)
2. *Adbhutarasa – Prāchina Saṁskṛta Nātakome – Kāvyaśāstriya Vivechana* (Bhāsa se Joydevtak), (MinuSaxsena, Jaipur University) (In Progress)
3. *Adbhutarasa – Siddhāntaaur Prayoga* (Nirupama Sukla, Lucknow University (In Progress)

किन्तु संस्कृतभाषया सामूहिकतया संस्कृतनाटकेषु विशेषेण प्राचीन-अर्वाचीननाटकेषु अद्भुतरसस्य प्रयोगविधिम् अवलम्ब्य किमपि गवेषणापत्रमद्यावधि न निर्मितमिति मे मतिः। तथाहि अहं पञ्चाध्यायात्मके अस्मिन् शोधप्रबन्धे आदौ एव संस्कृतनाट्यतत्त्वेतिहासे अद्भुतरसस्य प्राधान्यम्, कालिदास-भास-भवभूत्यादिनाट्यकृताम् अद्भुतरसस्य सार्थकप्रयोगं तथा चापि आधुनिकनाटकेषु रसस्यास्य प्रयोगविधिं विचार्य अन्तिमे केषां नाट्यकृतां रसस्यास्य व्यवहारे सर्वातिशायि दाक्ष्यमिति प्रमाणयितुं प्रयत्नं करिष्यामि।

मदीयो प्रबन्धोऽयं विबुधानां समाजस्थसाधारणानाञ्च परितृप्तिं विधास्यति चेत् प्रयासोऽयं मे सार्थकतामेष्यति।

## Abbreviation

| | | |
|---|---|---|
| BSS | : | Bombay Sanskrit Series |
| MLBD | : | Motilal Banarsidass |
| ED | : | Editor |
| COMM | : | commentary |
| ENG | : | English Year |
| BENG | : | Bengali Year |
| EDN | : | Edition |
| RPT | : | Reprint |
| VOLS | : | Volumes |
| अ.पु. | : | अग्निपुराणम् |
| श.प्र. | : | शृङ्गारप्रकाशः |
| का.नु. | : | काव्यानुशासनम् |
| ना.द. | : | नाट्यदर्पणः |
| भाव.प्र. | : | भावप्रकाशनम् |
| अधि. | : | अधिकरणम् |
| सा.द. | : | साहित्यदर्पणः |
| र.ग. | : | रसगङ्गाधरः |

| | | |
|---|---|---|
| र.व. | : | रसार्णवसुधाकरः |
| ना.शा. | : | नाट्यशास्त्रम् |
| का.प्र. | : | काव्यप्रकाशः |
| का.लङ्का. | : | काव्यालङ्कारः |
| ध्व.ल. | : | ध्वन्यालोकः |
| द.रू. | : | दशरूपकः |
| अभि.श. | : | अभिज्ञानशकुन्तलम् |
| मनु. | : | मनुसंहिता |
| विक्रम. | : | विक्रमोर्वशीयम् |
| माल. | : | मालबिकाग्निमित्रम् |
| प्रतिमा. | : | प्रतिमानाटकम् |
| स्वप्न. | : | स्वप्नवासवदत्तम् |
| अवि.मा. | : | अविमारकम् |
| उ.रा. | : | उत्तररामचरितम् |
| चारु . | : | चारुदत्तम् |
| प्रतिज्ञा . | : | प्रतिज्ञायौगन्धरायणम् |
| अभि. ना. | : | अभिषेकनाटकम् |
| वाच. | : | वालचरितम् |
| महा. च. | : | महावीरचरितम् |

# सूचिपत्रम्


| विषयः | पृष्ठाङ्कः |
|---|---|
| प्रथमाध्यायः | 1-50 |
| संस्कृतनाट्यतत्त्वानुसारतःअद्भुतरसस्य स्वरूपविवेचनम् | |
| द्वितीयाध्यायः | 51-75 |
| कालिदासस्य नाटकेषु अद्भुतरसस्य स्थानमहिम्नः पर्य्यालोचनम् | |
| तृतीयाध्यायः | 76-168 |
| कालिदासोत्तराणां नाट्यकाराणां नाट्यानामद्भुतरसविमर्शः | |
| चतुर्थाध्यायः | 169-194 |
| अर्वाचीनेषु कतिपयेषु दृश्यकाव्येषु अद्भुतरसस्य स्थानान्वेषणम् | |
| पञ्चमाध्यायः | 195-199 |
| समीक्षात्मकं मूल्यायनम् | |
| **BIBLIOGRAPHY** | 200-205 |

# संस्कृतनाट्यतत्त्वानुसारतः अद्भुतरसस्य स्वरूपविवेचनम्

## प्रस्तावना --

मानवसभ्यतायाः ऊषालग्नतो मानवा आनन्दकामिन्याश्चेतनाया अन्वेषणरताः। भारतीयसंस्कृतेः चेतनैषा यथा ऋषीणाम् उपनिषद्वचनेषु तथावेदान्तदर्शनेषु प्रतिभासिता आलोक्यते।तद्वदेव साहित्यतत्त्वानामपि विश्लेषणं तावत् सम्यक्तया कृतं तैः ऋषिभिः।तथाहि भारतभूमेः काव्यमीमांसकृदः काव्यस्यापि प्रयोजनान्यनुभूय एतस्मिन् विषये विविधैरालोचनैः समृद्धा आसन्। तेषु भामहादयः काव्यमीमांसका अन्यतमाः। प्रायेण सर्वैरालंकारिकैः काव्यप्रयोजनानि निगदितानि। यथोक्तं भामहाचार्येण –

धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च
करोति कीर्तिं प्रीतिञ्च साधुकाव्यनिषेवणम्॥[1]

काव्यस्य एषु प्रयोजनेषु मुख्यप्रयोजनमस्ति आनन्दलाभः। उपनिषत्सु ऋषयः परमात्मानमेव रसत्वेन स्वीकृतवन्तः। उक्तञ्च - 'रसोवै सः'।[2] विश्वनाथेन काव्यलक्षणनिरूपणप्रसङ्गेनोक्तं 'वाक्यं रसात्मकं काव्यम्'।[3] रस एवात्मा साररूपतया जीवनधारायको यस्य तेन विना तस्य काव्यत्वानङ्गीकारात् रस्यते इति रस इति व्युत्पत्तियोदाद् भावतदाभासादयोऽपि गृह्यते।काव्यस्यास्वादनमेव रसः। आलंकारीकानां मतेन रस एव काव्यस्यात्मा, शब्दार्थौ तावत् काव्यकारीरम्, गुणं शौर्यादिवत् काव्यैश्वर्यम्, अलंकारश्च कटककुण्डलादिवदिति। काव्यात्मना रसेन सह गुणालंकारयोः सम्बन्धः अङ्गाङ्गिभावेन युक्तः।मनुष्याश्रितगुणाःयथा मानवागताः तथा काव्यगुणाः काव्यात्मभूतरसाश्रिताः।

---

[1]काव्यालंकारः –१.२

[2]तैत्तिरीयोपनिषद्

[3]साहित्यदर्पणः –१.३

लौकिकालंकाराः यथा मानवदेहस्य सौन्दर्यं वर्धयन्ति तथैव काव्यालंकाराः काव्यस्य सौन्दर्यम्। अतएव गुणा वा स्युःअलंकारा वा सर्व एव रसनिर्भराः।

## रसस्वरूपम्

रसतत्त्वविषयकं मौलिकाभिमतं सर्वप्रथमं तावत् प्रदत्तं भरताचार्येण तदीये नाट्यशास्त्रे। तन्मतेन - 'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः'।[4] रसं विना न कोऽपि पदार्थः प्रतिपद्यते– 'न हि रसादृते कश्चिदर्थः प्रवर्तते'।नाट्यरसस्य विभावादिभिः निष्पत्तौ मधुरादि प्रभृतिभिर्लौकिकस्य षडरसस्य निष्पत्तिं दृष्टान्तरूपेण प्रदर्शयन् भरत एवमाह - **'को वा दृष्टान्त इति चेत् ?- उच्यते, यथा नानाव्यञ्जनौषधिभिद्रव्यसंयोगाद् रसनिष्पत्तिः, तथा नानाभावोपगमाद् रसनिष्पत्तिः, यथा हि गुडादिभिः द्रवैः व्यञ्जनैः औषधिभिश्च षाडवादयो रसा निर्वर्त्यन्ते, एवं नानाभावोपहिता अपि स्थायिनो रसत्वमाप्नुवन्ति।'** इति।अस्याभिप्रायो वर्तते –

यैरास्वादो रसो वा व्यज्यते तानि व्यञ्जनानि कथ्यन्ते। यथा चिञ्चा, चुक्रम् (अम्लवेतसः), दधि इत्यादीनि शाकादीनि च व्यञ्जनानि सन्ति। उपसेचनपदार्थानाम् एषां लोके आस्वादस्य व्यञ्जनेन व्यञ्जनमिति नाम प्रसिद्धं वर्तते। दध्नौदनादेरास्वादस्य व्यञ्जकताऽनुभूयत एव। ओषधिशब्देन गौधूमाः, द्विदलानि, हरिद्रादीनि च गृह्यन्ते। द्रव्यशब्देन गुडादयोऽत्र बोध्यन्ते। एवं नानाविधानां चिञ्चाज्यम्लतिक्तादिरसयुक्तानां व्यञ्जनानाम्, गोधूमचूर्णादिरूपाणाम् औषधीनाम्, गुडादीनां द्रव्यानां च सम्यग्योन दक्षेण पाचकेन यथामात्रं पाकक्रमेण सम्यग् मेलनेन संयुज्यमानानां तेषां व्यञ्जनादिपदार्थानाम् अम्लतिक्तमधुरादिरसेभ्यो विलक्षणेन रसेन युक्तो विलक्षणः षाडवशब्देन बोध्यः

[4] नाट्यशास्त्रम्. – ६।३४

पदार्थोनिष्पद्यते । अयं व्यञ्जनेभ्य औषधिभ्यो द्रव्येभ्यश्च विलक्षणः पदार्थो मधुरादिभ्यः प्रसिद्धेभ्यो लौकिकरसेभ्यो विलक्षणेन रसेन युक्तो भवति रसनीयश्च भवति । अत एवायं मधुर इति, तिक्त इति, अम्ल इति चैवंरूपेण पृथक्तया व्यवहर्तुं न शक्यते, अपितु समग्ररसमयत्वेनास्य षाडवपदार्थस्यास्वादो विलक्षणो भवति। एवं षाडरसस्य सनिष्पत्तेर्दृष्टान्तो भवति । नाट्यरसोऽत्र दार्ष्टिन्तिको वर्तते। षाडवस्य निष्पत्तये यद्यपि चिञ्चाप्रभृतीनि व्यञ्जनानि योज्यन्ते तथापि रसव्यञ्जकत्वेन जलस्य प्राधान्यं भवति । एवं प्रकृते नाट्यरसस्य निष्पत्तौ जलवद् रसव्यञ्जने प्राधान्येन विभावा भवन्ति, चिञ्जागोधूमहरिद्रादिवद् अनुभावा भवन्ति, गुडादिवद् व्यभिचारिणश्च भवन्ति। यथा गुडादयः स्वात्मनि चिञ्चादिरसं चिञ्चादिषु गोधूमादिषु च परत्र स्वकीयं मधुरं रसं संक्रामयन्ति सर्वान् षाडवस्य घदकीभूतान् पदार्थान् एवमुपरञ्जयन्ति च तथा नाट्यरसस्यापि निष्पत्तौ व्यभिचारिभावाः स्थायिनाऽत्मानं स्वात्मना स्थायिनं चोपरञ्जयन्ति। यथा षाडवरसस्य निष्पादने सर्वेषां गुडादिपदार्थानां मिश्रणात् पूर्वं केवलेन व्यञ्जनस्य संयोगेन जनितो रसविशेषो भवति, तेन तुल्योऽत्र दार्ष्टान्तिके केवलेन विभावेन जनितः स्थायी भावो मन्यते। एवं विभावो जलरूपव्यञ्जनतुल्यः, अनुभावः चिञ्चागोधूमादितुल्यः, व्यभिचारी गुडादिद्रव्यतुल्यः, स्थायी भावश्च गुडादिमिश्रणात् पूर्वं गोधूमादौ विद्यमानेन व्यञ्जनमात्रयोगजन्येन रसविशेषेण तुल्यो भावति। यथा भरतेन रससूत्रे विभावादीनां त्रयाणामेव ग्रहणं कृतम्, न तु स्थायिनः, तथाऽत्रापि दृष्टान्ते व्यञ्जनौषधिद्रव्यरूपाणां त्रयाणामेव पदार्थानां ग्रहणं विहितम्, न तु गुडादिमिश्रणात् पूर्वं विद्यमानस्य व्यञ्जनमात्रसंयोगजन्यस्य रसविशेषस्य। एष गुडादिमिश्रणात् पूर्वं विद्यमानो रसविशेषो लौकिक एव भवति, किन्तु गुडादिमिश्रणे सति निष्पन्नः षाडवरसो मुधुरादिविलक्षणत्वेन

लोकोत्तरो वक्तुं शक्यते। एवमिह स्थायी भावो लौकिकः, रसस्तु लोकोत्तरो भवति। एवं नाट्यरसस्य निष्पत्तौ भरतेन षाडवरसस्य निष्पत्तिर्दृष्टान्तरूपेण प्रस्तुता। दृष्टान्तदार्ष्टन्तिकयोः पूर्वोक्तं साम्यमभिनवभारत्याम् एवं प्रतिपादितम् - **'व्यञ्जनम् उपसेचनद्रव्यम्।... मधुरचुक्रादिभेददधिकाञ्चिकादि। ओषधयः चिञ्चागधूमदलहरिद्रादयः। द्रव्यं गुडादि।... एतदुक्तं भवति- पाकरूपया सम्यग्योजनया तावद् अलौकिको रसो जायते। तत्र प्रधानत्वेन जलस्य रसाभिव्यञ्जकत्वमिति व्यञ्जनं विभावस्थानीयम्। चिञ्चाहरिद्राद्यनुभावप्रायम्। द्रव्याणि तु गुडादीनि तदीयचुक्रादिरसविलक्षण-मधुरादियोगाद् व्यभिचारिकल्पम्। स्वात्मनि तदुपजीवनेन च परत्र च स्वरससंक्रमणया वैचित्र्याधायकत्वात्। अत्र तु स्थायिकल्पः तन्मिक्षणसमयभावी रसविशेषो विभावकल्पव्यञ्जनजनितः। स हि लौकिकः। अयं तु कुशलैकनिर्वर्त्यः तद्विदां रसनीयो भवति।... यथा हि दार्ष्टान्तिकसूत्रे स्थायिग्रहणं शल्यकल्पमिति त्रयमेवोपात्तं तथा दृष्टान्तेऽपि त्रयस्यैवोपादानं युक्तम्।'** इति। परन्तु भरतस्य रससूत्रे सूत्रकारेण 'संयोगः' 'निष्पत्तिरिति' च शब्दयोःअर्थो न परिष्कृतः। एतस्मात् कारणात् परवर्तिनि काले रससूत्रमाश्रित्य अनैकाः व्याख्याः समुद्भूताः। आसु व्याख्यासु चतस्र एव मुख्याः। ते तावत् भट्टलोल्लटस्य उत्पत्तिवादः, भट्टशङ्कुकस्य अनुमितिवादः, भट्टनायकस्य भूक्तिवादः, अभिनवगुप्तस्य अभिव्यक्तिवादश्चेति। नृत्यगीतादीनां सर्वेषां कलासाधनानां मुख्यं लक्ष्यं तावद्रसनिष्पत्तिरेव। दार्शनिकेन हेगेलमहोदयेन रसविषये कथितम् - 'The beautiful is the manifestation of idea' इति। रसास्वादनप्रसङ्गेन भरतेनोक्तम् – यथा हि नानाव्यञ्जनसंस्कृतमन्नं भुञ्जाना रसान् आस्वादयन्तः सुमनसः पुरुषाः हर्षादीन् च अधिगच्छन्ति, तथा नानाभावाभिनयव्यञ्जितत्वाद्वागङ्गसत्त्वोपेतान्

स्थायिभावानास्वादयन्तः प्रेक्षका हर्षादींश्चाधिगच्छन्तीति कृत्वा ते नाट्यरसाः।[5] भोज्यपदार्थरसः नाट्यरसापेक्षया स्थूलः। पक्षान्तरेण नाट्यरसः लौकिकरसापेक्षया सूक्ष्मः। स खलु सामाजिकैरन्तरिन्द्रियैरेव गृह्यते।

भरतेन रससूत्रे रसशब्दः प्रयुक्तः। लोके रसशब्दो मधुरादौ, पारदे, विषये, सारे, जले, अभिनिविशे, वीर्यरूपे देहधातौ चैवमादिष्वर्थेषु प्रयुज्यते। तत्र मधुरादौ रसशब्दस्य प्रयोगे प्रवृत्तिनिमित्तं मधुरादौ वर्तमानं रसनेन्द्रियेण ग्राह्यत्वं भवति। अतो 'यो रस्यते इत्यर्थः रसनेन्द्रियेण गृह्यते स रस' इति 'रस आस्वादनस्नेहनयोः' इति रसधातोर्निष्पन्नस्य रसशब्दस्यार्थो मधुरादौ संगच्छते। किन्तु 'विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः' इत्यत्र शृङ्गारादौ प्रयुज्यमानस्य रसशब्दस्य प्रवृत्तिनिमित्तं किं भवेदिति प्रश्नो भवति। शृङ्गारादौ हि रसनेन्द्रियेण ग्राह्यत्वं नास्ति, शृङ्गारादिर्हि मनसा, न तु रसनेन्द्रियेण। यथा मधुरादौ रसा रसनेन्द्रियेण आस्वाद्यन्ते तथा शृङ्गारादयो रसनेन्द्रियेणन्न नास्वाद्यन्ते। एवं शृङ्गारादौ रसशब्दस्य रसनेन्द्रियग्राह्यत्वरूपं प्रवृत्तिनिमित्तं कथमपि न संभवति। ततश्च प्रवृत्तिनिमित्तस्याभावाने शृङ्गारादौ रसशब्दस्य प्रयोगो न संगच्छते। प्रश्नोऽयं भरतेन '**अत्राह रस इति कः पदार्थः ?**' इति वचनेनोत्थाप्यते। शृङ्गारादौ प्रयुज्यमानो यो रस इति शब्दो वर्तते तस्य पदार्थः प्रवृत्तिनिमित्तभूतोऽर्थः क इति कथितस्य प्रश्नवाक्यस्य अभिप्रायो भवति। केचन व्याख्यातारः कथितस्य प्रश्नवाक्यस्यार्थम् उत्तरपरत्वेनापि व्याख्यान्ति। यथा- योऽयं रस इति शब्दः स क इति प्रश्नो वर्तते, 'पदार्थः' इत्यनेन शब्देन 'उच्यते' इत्येन शब्देन चोत्तरं कथ्यते, अर्थाद् रसः पदार्थो भवति, न तु शब्द इत्युत्तरं भवति। इदं व्याख्यानं समीचीनं न वर्तते, यतोऽनेनेतिपदस्यात्राऽध्याहारः करणीयो भवति, अत्रैवोत्तरस्य दत्तत्वेन प्रश्नाभावाद्

[5] तत्रैव – प्रथमः खण्डः, पृः - २८९-२९०

अग्रे ‘आस्वाद्यत्वात्’ इत्युत्तरप्रदानं न संगच्छते। तेन ‘अत्राह रस इति कः पदार्थः ?’ इति वाक्यं प्रश्नपरत्वेनैव व्याख्यातव्यमिति अभिनवभारत्यां स्पष्टं विद्यते। अस्य प्रश्नस्योत्तरम् **‘आस्वाद्यत्वात्**’ इति पदेन दीयते। रसशब्दस्य शृङ्गारादौ प्रवृत्तेर्निमित्तम् आस्वाद्यत्वं वर्तते। यथा मधुरादौ रस्यत्वरूपम् आस्वाद्यत्वं भवति तथा शृङ्गारादावपि। रसनक्रियोभयत्र भवति- मधुरादौ शृङ्गारादौ च। एवं रसनक्रियायोगेन रसशब्दो यथा मधुरादौ प्रवर्तते तथा शृङ्गारादावपि। एवं रसशब्दस्य रसनक्रिया प्रवृत्तिनिमित्तं भवतीति ‘**आस्वाद्यत्वात् प्रवृत्तिहेतोः यतः प्रश्नः तेन तस्योत्तरं हेतुविभक्त्यैव दत्तम्। तेन क्रिया प्रवृत्तिनिमित्तम् अस्येत्युक्तं भवति**’ इत्यभिनवभारत्या वचनेन स्पष्टम् । पुनरत्र प्रश्नो भवति यत् शृङ्गारादौ आस्वाद्यत्वरूपस्य रसशब्दप्रवृत्तिनिमित्तस्य या सत्ता ‘आस्वाद्यत्वात्’ इति वचनेन साधिता सा न समीचीना, लोके हि आस्वाद्यता तत्रैव मधुरादौ रसे प्रसिद्धा भवति यत्र रसनेन्द्रियेण जन्यस्य ज्ञानस्य विषयता भवति। यो जिह्वया लिह्यते स एवास्वाद्य उच्यते, तत्रैवास्वाद्यता रसनाव्यापारो वा भवति। आस्वादनं रसनेन्द्रियेण जन्यं ज्ञानं कथ्यते। शृङ्गारादिर्न रसनया जिह्वया लिह्यते, अतस्तत्रास्वाद्यता रसनाव्यापारः कथं संभवतीति पुनः प्रश्न उदेति। अस्योत्तरं ‘रसनेद्रियग्राह्यतारूपा आस्वाद्यता रसनया ग्रहणरूपा रसनाक्रिया वा शृङ्गारादौ उपचरिताआरोपिता’ इत्यभिप्रायेण दृष्टान्तेन सह भरतेनोत्तरमेवं दीयते –

**‘अत्रोच्यते- यथाहि नानाव्यञ्जनसंस्कृतम् अन्नं भुञ्जाना रसान् आस्वादयन्ति सुनमसः पुरुषाः हर्षादीन् च अधिगच्छन्ति, तथा नानाभावाभिनयव्यञ्जितान् वागङ्गसत्त्वोपेतान् स्थायिभावान् आस्वादयन्ति सुमनसः प्रेक्षका हर्षादीन् च अधिगच्छन्ति। तस्मान्- नाट्यरसा व्याख्याताः।**’ इति।

अस्याऽयम् अभिप्रायो वर्तते- अत्र शृङ्गारादौ रसनेन्द्रियेण ग्राह्यतारूपाया आस्वाद्यताया योऽभाव उच्यते तद्विषये इदम् उच्यते- समाधीयते। लोके ये सुमनसः शोभनमनसः एकाग्रमनसः पुरुषाः भवन्ति ते नानाव्यञ्जनैःचिञ्चा-दधिप्रभृतिभिः संस्कृतम् अन्नम् ओदनादि आस्वादयन्ति हर्षादीन्हर्षम् आनन्दम् आदिपदेन पुष्टिबलादि च अधिगच्छन्ति प्राप्नुवन्ति इत्यर्थः। मनस एकाग्रताया अभावे आस्वादस्यानन्दो नानुभवितुं शक्यते। अतः सुमनस एव पुरुषा नानाव्यञ्जनसंस्कृतस्याऽन्नस्य आस्वादेन जन्यस्यानन्दादेरनुभवस्याधिकारिणो भवन्ति। अत्र मुख्यतः त्रीणि तत्त्वानि सन्ति- आस्वादयिता, आस्वाद्यम्, हर्षादि फलं च। एवं शृङ्गारादिविषयेऽपि वक्तुं शक्यते। अत्र एकाग्रमनसः प्रेक्षकः सामाजिक आस्वादयिता, साधारणस्थायिशब्देन कथ्यमानो रस आस्वाद्यः, आनन्दो विधिनिषेधज्ञानं च फलं वर्तते। एकाग्रमनसः सामाजिका हि नानाभावैः विभावानुभावव्यभिचारिभिः अभिनयैश्च व्यञ्जितान् स्थायिभावान् आस्वादयन्ति हर्षादीन् हर्षम् आनन्दं तेन कृत्याकृत्यज्ञानानि वैदग्ध्यादीनि चाधिगच्छन्ति। उभयत्र सादृश्यं वर्तते। अन्नस्य रसस्य च भोक्तारि भोक्तृत्वम्, अन्ने रसे च भोग्यत्वम् आस्वाद्यत्वम्, उभयोः फलयोरानन्दश्च। एवं भोक्तृत्वेन, भोग्यत्वेन, आनन्दरूपत्वेन च साधारणधर्मेण क्रमेण अन्नरसभोक्त्रोः, अन्नरसयोः, उभयफलयोश्च सादृश्यं गृह्यते। तेन सादृश्येन विभावादिजन्योऽपि प्रतीतिविशेषो रसनेन्द्रियेण अजन्यः सन्नप्युपचारेण रसना कथ्यते। अन्नस्य प्रहर्षादिजनिकायां रसनायाम् एकाग्रमनःसहितेन रसनेन्द्रियेण जन्यता, विभावादिजन्यप्रतीतिविशेषरूपायां रसनायां तु एकाग्रमनोमात्रेण जन्यता भवतीति किञ्चिद्भेदे सत्यपि एकाग्रमनोजन्यत्वं प्रहर्षजनकत्वं च समानं वर्तते। अतो विभावादिजन्ये प्रतीतिविशेषे रसनेन्द्रियजन्यत्वमारोप्य विभावादिजः प्रतीतिविशेषो रसनोच्यते। आरोपस्य

प्रयोजनं रसनेन्द्रियजन्यायां प्रतीतौ वर्तमानस्य साक्षात्कारत्वस्य प्रत्यक्षत्वस्य यथार्थत्वस्य आनन्दजनकत्वादेश्च विभावादिजन्ये प्रतीतिविषये बोधनं वर्तते। यथा 'गौर्बाहीकः' इत्यादौ गोत्वारोपस्य प्रयोजनं गोगतानां जाड्यमान्द्यादीनां बाहीके प्रत्यायनं भवति। एवम् एषा समारोपिता रसनैव रसशब्दस्य प्रवृत्तिनिमित्तं भवति। एतादृशरसनारूपत्वेन एतद्रसनागोचरत्वेन च स्थायिनः शृङ्गारादयो रसशब्देन व्यपदिश्यन्ते। एवं भरतस्य मूलग्रन्थोऽभिनवभारत्यां साभिप्रायं योजितः। यथा-

**'तेन क्रिया प्रवृत्तिनिमित्तम् अस्येत्युक्तं भवति। आस्वादनं हि रसनेन्द्रियजन्यं ज्ञानं प्रसिद्धमिति भावः। अत्रोपचरितक्रियाश्रयेणोत्तरम् आह- यथा नानेत्यादिना। यथातथाशब्दाभ्यां सादृश्यम् अत्रोपचारे निमित्तम् इति दर्शयति। तत्र भोग्यस्य भोक्तुः फलस्य च साम्यं प्रदर्शयति। यथा व्यञ्जनसंस्कृतेऽन्ने आस्वाद्यता। एकाग्रमनसि भोक्तर्यास्वादयितृता। अन्यचित्तस्य भुञ्जानस्य अपि आस्वादाभिमानाभावात्।प्रहर्ष-आप्याय-जीवन-पुष्टि-बल-आरोग्याणां चास्वादफलता। तथा ... स्थायिपदव्यपदेश्ये रसे आस्वाद्यता। एकाग्रे च समाजिके तन्मयीभूते आस्वादयितृता। हर्षप्रधानानां धर्मादिव्युत्पत्ति-वैदग्ध्यादीनाम् आस्वादफलत्वमिति। कर्तृ-कर्म-फलसादृश्याद् विभावादिजः प्रतीतिविशेषो रसनाक्रिया व्यपदिष्ट इति तात्पर्यम्। येन सुमनसो भुञ्जाना हर्षादीन् च यान्ति तेन रसान् आस्वादयन्तीत्यनेन शब्देन।**'इति।

अभिनवगुप्तोऽत्र वदति यत् केचन मूलेऽन्ये 'हर्षादीन्' इति पदे 'आदि' इति पदं व्यर्थं वदन्ति। यत आदिपदेन दुःखस्यैव ग्रहणं भवेत्, न च रसास्वादे दुःखं भवति, अतः 'हर्षान्' इति मूलपाठः समीचीनो भवति। किन्तु मतमेतत् समीचीनं नास्ति, यत आदिपदेन

विधिनिषेधयोर्व्युत्पत्तिः वैदग्धादयश्च गृह्यन्ते। एवं केचन व्याख्याकारा प्रकृते दृष्टान्ते दार्ष्टन्तिके रसे च वैषम्यं प्रतिपादयन्ति। ते वदन्ति यद् दृष्टान्ते त्रयः पदार्थाः सन्ति- अन्नस्य भोक्ता आत्मा, रसना (जिह्वा) मनश्च। किन्तु दार्ष्टान्तिके रसे केवला रसनैव (आरोपित रसनाव्यापारः) भवति। अतो वैषम्यं वर्तते। किन्तु वैषम्यस्यापादनं समीचीनं नास्ति। यतोऽत्रापि त्रयः पदार्था भवन्ति-आत्मा, आत्मैव मनो भवति, मन एवात्र च रसनास्थानीयं (जिह्वास्थानीयं) भवति। आत्मैव हि मनोरसनारूपाभ्यां भासते। आत्मन एव दशाविशेषो मनो रसना च वर्तते। इतीहापि त्रयसद्भावः। इदमेवम् अभिनवभारत्यां स्पष्टम्-

**'एवं ग्रन्थयोजनायां यत् कैश्चिद् अत्र चोदितम्- दृष्टान्ते आत्मा रसना मनश्चेति त्रयम्। प्रकृते तु रसनैवेति। परिहृतं चात्मन एवात्र स्थानान्तरसंक्रान्तस्य मनःस्थानीयता। मनसश्च रसनास्थानीयतेति।**' इति।

एवं लौकिकाद् अन्नरसाद् नाट्यरसस्य सादृश्यं भेदश्य दृष्टान्तदार्ष्टान्तिकवाक्ययोः यथातथाशब्दयोः प्रयोगेण प्रतिपादितम्। एदं अन्नदृष्टान्तेन 'तस्माद् नाट्यरसा व्याख्याताः' इत्यत्र 'व्याख्याताः' इति पदेन च सूचितम्। लौकिकरसेन साम्ये सत्यपि नाट्यरसा उक्तरीत्या 'वि' इत्यर्थः अन्यभोक्त्रादिवैलक्षण्येन विशेषरूपेण ख्याताःप्रसिद्धाः अस्माभिः व्यवहृताश्चेति 'व्याख्याता' इति पदस्य विवक्षितोऽर्थो वर्तते।

एवं रसशब्दस्य शृङ्गारादौ प्रवृत्तेर्निमित्तम् आरोपिता रसनाक्रिया वर्तते। एवं रसस्य 'रसत्वं केन वै तेषाम्' इति प्रश्नितं निरुक्तं प्रदश्र्य भरतेन शिष्याचार्यपरम्परयां प्रसिद्धाभ्यां श्लोकाभ्यां कारिका प्रदर्श्यते-

अत्रानुवंश्यौ श्लोकौ भवतः-

**यथा बहुद्रव्ययुतैर्व्यञ्जनैर्बहुभिर्युतम्।**

**आस्वादयन्ति भुञ्जाना भक्तं भक्तविदो जनाः॥**

**भावाभिनयसंयुक्तान् स्थायिभावांस्तथा बुधाः।**

**आस्वादयन्ति मनसा तस्मान्नाट्यरसाः स्मृताः॥** इति।

शिष्याचार्यपरम्परेह अनुवंशशब्देनोक्ता। तस्यां भवौ श्लोकौ अत्र रसस्य निरुक्तरूपे भाष्ये विद्येते। एतौ कारिकायाः प्रदर्शकत्वेन कारिकापदेनाऽप्युच्यते। यथा बहुद्रव्ययुतैः मधुरादिभेदे बहुभिर्गुडप्रभृतिभिः द्रव्यैः युतैः युक्तैः, बहुव्यञ्जनैः दधिचिञ्चाप्रभृतिभिः व्यञ्जनैः युतम् यथामात्रं मिश्रितम्, भक्तम् अन्नम् ओदनम्, भुञ्जानाः खादन्तः, जनाः लोके साधारणाः सर्वे जनाः, आस्वादयन्ति रसनेन्द्रियव्यापाराद् अधिकेन मानसव्यापारेण गृह्णान्ति, तथा बुधाः लोके प्रमदादिभिः स्थायिभावस्यानुमाने स्वगतस्य स्थायिनो मानसप्रत्यक्षे च दक्षा विदग्धाः सामाजिकाः, भावाभिनयसंयुक्तान् भावैः विभाव-व्यभिचारिभिः अभिनयैः अनुभावैश्च संयुक्तान् सम्यक्तया हृदयसंवादक्रमेण युक्तान् तन्मयीभावेन प्रमात्राऽभेदं प्राप्तान् स्थायिभावान् मनसाइन्द्रियान्तरविघ्नानां संभावनया शून्यया स्वपरगततत्वस्पर्शेन रहिततया लौकिकप्रत्यक्षादेः, योगोपायार्जनादीनां विघ्नानां बाहुल्येन युक्ताद् युञ्जानयोगिप्रत्यक्षात्, विषयोपरागरहिताद् अत एव कठोराद् युक्तयोगिप्रत्यक्षाच्च भिन्नया रत्यादिवासनाविद्धया हृदया संविद्रूपया चर्वणया आस्वादयन्ति आ समन्तात् साधारणीभावेन निर्विघ्नप्रतीतिवशात् स्वादयन्ति भुञ्जते विषयी कुर्वन्तीति पदार्थो विद्यते। लोके दृश्यते यदनेके जना तमोदनं खादन्ति यो गुडादिद्रव्यसहितैः चिञ्चादधिप्रभृतिभिः व्यञ्जनैः संयुक्तो भवति। अत्र खादनं भोजनं वा रसनम् रसनेन्द्रियेण ग्रहणं वर्तते। ततोऽन्नस्यास्वादो मनसा ग्रहणं भवति। एवं लोके मनःसहितेन्द्रियजन्याद् भोजनाद् रसनाद् वा भिन्नो मानसमात्रस्य व्यापार आस्वादो भवति। **'रसनाव्यापाराद् भोजनाद् अधिको यो मानसो व्यापारः स एवास्वादनमिति**

**दर्शयति**' इत्यभिनवभारतीवचनेन प्रथमश्लोकेऽपि उत्तरपश्लोकाद् 'मनसा' इति पदस्यापकर्षो भरतस्याऽभिप्रेत इति प्रतिभाति। 'यथा बहुद्रव्य' इति प्रथमे श्लोके बहुपदोपादनेन विभावभेद एव रसभेदस्य हेतुरिति सूच्यते। यथा लोके जना गुडादिद्रव्यैर्युतं दध्यादिव्यञ्जनैश्च संयुक्तं भक्तं खादन्ति केवलेन मनसा आस्वादयन्ति तथा नाट्यादौ सामाजिका विभावादिविशिष्टं स्थायिभावम्। एवं सत्यपि लोकगताद् आस्वादाद् अत्रास्वादे भेदो वर्तते । भक्तस्यास्वादे रसनेन्द्रियस्यापि व्यापारो मनोमात्रव्यापाराद् आस्वादनाद् अधिको भवति, किन्त्वत्र रसनादीन्द्रियव्यापारो न भवति। अत एवेन्द्रियजन्याः संनिकर्षादयो विघ्ना न भवन्ति । लौकिकप्रत्यक्षादौ स्वत्वस्य परत्वस्यापि च भानं भवति, अत्र तु साधारण्यस्य। युञ्जानयोगी यमनियमादीनां योगाङ्गानां मानससंनिकर्षादीनां चोपार्जने कष्टमनुभवति, अतस्तस्य प्रत्यक्षे उपार्जनादिविघ्नेन जन्यता भवति, अत्र तु रसास्वादे उपार्जनादिकृतो विघ्नो न भवति । नहि रसास्वादाय सहृदयेन यमनियमादय उपार्ज्यन्ते। युक्तयोगिनो ज्ञानं विषय़ोपरागशून्यं नीरसं च भवति। रसमयी संवित् तु स्थायिवासनाभिः अनुविद्धा सुखमात्रमयी च भवति। एवं रसो लौकिकाद् द्विविधाद् योगाजाच्च प्रत्यक्षाद् विलक्षणो भवति। एवं भक्तस्यास्वादात् स्थायिभावास्वादो यद्यपि भिन्नो वर्तते तथापि मानसव्यापारस्योभयत्र योगेन सादृश्यं वर्तते। एतदिहाऽभिनवभारत्याः पर्यालोचनेन विचारितम्। यथा भक्तस्यास्वादे बाह्येन्द्रियस्य रसनाया उपयोगो भवति तथा काव्यरसास्वादे श्रवणेन्द्रियस्य नाट्ये चक्षुरिन्द्रियस्य च। एवं बाह्येन्द्रियोपयोगेनापि सादृश्यं वक्तुं शक्यते। ततश्च स्थायिभावो भक्त इव, विभावादयो गुडदध्यादय इव, श्रवणादि रसनेव, आस्वादनम् लौकिकास्वादनमिवइति सादृश्यं वक्तुं शक्यते। स्वगतादेः लौकिकाद् आस्वादात् साधारण्येन जायमानात् स्थाय्यास्वादाद् भेदश्च प्रतिपादित एव। 'भावाभिनयसंयुक्ताः' इत्यादौ भावपदेन

विभाव-व्यभिचारिणः, अभिनयपदेनाऽनुभावाश्च गृह्यन्ते। 'बुधाः' इति पदेन लौकिकानामपि प्रमाणानामुपयोगः सूचितः।

'**तस्मान्नाट्यरसाः स्मृताः**' इत्यंशस्य व्याख्यानमभिनवभारत्यां चतुर्धा लभ्यते- नाट्यात् शब्दार्थविभावाभिनयगीतादिसमुदायरूपाद् नाट्याद् रसाः' इति पञ्चमीतत्पुरुषेण व्याख्यानं **प्रथमं** वर्तते। एतेन सिद्ध्यति यद् नाट्यं शब्दार्थादीनां समुदायो भवति। तस्मादेव जायमानत्वेनैतेशृङ्गारादयो रसा नाट्यरसा उच्यन्ते। 'नाट्यम् एव रसा नाट्यरसाः' इति द्वितीयं व्याख्यानं वर्तते। तदनुसारेण नाट्यमेव वस्तुतो रसो वर्तते। नाट्यं हि रससमुदायो भवति। रससमुदायाद् भिन्नं किमपि नाट्यनामकं तत्त्वं नास्ति। काव्येऽपि रसो नाट्यवदेव भवति। काव्यार्थस्य यदा प्रत्यक्षात्मकं संवेदनमुदेति तदैव रस उदेति। काव्यगता अपि पदार्था मानससाक्षात्कारस्य विषया भवन्ति। काव्यकौतुके भट्टतौतेनापि पूर्वत्तरपक्षाभ्याम् अभिहितम्-

प्रयोगत्वमनापन्ने काव्ये नास्वादसंभवः।
वर्णनोत्कलिता भोगप्रौढोक्त्या सम्यगर्पिताः।
उद्यानकान्ताचन्द्राद्या भावाः प्रत्यक्षवत् स्फुटाः॥

काव्ये रसचर्वणाया मूलं गुणालङ्कारकृतस्य सौन्दर्यस्यातिशयो विद्यते। एवं गीताभिनयाद्यभावेऽपि विमलहृदयानां सहृदयानां कृते परिपूर्णरसास्वादे उपयोगि काव्यमपि नाट्यकल्पमेव भवति। अतो नाट्यमेव वस्तुतो रसो नाट्यरसाः, न तु काव्यमपि वस्तुतो रसा। इति द्वितीयं व्याख्यानं भवति। एतन्मते काव्यनाट्ययोर्भेदः। काव्यं नाट्येन तुल्यं भवति। अत एव तत्र रसास्वादो गुणालङ्कारादिसौन्दर्येण काव्यादपि भवति।

तृतीयं श्रीशङ्कुकाभिमतं व्याख्यानं वदति यन्नाट्यशब्दस्यार्थो भवति नटस्य कर्मरूपो धर्मो बाह्याऽभिनयादिसामग्री। तस्या बाह्याया अभिनयादिसामग्र्या स्थायिनोऽनुकरणरूपा रसा भवन्तीति 'नाट्यात् नटकर्मणोऽभिनयादेः अनुकरणरूपा रसा भवन्ति, अतो नाट्यरसाः स्मृताः परम्परया अविच्छिन्नसम्प्रदायेन बोधिताः' इत्यर्थः करणीयः। अस्मिन् व्याख्याने कथ्यते यदनुकरणरूपः शोकोऽपि सुखहेतुर्भवति, यतो नाट्यगतस्य शोकस्य सुखहेतुत्वं स्वभावो वर्तते। लोके दुःखहेतुरपि शोकादिर्नाट्यमहिम्ना सुखस्यैव हेतुर्भवति। अयं नाट्यगतस्य वस्तुतः स्वभावो वर्तते यदयं शोकादिरपि सुखमेव जनयति। इदं तृतीयं व्याख्यानं निराकुर्वताऽभिनवगुप्तेन कथ्यते यत् शोकस्य नाट्ये दुःखहेतुत्वस्य प्रश्नो नाट्यवस्तुनः सुखजनकत्वं स्वभाव उत्तरं चेत्युभयम् असंगतं वर्तते। नटगतत्वेन हि शोकादेः प्रतीतिरस्मिन् मते स्वीक्रियते। परत्वेन ज्ञायमानस्य नटस्य शोकस्य ज्ञानेन सहृदये दुःखत्पादस्य प्रश्न एव नोदेति। तटस्थे पुरुषे वर्तमानस्य शोकस्य ज्ञानेन ज्ञातरि दुःखोदयो नियमेन न दृश्यते। शत्रुगतस्य शोकस्य ज्ञानेन प्रत्युत हर्षस्यैवोत्पादो दृश्यते। अतः प्रश्नस्यैव असंगतत्वेन वस्तुस्वभावेनोत्तरस्य दानं निःसारमस्ति। किञ्च नटे रसो न भवति। रसे नटसंबन्धो न भाति। रसो हि देश-काल-प्रमातृभेदेन रहित भवति। अतो नटे रसो न भवति। असौ कञ्चनापि रसं नास्वादयति। अतएव नटः पात्रम् उच्यते। यथा पात्रं स्वगतं मद्यं नास्वादयति, अपितु परस्य मद्यास्वादे उपायमात्रं भवति, तथा नटोऽपि सामाजिकस्य रसास्वादे उपायमात्रं भवति। अत एव कलशादिपात्रसादृश्येन नटः पात्रं कथ्यते। नटवत् चित्रपुस्तादि अपि उपायमात्रं वर्तते। एतन्नाट्यस्यार्थभागस्य तथैको निःस्यन्दः प्रवाहो भवति यथा नाट्यस्यैवार्थभागस्य निःस्यन्दाः सर्गबन्धादयः शब्दभागा भवन्ति।

**'नाट्ये एव रसाः, न लोक इत्यर्थः। काव्यं च नाट्यमेव'** इति चतुर्थ व्याख्यानमभिनवगुप्तसम्मतं वर्तते। वस्तुतस्तु काव्यमपि दशरूपकात्मकम् नाट्यमेव भवति। नाट्यकाव्ययोर्न वास्तवो भेदः। काव्ये समुचिताया भाषाया वृत्तेः काकुप्रभृतेश्च प्रयोगेण रसवत्ता पूर्णा भवति। सर्गबन्धादौ यद् नायिकायाः संस्कृतमय वचनं केनचित् कविना निबद्ध्यते तत् तस्य कवेः शक्त्या तिरोहितत्वेनानुचितं न प्रतिभाति। एवं काव्यमपि नाट्यमेव भवति। 'संदर्भेषु दशरूपकम्' इति वदता वामनेनापि नाट्यस्य महत्वं सूचितम्। अत एव सर्गबन्धादावपि काव्ये नाट्येऽभिहितानां सन्धितदङ्गादीनां घटनं भवति। ये स्वभावतो निर्मलहृदया भवन्ति ते कदाचनापि सांसारिकक्रोधादिभावानाम् अधीना न भवन्ति। ते दशरूपकश्रवणसमये शीघ्रमेव साधारणरसनारूपया चर्वणया नाट्यरूपं रसं स्फुटतया साक्षात्कुर्वन्ति। ये तु स्वभावतो निर्मलान्तःकरणा न भवन्ति तेषां कृते नटप्रक्रिया अभिनयादयो हृदयनैर्मल्यसम्पादनाय अपेक्ष्यन्ते। स्वगतकामक्रोधादीनां निवारणाय मुनिना गीतादिप्रक्रिया अभिहिता। भरतमुनेर्नाट्यशास्त्रमेवं सर्वानुपकरोति। 'सर्वानुग्राहकं हि शास्त्रम्' इति नियमो वर्तते। एवं काव्यनाट्ययोर्न भेदः। **'चित्रपुस्ताद्यपि नाट्यस्यैवार्थभागस्याभिष्यन्दो यथा सर्गबन्धादि शब्दभागाभिष्यन्दः'** इति वचनेन सर्गबन्धादिरूपस्य काव्यस्यापि नाट्यरूपता सूचिता। अत इदमेव व्याख्यानं भवति यत् शृङ्गादयो रसा नाट्ये एव भवन्ति, न तु लोके। भरतेन शृङ्गारादीनां लोके सत्ताया वारणार्थं नाट्यपदं प्रयुक्तम्। एते शृङ्गारादयो नाट्ये एव द्रुहिणादिना स्मृताः सन्ति, न तु लोकेऽपि। 'तस्मान्नाट्यरसाः स्मृताः' इति कथनस्यायमेवाभिप्रायो वर्तते । अभिनवगुप्तमते रसस्य दुःखमयत्वं कथमपि न संभवति। रत्यादिवासनया चित्रितम् आनन्दघनं संवेदनमेव रस उच्यते। तस्योद्बोधनेऽभिनयादयो व्यापारा भवन्ति। **'अस्मन्मते**

**स्वसंवेदनमेवानन्दघनमास्वाद्यते। तत्र का दुःखाशङ्का ? तस्यैव चित्रताकरणे रतिशोकादिवासनाप्रकारः**’ इत्याद्यभिनवभारत्यां स्पष्टम् ।

**भावेभ्यो रसोत्पत्तेः सिद्धान्तः-**

रसनिष्पत्तौ षडादिरसस्य निष्पत्तिं दृष्टान्तरूपेण प्रस्तुत्य भरतेन रसतत्त्वमेव स्फुटीकर्तुं भावेभ्यो रसोत्पत्तेः सिद्धान्तं गद्येन पद्येन च पूर्वोत्तरपक्षाभ्याम् उपस्थाप्यते। यथा गद्येनैवमुक्तम्-

‘**अत्राह- किं रसेभ्यो भावानाम् अभिनिर्वृत्तिः उत आहो भावेभ्यो रसानाम् इति। अत्र केषाञ्चित् मतं परस्परसम्बन्धात् एषाम् अभिनिर्वृत्तिः इति। तन्न। कस्मात्? दृश्यते हि भावेभ्यो रसानाम् अभिनिर्वृत्तिः इति, न तु रसेभ्यो भावानाम् अभिनिर्वृत्तिः इति।**’ इति।

अस्य ग्रन्थस्याभिप्रायोऽभिनवभारत्यां विविधरूपेण प्रतिपादितः सिद्धान्तितश्च। तत्र केचन वदन्ति यदेतादृशानां विकल्पानां मूलं वर्ततेऽनुभवः। रसो नर्तके भवति। तस्य ज्ञानेन कदाचित् सामाजिके भावस्योत्पत्तिर्दृश्यते। यथा नटगतस्य करुणरसस्य ज्ञानेन सामाजिके शोकरूपस्य भावस्य अभिनिर्वृत्तिः उत्पत्तिरवलोक्यते। अतः सिद्ध्यति यत् शृङ्गारादिरसेभ्यो रतिशोकादीनां भावानां सामाजिके उत्पत्तिर्भवति। एवं रसेभ्यो भावानाम् उत्पत्तिरिति प्रथमः पक्षः सिद्ध्यति। कदाचित् तु विभावानुभावव्यभिचारिभ्यः स्थायिभावेभ्यश्च सामाजिके शृङ्गारकरुणादीनां रसानाम् उद्भवो दृश्यते। अतो भावेभ्यो रसानाम् उत्पत्तिर्भवतीति द्वितीयः पक्षः सिद्ध्यति। एवं कालभेदेन कदाचिद् रसेभ्यो भावानां भावेभ्यो रसानां चोत्पत्तिर्दृश्यत इति तृतीयः पक्षोऽपि सिद्ध्यति यद् रसेभ्यो भावानां भावेभ्यो रसानां चोत्पत्तिः स्वीकार्या।

भट्टलोल्लटमतं यदि मन्यते तदा नटे आरोपितो भ्रमविषयोऽनुकार्य रामादौ वास्तवो वा यो रत्यादिभावो भवति स एव विभावादिभिरुपचितः सन् शृङ्गारादिको रसो भवति। एवम् उपचयात् पूर्वं भावो भवति, विभावादिसंयोगेनोपचये रसो भवतीति प्रथमः पक्षः सिद्ध्यति यद् भावेभ्यो रसानाम् उत्पत्तिर्भवति। विभावादिसंयोगस्यापाये सति उपचितरत्यादिभावरूपाद् रसाच्च्युतो रत्यादिर्भावो भवति। एवम् उपचये नष्टे रत्यादौ रसत्वं विनश्यति पूर्वतनं भावत्वमेवागच्छति च। अनेन रसेभ्यो रत्यादिभावानाम् उत्पत्तिर्भवतीति द्वितीयः पक्षः सिद्ध्यति। एवं पूर्म् अपचये सति विभावादियोगेनोचये च सति 'भावेभ्योऽपि रसानाम् उत्पत्तिः' इति, उपचयादनन्तरमपचये स्वीकृते च 'रसेभ्यो भावानाम् उत्पत्तिः' इति च स्वीकारे तृतीयः पक्षः सिद्ध्यति 'कदाचिद् भावेभ्यो रसानाम्, कदाचिच्च रसेभ्यो भावानाम् उत्पत्तिर्भवति' इति।

एतदुभयं संगतं नास्ति। यतोहि अनुकर्तरि नटेऽनुकार्ये च वर्तमानो भावो रसो नास्ति। किञ्च नटे रसो भावो वा न भवति।

श्रीशङ्कुको रसभावोत्पत्तिविषयकं भरतस्योक्तं ग्रन्थमेवं योजयति- यो लोकेऽनुकर्तरि नटे रसान् आस्वादयति सोऽनुकार्यगतस्य रत्यादिभावस्य ज्ञानं करोति। एवं रसेभ्यो भावानाम् अभिनिर्वृत्तिः प्रतीतेः पक्षः संगच्छिते । अनुकर्तरि वर्तमानानां रसानाम् आस्वादेन अनुकार्यरामादिगतानां रत्यादिभावानां ज्ञानं भवति । लोके प्रतीतो भावो रसं निष्पादयति। नटो यदा नाट्याचार्यस्य शिक्षया काव्यानुसंधानेन च रामादिगतान् रत्यादिभावान् जानाति ततोऽसौ अनुकरणरूपान् रसान् निष्पादयति । अतो भावेभ्यो रसानाम् उद्भवस्य द्वितीयोऽपि पक्षः संगच्छते। एवं तृतीयोऽपि पक्षो भवति यद् रसेभ्यो भावानाम्, भावेभ्यो रसानां

चाभिनिर्वृत्तिर्भवतीति । एतदपि शङ्कुकमतं समीचीनं न वर्तते, यतो हि रसोऽनुकरणरूपो न भवति, नापि रसास्वादयन् सामाजिकोऽनुकर्तुरनुकार्यस्य च विभागं जानाति च ।

अतो भरतेन कृतानां त्रयाणां प्रश्नानां तत्समाधानानां च कोऽभिप्राय इति जिज्ञासायाम् अभिनवगुप्तः कथयति यद् अत्र प्रयुक्तो भावशब्दो विभावानुभावव्यभिचारिणां बोधको वर्तते। तेन प्रश्नो भवति यद् विभावादयो रस एव भवन्ति। रसापेक्षयैव प्रमदादिषु विभवादित्वं सिद्ध्यति । लोके तु प्रमदा-नायककटाक्ष-लज्जादीनि कारणकार्यसहकारीणि एवभवन्ति, न तेषु विभावादित्वं भवति । एवं रसनोपयोगीनि सन्त्येव प्रमदादीनि विभावादिरूपतां भजन्ते । रसं विना विभावादीनां सत्ता न संभवतीति 'नहि रसादृते कश्चिदर्थः प्रवर्तते' इति पूर्वं प्रतिपादितम् । रससूत्रे तु विभावादीनामेव संयोगाद् रसस्य निष्पत्तिरभिहिता। अतः 'किं रसेभ्यो भावानाम् विभावादीनाम् अभिनिर्वित्तिर्भवति ?' इति प्रथमः प्रश्नः, 'किं भावेभ्यः विभावादिभ्यो रसानाम् अभिनिर्वृत्तिः निष्पत्तिर्भवति ?' इति द्वितीयश्च प्रश्नो भवति। अथवा 'रसैर्विभावादीनां विभावादिभी रसानां चाभिनिर्वृत्तिर्भवतीति तृतीयोऽपि प्रश्नो भवति। तदेवं त्रयः पक्षा भवन्तिरसेभ्यो विभावादीनां निष्पत्तिः, विभावादिभ्यो रसानां निष्पत्तिः, रसविभावादिषु परस्परं प्रति जन्यजनकभाव इति । तत्र द्वितीय एव पक्षः समीचीनो वर्तते। अयमेव 'विभावानुभावसंयोगाद् रसनिष्पत्तिः' इति रससूत्रेण प्रतिपादितम्। भावैः विभावादिभिरेव रसा निष्पाद्यन्ते, न तु रसैर्विभावादयो निष्पाद्यन्ते। प्रतीयमानाः प्रमदादिरूपा विभावादय एव रसास्वादं जनयन्तीति दृश्यते। अतो भावेभ्यो रसानामभिनिर्वृत्तिः निष्पत्तिर्भवतीति मूलग्रन्थस्य वास्तवोऽभिप्रायो वर्तते। प्रस्तुतभावशब्दस्य विभावादिवाचकत्वे विभावादिभ्यो रसनिष्पत्तेः स्वीकारे चानुभवतिरिक्तं श्लोकरूपशब्दप्रमाणमपि वर्तत इत्याह भरतः-

**'भवन्ति चात्र श्लोकाः –**

**नानाभिनयसम्बन्धान् भावयन्ति रसानिमान्।**

**यस्मात् तस्मात् अमी भावा विज्ञेया नाट्ययोक्तृभिः॥**

**नानाद्रव्यैर्बहुविधैर्व्यञ्जनं भाव्यते यथा।**

**एवं भावा भावयन्ति रसान् अभिनयैः सह॥**

**न भावहीनोऽस्ति रसो न भावो रसवर्जितः।**

**परस्परकृता सिद्धिः तयोरभिनये भवेत्॥**

**व्यञ्जनौषधिसंयोगो यथाऽन्नं स्वादुतां नयेत्।**

**एवं भावा रसाश्चैव भावयन्ति परस्परम्॥'** इति।

अस्याऽयमभिप्रायो वर्तते यत् प्रथमेन श्लोकेन भावशब्दस्यार्थोऽत्र प्रतिपादितः। ये वाचिकादिभिः नानाऽभिनयैः सम्बद्धान् सम्यग् बद्धान् हृदयं गतान् हृदये प्रविष्टान् रसान् भावयन्ति सम्पादयन्ति निष्पादयन्ति वा ते विभावानुभावव्यभिचारिणो भावयन्ति रसान् निष्पादयन्तिइति व्युत्पत्त्या भावशब्देनाऽत्र कथ्यन्ते । एते नाट्यस्य योक्तृभिः प्रयोक्तृभिर्नटैरवश्यं ज्ञेयाः सन्ति। एवमिह प्रथमश्लोकेन भावनं रसनिष्पादनं वा भावशब्दस्य प्रवृत्तिनिमित्तम् उक्तम्। एवं भावशब्दस्य प्रवृत्तिनिमित्तमभिधाय भावपदार्थः प्रकृते द्वितीयश्लोकेन योज्यते। यथा गुडादिभिर्नानाद्रव्यैः बहुविधैः अनेकप्रकारैर्दध्यादिव्यञ्जनैः व्यञ्जनम् यद् व्यज्यने नद् व्यञ्जनम् अनुपानादी रसो भाव्यते निष्पाद्यते तथा भावाः विभावानुभावव्यभिचारिणः बहुविधैरभिनयैः साक्षात्कारस्य प्रयोजकैर्वाचिकादिभिः अभिनयैः रसं भावयन्ति निष्पादयन्ति। एवं भावेभ्यो रसानाम् अभिनिर्वृत्तिर्भवति।'न भावहीनोऽस्ति रसः' इत्यादिपद्यद्वयेन भावरसयोः परस्परकृता सिद्धिः प्रतिपाद्यते। रसो

भावहीनः भावैः विभावादिभिः हीनो रहितो न भवति, यतो विभावादि विना रसस्य निष्पत्तिर्न संभवतीति प्रतिपादितम्। एवं रसवर्जितः रसेन रहितो भावः विभावादिर्न संभवति, यतो हि रसापेक्षयैव प्रमदादिषु विभावादिपदेन व्यवहारो भवति। लोके तु रससम्बन्धभावेन प्रमदादिषु कारणादिशब्दैरेव व्यवहारो भवति, न तु विभावादिशब्दैर्व्यवहारः । एवं रसो विभावादिव्यवहारसाधकत्वेन विभावादीनां निष्पादको भवति। इत्थम् अभिनये रससाक्षात्कारे सम्पन्ने प्रमदादिषु विभावादिव्यवहारो भवति। एवं सति विभावादीनां निष्पत्तौ रसनिष्पत्तिः, रसस्य निष्पत्तौ च विभावादिनिष्पत्तिरिति विभावादिरूपस्य भावस्य रसस्य च निष्पत्तोः परस्परकृता सिद्धिर्वस्तुतो दोषाय न भवति । अन्योन्याश्रितान्यपि हि कार्याणि भवन्ति। यथा दध्यादिरूपस्य व्यञ्जनस्य संयोगः अन्नस्य ओदनस्य स्वादुताम् रसवत्तां साधयति, अन्नम् ओदनश्चाश्रयरूपेण व्यञ्जनानां स्वादुतां साधयति, अन्नरहितं दधिचिञ्चादि हि स्वादु न भवति तथा भावाः विभावादयो रसान् भावयन्ति निष्पादयन्ति रसाश्च भावान् विभावादीन् भावयन्ति प्रमदादिषु विभावादिव्यवहारस्य योग्यतां साधयन्ति। एवम् अन्नव्यञ्जनयोर्यथा परस्परस्य स्वादुतायाः साधनं लोकप्रसिद्धं वर्तते तथा रसविभावाद्योः परस्परस्य निष्पादकता सिद्ध्यति । अन्योन्याश्रयत्वं तु दोषस्तत्र भवति यत्रैकस्मिन्नेव काले एकस्यैव कार्यस्य साधने द्वयोरपेक्षा भवति। यथैकदा यदि द्वे नावौ समुद्रे निमज्जतो द्वयोस्त्राणं चाभीष्टं भवति तदोभे नावौ परस्परं त्रातुं न प्रभवतः। एकस्या त्राणम् अपरस्याः त्राणम् आश्रयति। यत्र तु कालभेदो कार्यभेदश्च भवति तत्र परस्पराश्रयत्वं न दोषः। यथा पटापेक्षया तन्तवः पटस्य कारणं कथ्यन्ते तन्त्वपेक्षया पटः कार्यनुच्यते । एवं यदा तन्तुषु कारणव्यवहारो भवति तदैव पटे कार्यव्यवहारो नेति कालभेदो भवति । एवमेव कारणव्यवहारः कार्यव्यवहारश्चेति कार्यद्वयं विद्यते। अतः तन्तुपटयोः कार्यकारणव्यवहारयोः

परस्पराश्रयत्वं दोषो नास्ति । एवं विभावादिभी रसानां भावनं नाम निष्पादनं वर्तते, रसैर्विभावादीनां भावनं नाम कारणादिषु प्रमदादिषु विभावादिव्यवहारस्य साधनं भवति। एवं कार्यभेदो भवति। तथैव कालभेदोऽपि वर्तते। यदा रसस्तदा न विभावादिव्यवहारो भवति, यदा तु न रसस्तदाऽपोद्धारदृशा विभावादिव्यवहारो भवति। एवं रसविभावाद्योः तादृशं परस्परभावनं परस्परापेक्षमपि निर्देषं भवति। 'व्यञ्जनौषधिसंयोगो' इति कारिकायां प्रयुक्तम् 'अन्नम्' इति पदं प्रथमान्तं वर्तते । एतत् सर्वम् उक्तम् अभिनवभारत्याम् –

**'अभिनये साक्षात्कारे सम्पन्ने तदुपयोगितया विभावादिव्यपदेश इत्यतो या परस्परकृता सिद्धिः सा भद्रं भवेदिति संभाव्यते। एवम्भूतम् इतरेतराश्रयजं न दूषणमित्यर्थः। ... भावा रसान् भावयन्ति निष्पादयन्ति। रसास्तु भावान् भावयन्ति, भावान् कुर्वन्ति, भावादिव्यापदेश्यान् कुर्वन्तीत्यर्थः। एतदुक्तं भवति- एकत्र एकदा क्रियायाम् अन्योन्याश्रयत्वं दोषः, न तु क्रियाभेदे। यथा व्यञ्जनादिसंयोगेन अन्नस्य आह्लादिरसवत्ता क्रियते। अन्नेन च आश्रयरूपेण सता व्यञ्जनसुखयोग्यता क्रियते, एवं भावै रस्यमानता, रसैश्च विभावादिव्यपदेश्यता कारणादीनाम्। यथा पटापेक्षया तन्तवः पटकारणमिति व्यपदेश्याः, तन्त्वपेक्षया पटः कार्यः, न च इतराश्रयत्वम्, तथा प्रकृतेऽपि।**' इति।

उक्तविवेचनस्यायम् एव निष्कर्षो वर्तते यद् इह भावपदवाच्यैः विभावादिभिरेव रसानां निष्पादनं भवति, रसास्तु प्रमदादिषु कारणादिषु विभावादिव्यपदेशस्य कारणानि भवन्ति, रसान् एवापेक्ष्य कारणादिषु विभावादिपदेन व्यवहारो भवति। एवं रसैर्भावानाम् अभिनिर्वृत्तेः भावनस्य वाऽर्थो भवति कारणादिषु विभावादिव्यवहारस्य साधनम्। रसानां निष्पत्तिरूपा

भावनाऽभिनिर्वृत्तिर्वा भावैः विभानादिभिरेव भवतीति सिद्धान्तो वर्तते। विभावादिभी रसानां रसैश्च विभावादीनां तथा कालभेदेन पृथक्पृथग् भावनयोः परस्पराश्रयत्वं दोषो न भवति।

पुनरत्र प्रश्नो भवति यद यदि भावेभ्यः विभावादिभ्यो रसानां निष्पत्तिः स्वीक्रियते तदा 'न हि रसादृते कश्चिदर्थः प्रवर्तते' इति कथनं विरुद्धं भवति। अनेन हि रसं विना विभावादीनां सत्ता निषिध्यते, अत्र तु विभावादिभ्य एव रसानां निष्पत्तिरङ्गीक्रियते । किञ्च यदि विभावादिभ्य एव रसनिष्पत्तिर्यदि मन्यते तदा रसस्य विभावाद्यधीनत्वेन विभावादीनामेव सर्वप्रथमं वर्णनं नाट्यशास्त्रे करणीयम्। अस्य प्रश्नस्योत्तरं दातु भरतेनेदमुच्यते –

**'यथा बीजाद् भवेद् वृक्षो वृक्षात् पुष्पं फलं यथा।**

**तथा मूलं रसाः सर्वे ततो भावा व्यवस्थिताः॥'**

अस्य कथनस्याभिप्रायचो भवति यद् वस्तुतः प्रधानभूतानां रसानामेव सत्ता विभावादीनां सत्ता वर्तते, न तु विभावाद्यधीना रसा भवन्ति। यथा बीजे समग्रो वृक्षो लीनः सन्नेकीभूय तिष्ठति तथा रसे एव विभावादयो लीनाः सन्त एकीभूय तिष्ठन्ति । यथा मूल-शाखा-पुष्प-पत्र-फलादयो बीजे सूक्ष्मरूपेण तिष्ठन्ति तथा विभावादयो रसे । सामाजिकैः पश्चाद् अपोद्धारबुद्ध्या विभावादयो रसेभ्यः पृथक्तया गृह्यन्ते। अपोद्धारधियैव विभावादिभ्यो रसानां निष्पत्तिरभिधीयते । कविगता साधारणीभूता संविदेव रसो वर्तते। स एव काव्यद्वारा नटव्यापारस्य मूलं भवति । कविगतो रसो वृक्षस्य बीजमिव भवति, काव्यं वृक्ष इव भवति, अभिनयादिर्नटव्यापारः पुष्पवद् भवति, सामाजिके रसास्वादश्च फलमिव भवति। एवं बीजं वृक्षस्य तत्पुष्पफलादेश्च मूलभूतम् उपादानकारणं भवति तथा कविगतो रस एव सर्वस्य काव्यादेः। आनन्दवर्धनेनापि सुचितमिदं यत् कवे रसमयत्वे सर्वं रसमयमेव भवतीति। कवेः साधारणीभूतायां संविदि रसे विभावादय एकीभूता भवन्ति । विभावादयस्तु पश्चाद्

अपोद्धारधिया भासन्ते अतो वक्तुं शक्यते यद् यथा बीजादेव वृक्ष-पुष्प-फलानि भवन्ति तथा ततः रसाद् एव भावाः विभावादयो व्यवस्थिताः विशेषरूपेण अपोद्धारधिया पृथकत्वेन अवस्थिताः निर्धारिता भवन्ति। एवं सर्वेषां विभावादीनां मूलं रसा एव भवन्ति । उक्तमभिनवभारत्याम्- **'कविगतसाधारणीभूतसंविन्मूलश्च काव्यपुरःसरो नटव्यापारः। सैव च संवित् परमार्थतो रसः। सामाजिकस्य च तत्प्रतीत्या वशीकृतस्य पश्चाद् अपोद्धारबुद्ध्या विभावादिप्रतीतिः प्रयोजनं नाट्ये काव्ये सामाजिकधियि च। तदेवं बीजस्थानीयः कविगतो रसः। कविर्हिसामाजिकतुल्य एव। तत एवोक्तं 'शृङ्गारी चेत् कविः'इत्याद्यानन्दवर्धनाचार्येण। ततो वृक्षस्थानीयं काव्यम्। तत्र पुष्पादिस्थानीयोऽभिनयादिर्नटव्यापारः। तत्र फलस्थानीयः सामाजिकरसास्वादः। तेन रसमयमेव विश्वम्**' इति। एष एवाभिप्रायो वर्ततेऽस्य पद्यस्य ।

केचन व्याख्याकारा पद्यमिदं व्याख्यान्तो वदन्ति यद् बीजाद् वृक्ष इव भावाद् रसो भवति, अभिनयरूपैः कुसुमैः सुन्दराद् रसवृक्षात् फलवत् सामाजिकैर्भुज्यमानोऽतिमधुरो भावो भवति च । एवमादावन्ते च भावस्यैव वर्तमानत्वं तैरुक्तम्। एतद् व्याख्यानं प्रकृतविरुद्धं वर्तते ।

एवं रसभावोत्पत्तिविषये त्रयः पक्षा प्रोक्ताः। रसेभ्यो भावानाम् उत्पत्तिरित प्रथमः पक्षः। अयं कविगतेभ्यो रसेभ्य एव भावपदवाच्यानां विभावादीनाम् अपोद्धारधिया पृथक्करणं रसापेक्षयैव प्रमदादिषु विभावादिव्यवहारस्य निष्पत्तिश्चेति स्वीकारे युक्तः प्रतिभाति। भावपदवाच्येभ्यो विभावादिभ्य एव रसानाम् उत्पत्तिरिति द्वितीयः पक्षो वर्तते। इममेवाश्रित्य 'विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः' इत्यभिहितम्। अयमपि पक्षः संगच्छते, यतो हि प्रतीतेभ्यो भावपदेन बोध्येभ्यः प्रमदादिभ्य एव सामाजिके रसास्वादो

दृश्यते। रसेभ्यो भावानां भावेभ्यो रसानां चोत्पत्तिरिति तृतीयः पक्षो भवति। अयमपि कथितपक्षद्वयस्याश्रयणेन संभवति। एवं त्रयोऽपि पक्षाः समीचीना भवन्ति, किन्तु द्वितीय एव पक्षो रससूत्रप्रसङ्गे सिद्धान्तरूपेणात्र स्वीकृतः। इदम् '**एवं त्रयोऽपि पक्षाः कथञ्चिद् उपगता अभिप्रायवैचित्र्येणेति तात्पर्यम्**' इत्यभिनवभारतीवचनेन सिद्धं भवति।

'यथा बीजाद् भवेद् वृक्ष' इति श्लोकेन प्रतिपादिताया रसाद् भावव्यवस्थाया विषये बौद्धानां विज्ञानवादः, द्वैतवादः, वैयाकरणानां स्फोटवादः, सांख्यानां सत्कार्यवादः, अद्वैतवादश्चाश्रीयते। विज्ञानवादाश्रयेण रसो ज्ञानरूपो ज्ञानस्य विषयश्च मन्यते। विज्ञानवादे हि क्षणिकं विज्ञानमेव विषयोऽपि मन्यते। यथा विज्ञानमेव बौद्धविशेषमते घटपटादिविषयाकारेण भासते तथा रस एव विभावादिरूपेण। विज्ञानस्यैकारा विभावादयः सर्वं काव्यं नाट्यं चेति भावार्थः। स्फोटवादाश्रयेणाखण्ड एकोऽपि रसो विभावादिरूपेण शृङ्गारादिरूपेण च कल्पनया विभज्यते । द्वैतवादाश्रयेण रसविभावाद्योर्भेदः स्वीक्रियते। यथा न्यायादिदर्शने कार्यकारणयोर्भेदः तथात्रापि रसविभावाद्योर्भेदो मन्यते। यथा वैयाकरणमते अखण्डे स्फोटरूपे वास्तवे वाक्ये तदर्थे च प्रक्रियानिर्वादाय पदानां पदेषु प्रकृतिप्रत्यानां च पदार्थानां प्रकृतिप्रत्ययार्थानां च काल्पनिको विभागः क्रियते तथाऽत्रापि अखण्डे रसे विभावादिविभागः। यथा वाक्यादौ पदादयोऽसत्यभूताः तथा रसेऽपि विभावादयः। सांख्यानां सत्कार्यवादस्याश्रयणेन विभावादीनां सत्यत्वमपि स्वीकर्तुं शक्यते। यथा सांख्यैर्दुग्धादौ वर्तमानंदध्यादिरूपं कार्यं सत् स्वीक्रियते तथा विभावादिषु रसो रसे विभावादिश्च सन् मन्तुं शक्यते। अद्वैतवादमाश्रित्य रसोऽद्वैतोऽखण्डो वा मन्यते। यथा वेदान्तादौ ब्रह्मादिपदवाच्यं तत्त्वम् अद्वैतं ज्ञानरूपं च मन्यते तथाऽत्र रसतत्त्वमपि । यथा ब्रह्मणि जगत्पदार्था अध्यस्ताः कश्मीराद्वैतदर्शनानुसारेण परमेश्वरस्यैवाभासरूपा वा मन्यन्ते तथा विभावादयो रसेऽध्यस्ता

रसस्यैवाभासरूपा वा मन्तव्याः। यथा कश्मीरशैवदर्शनानुसारेण परमेश्वर एव स्वगतान् पदार्थान् आभासयति तथा रसोऽपि स्वगतान् विभावादीन्। एवमिहैतानि दर्शनान्याश्रितानि भवन्ति। अभिनवगुप्तो वदति यदा रसाद् विभावाद्याभिनिर्वृत्तौ यद् दर्शनं रोचते तद् योजनीयम्, अत्र विस्तरेण दर्शनविसिद्धान्तयोजनस्याऽवसरो नास्ति। इदम् '**अत्र च विज्ञानवादः, द्विधाभिधानम्, स्फोटतत्त्वम्, सत्कार्यवादः, एकत्वदर्शनमित्यादि च द्रष्टव्यम्। वयं तु प्रकृतानुपयोगिश्रुतलवदर्शनमिथ्याप्रयाससंश्रयम् अशिक्षितपूर्विणः**' इत्यभिनवभारत्यां स्पष्टम्।

संस्कृतालङ्कारगुणरीतिप्रस्थानेषु रसस्य नास्ति किमपि स्थानमिति साधारणतया मन्यते। तथापि एषु प्रस्थानेषु रसस्योल्लेखः प्रायशः प्राप्यते। आचार्येण भामहेन काव्यलक्षणनिरूपणे रस एव काव्यस्य प्रधानवस्तु इति स्वीकृतम्। रसविषये स पुनराह - **'रसैश्च सकलैः पृथक्'**। तेनोक्तम् - 'स्वादुकाव्यरसोन्मिश्रं शास्त्रमप्युपयुज्यते'। आचार्यो दण्डी रसशब्देन आस्वादनं बोधयति। तेनोक्तम्- 'येन माध्यन्ति धीमन्तो मधुनेव मधुव्रता'। आचार्यो वामनस्तु काव्यस्य गुणविशेषरूपेण रसं स्वीचार। सः गुणः कान्तिरिति। उद्भटः अलंकारसम्पृक्ततया रसस्यास्तित्वं स्वीकृतवान्।

आलंकारिकः आनन्दवर्धनो नाट्यरसमेव काव्यरसमिति मन्यते। धन्यालोकस्य लोचनटीकायाम् अभिनवगुप्त प्राह - 'शब्दसमर्प्यमानहृदयसंवादसुन्दरः विभावानुभावसमुचितप्राग्विनिविष्टरत्यादिवासनानुरागसुकुमारस्वसंविदानन्दचर्वणाव्यापारर स-नीयरूपो रसः'।[6] आत्मसंविदःप्रतीतिरेव रसः। रसस्य कोऽपि स्वरूपभेदो नास्ति। तत्रभवान् ध्वन्यालोककृद् उवाच - 'अद्भूतभोगात्मस्पन्दाविष्टस्य च मनःकरणं

---

[6]ध्वन्यालोकस्य वृत्तिः -१।४

रसोपलब्धिमात्रः तत्कालसारैः बोधितः’। सहृदयैः रसः अलौकिकरूपेण गृह्यते आस्वादप्रमाणत्वात्। रसस्य अन्यतरं लक्षणं कदाचित्कम्। आनन्दवर्धनेन तदीये ध्वन्यालोके रसविषये कथितं‘नास्त्येवदेवस्तु यदभिमतरसाङ्गतां नीयमानं न प्रसूनीभवति। अचेतनापि हि भावा यथायथम् उचितरसभावतया चेतनावृत्तान्तयोजनया वा न सन्त्येव ते ये यान्ति न रसाङ्गताम्।’[7]

भोजराजेणोक्तम् - ‘वक्रोक्तिश्च रसोक्तिश्च स्वभावोक्तिश्च वाङ्मयम्’।[8] विश्वनाथेन साहित्यदर्पणस्य तृतीय परिच्छेदे रसविषये कथितम् –

“विभावेनानुभावेन व्यक्तः सञ्चारिणो तथा।<br>
रसतामेति रत्यादिः स्थायिभावः सचेतसाम्”॥[9] इति।

व्यक्तोदध्यादिन्यायेन रूपान्तरपरिगतो व्यक्तिकृत एव रसः न तु दीपेन घट इव पूर्वसिद्धो व्यज्यते। स्थायिपदोपादानां रत्यादीनामपि रसान्तरेष्वस्थायित्वप्रतिपादनार्थम्। रसावस्हः परंभावः स्थायितां प्रतिपाद्यते।सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः रसः। अपि च वेद्यान्तरस्पर्शशून्यो ब्रह्मस्वादसहोदरो रसः। लोकोत्तरचमत्कारप्राणः स्वकारवदभिन्नत्वेनायमास्वाद्यते रसः। अर्थात् यथाअस्माद्भिन्नेऽपि स्वदेहः अहं स्थूल इत्यादिभेदोल्लेखाभावेन प्रतीयते, तथा रसोऽपि ज्ञातृज्ञानभेदोल्लेखाभावेनास्वाद्यते इत्यर्थः। प्रकाशशरीरात् संवित्स्वरूपां ज्ञानरूपतापन्न एव रत्यादिः सामाजिकानाम्आनन्दचमत्कारसम्बलमोपदेयत्वात् रस इति। रसे सारश्चमत्कारः सर्व्वत्राप्यनुभूयते। रस्यमानतामात्रसारत्वात् प्रकाशशरीरादन्य एव हिरसः।

[7] ध्वन्यालोकः – ३।४३
[8]सरस्वतीकण्ठाभरणम् – ५।८
[9] साहित्यदर्पणः – ३।१

रसविषये विश्वनाथस्य मनसि शङ्कैका उदेति -- ननु करुणादीनां रसानां दुःखमयत्वाद्रसत्वं न स्यादेति। तेनोक्तम् –

करुणादपि रसे जायते यत् परं सुखम्।

सचेतसामनुभवः प्रमाणं तत्र केवलम्।[10] इति

अस्याः शङ्कायाः निरसनाय तेनोक्तम् – न हि कश्चित् चेतनवान् आत्मनो दुःखाय प्रर्वत्तते। करुणादिषु च सकलस्यापि साभिनिवेशप्रवृत्तिदर्शणात् सुखमयत्वमेव। लौकिकशोकहर्षादिकारणेभ्यो लौकिकशोकहर्षादयो जायन्ते इति लोक एवप्रतिनियमः।तथापि पुणः काव्ये सर्वेभ्योऽपि विभावादिभ्यः सुखमेव जायते इति नियमादत्र कश्चिद् न दोषः।

भट्टलोल्लटेन रसविषये भणितं –“विभावैर्ललनोद्यानादिभिरालम्बनोद्दीपनकारणैः रत्यादिको भावो जनितः अनुभावैः कटाक्षभूजाक्षेपप्रभृतिभिः काय्यैः प्रतीतियोग्यकृतः व्याभिचारिभिर्निर्वेदादिभिः सहकारिभिरुपचितो मुख्यया वृत्त्या रामादावनुकार्यो तद् रूपतानुसन्धानात् नर्त्तकेऽपि प्रतीयमानो रस” इति। अपि चोक्तम् –

“कारणान्यथ कार्याणि सहकारीणि यानि च ।
रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः॥
विभावानुभावास्तत् कथ्यन्ते व्याभिचारिणः।
व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः”॥[11]

---

[10] साहित्यदर्पणः – ३।३

[11] काव्यप्रकाशः –चतुर्थ उल्लासः

मम्मटेनोक्तम् – सम्बन्धविशेषस्वीकारपरिहारनीयमानाध्यवसायात् साधारण्येन प्रतीतैः अभिव्यक्तः सामाजिकानां वासनात्मकतया स्थितः स्थायी रत्यादिको नियतप्रमातृगतत्वेन स्थितोऽपि साधारणोपायबलात् तत् कालविगलितपरिमितप्रमातृभाववशोन्मेषितवेद्यान्तरशून्यापरिमितभावेन प्रमात्रा सकलहृदयसंवादभाजा साधारण्येन स्वाकार एव अभिन्नेऽपि गोचरीकृतश्चाध्यमानतैकप्राणो विभावादिजीविताावधिः पानकरसन्यायेन चर्व्यमाणः पुरः एव परिस्फुरन् हृदयमेव प्रविशन् सर्वाङ्गीनमेवालिङ्गन् अन्यात् सर्वमेव तिरोदधद्ब्रह्मास्वादमिवानुभावयन् अलौकिकचमत्कारी रसः।

आलंकारिकेन जगन्नाथेन रसविषयेऽपि उक्तम्– प्रमृष्टपरिमितप्रमातृत्वादिनिजधर्मेण प्रमात्रा स्वप्रकाशतया वास्तवेन निजस्वरूपानन्देन सह गोचरीक्रियमाणः प्राग्विनिविष्टवासनारूपो रत्यादिरेर रसः।[12] नैयायिकाः रसप्रतीतये रसनाख्यां वृत्तिं स्वीकृतवन्तः।

**<u>रसभेदाः</u>**

सर्व्वे आलंकारिकाः रसमेव हि काव्यस्य मुख्योपजीव्यमिति कथयन्ति। रससंख्यानिर्णये आलंकारिकेषु मतभेदाः सन्ति। रसालोचनं भरतस्य नाट्यशास्त्रे प्रथममेव प्राप्तमिति सत्यं परंनन्दिकेश्वर एव रसस्य आद्याचार्यः इति - ‘रूपकनिरूपनीयं भरतः रसाधिकारिकं नन्दिकेश्वरः’। तेनोक्तम् –

[12] रसगङ्गाधरः – २।६

“शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।
वीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः”॥[13]

उद्भटस्तु रसस्य नवविधत्वमङ्गीचकार --

“शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।
वीभत्साद्भुतशान्ताश्च नव नाट्ये रसाः स्मृताः”॥[14]

आचार्यो जगन्नाथो भक्तिरसं दशमरसरूपेण स्वीकृतवान्। अष्टविधाः नाट्यरसाः सन्ति। काव्ये नव रसाः सन्ति। शान्तरसस्याभिनयायोग्यत्वात् नाट्यरसास्तु अष्टौ एव। शान्तस्य रोमाञ्चादिविरहेनाभिनेयत्वात् काव्यमात्रगोचरत्वमित्यभिधानान्नाट्य इत्युक्तम्।

## अद्भुतरसस्वरूपविवेचनम्

रससंख्याविषये ऐक्यमत्ये सति आलंकारिकेषु सारभूतरसविषये वैमत्यं दृश्यते। वैद्यनाथेन निगदितं - शृङ्गार एव सारभूतः रसः। तेनोक्तम् -‘शृङ्गारैको रसः’। विश्वनाथस्तु अद्भुतरसं मूलीभूतं रसं वदति। आचार्यस्य भरतस्य मतानुसारेण आदिरसाश्चत्वारः। यथा शृङ्गार-वीर-रौद्र-वीभत्साश्च। वीररसाज्जायते अद्भुतरसः।

“शृङ्गारादि भवेद्हास्यो रौद्राच्च करुणो रसः।
वीरच्चैवाद्भुतोत्पत्तिर्वीभत्साच्च भयानकः”॥

केचित् आलंकारिकाः अद्भुतरसः एव अपरेषां सकलरसानाम् उत्सः इति कथयन्ति। दर्पणकारेणोक्तं – ‘रसो लोकोत्तरचमत्कारप्राणः’। अत्र चमत्कारस्य अर्थः विस्मयः।

[13] नाट्यशास्त्रम् - षष्ठ्याध्यायः
[14]काव्यालङ्कारः – ४।४

तेनोक्तम्- 'चमत्कारश्चित्तविस्ताररूपो विस्मयपरपर्य्यायः'।[15] आलंकारिको नारायणः अद्भुतरसः एव रसः इति स्वीकृतवान्।

संस्कृतालंकारिकैः अद्भुतरसस्य भूयसी आलोचना कृता। नाटकेषु साधारणतया अयमद्भुतरसः अङ्गरसरूपेण विराजते। कालिदासस्य नाटकानि सामाजिकानां मनसि शृङ्गाररसस्य नाटकरूपेण प्रतिष्ठितानि। भवभूतिना विरचितम् उत्तररामचरितं नाटकं करुणरसप्रधानम्। उत्तररामचरितं नाटकं संस्कृतनाट्यसाहित्येषु विस्मयकरमवदानम्। कृष्णमिश्रस्य प्रबोधचन्द्रोदयं नाटकं शान्तरसप्रधानम्। श्रीहर्षस्य नागानन्दे नाटके शान्तरसस्य प्राधान्यं दृश्यते। शूद्रकस्य मृच्छकटिकं शृङ्गाररसस्य प्रकरणम्। विशाखदत्तस्य मुद्राराक्षसं वीररसप्रधानम्। नाट्यतत्त्वानुसारतः शृङ्गार-करुण-हास्य-वीररसाः अङ्गिरसरूपेण संस्कृतनाटकेषु विराजन्ते। एतत्सत्त्वेऽपि संस्कृतनाट्यतत्त्वे अद्भुतरसस्य विशिष्टं स्थानं दृश्यते। भरत-धनञ्जय-विश्वनाथ-प्रमुखाः आलंकारिका रसस्यास्य गुरुत्वं स्वीकुर्वन्ति। ते मन्यन्ते 'कार्यं निर्वहणेऽद्भुतम्'। अर्थात् नाटकस्यान्ते अद्भुतरसस्यावस्थितिः नाट्यकौशलदृष्ट्या आवश्यको निर्देशः। परन्तु अद्भुतरसमङ्गीकृत्य किमपि नाटकं न रचितम्। अतएव अस्मिन् गवेषणासन्दर्भे संस्कृतनाटके अद्भुतरसस्य स्थाननिर्देशः परिकल्प्यते।

अग्निपुराणे अतिशयत्वेनार्थदर्शनकारणात् चित्तस्य विस्तारोऽद्भुतो रसः कथ्यते। वीरत्वेनाद्भुतरसस्य निष्पत्तिर्भवति। अग्निपुराणे दृश्यते - "वीराच्चाद्भुतनिष्पत्तिः"[16]। अपि च दृश्यते - "विस्मयोऽतिशयेनार्थदर्शनाच्चित्तविस्मृतिः"[17]।

---

[15] साहित्यदर्पणः – तृतीय परिच्छेदः

[16]अ.पु. ३३९।८

[17]अ.पु. ३३९।१५

अलंकारशास्त्रस्य आद्याचार्यो भरत इति। तस्य ग्रन्थस्य नाम नाट्यशास्त्रम्। बीभत्सस्य निरूपणाद् अनन्तरं क्रमप्राप्तस्य अद्भूतस्य स्वरूपम् **'अथ अद्भूतो नाम विस्मयस्थायिभावात्मकः'** इति कथितम्। साधारणो विस्मयरूपः स्थायी भावोऽद्भूतरस इति कथनस्यास्य तात्पर्यं विद्यते। तेनोक्तम् यत् - **'स च दिव्यदर्शन-ईप्सितमनोरथावाप्ति-उत्तमभवनदेवकुलाभिगन-सभा-विमान-माया-इन्द्रजालसाधनादिभिः विभावैः उत्पद्यते। तस्य नयनविस्तार-अनिमिषप्रेक्षण-रोमाञ्च-अश्रु-स्वेद-हर्ष-साधुवाद-प्रदानप्रबन्ध-हाहाकार-बाहु-वदन-चेल-अङ्गुलिभ्रमणादिभिः अनुभावैः अभिनयः प्रयोक्तव्यः। व्यभिचारिभावाः च अस्य अश्रु-स्तम्भ-स्वेद-गद्गद-रोमाञ्च-आवेग-संभ्रम-जडता-प्रलयादयः इति ।'** दिव्यानाम् गन्धर्वादीनां दर्शनम्, ईप्सितस्य प्राप्तुं शक्यस्य, मनोरथस्य प्राप्तुम् अशक्यस्य च वस्तुनः, अवाप्तिः प्राप्तिः, उत्तमे भवने देवकुले देवालये चाऽभिगमनम्उत्तमभवनादौ गत्वा तत्रत्योत्तमशिल्पादिदर्शनम्, सभा मयदानवादिरचितो युधिष्ठिरादिसम्बन्धी गृहविशेषः, विमानम्दिव्यरथः, अर्थाद् देवादिसम्बन्धि आकाशयानम्, माया स्वं रूपं परित्यज्य रूपान्तरस्य धारणम् अर्थाद् रूपपरिवर्तनम्, इन्द्रजालम् मन्त्रेण द्रव्यवस्तूनां संयगोविशेषेण च असंभवतो रात्रौ सूर्यादेः प्रदर्शनं चैतानि यानि सन्ति तेषां साधनादीनि एवमादीनि लोकोत्तराणि वस्तूनि अद्भूतस्य विभावाः सन्ति। दिव्यगन्धर्वादिदर्शनादिरूपैर्विभावैः अद्भूतरस उत्पद्यते। नयनयोर्विस्तारः, अनिमेषं प्रेक्षणम् विलोकनम्, रोमाञ्चः, अश्रु, स्वेदः, हर्षः हर्षस्य मुखविकासादिरूपं कार्यम्, साधुवादः'साधु साधु' इत्युच्चारणम्, प्रदानप्रबन्धः प्रदानस्य प्रकर्षेण दानस्य प्रबन्धः सातत्यं निरन्तरता वा, हाहाकारः'हा हा' इति शब्दस्योच्चारणम्, बाह्वोः भुजयोः वदनस्य मुखस्य, अङ्गुलेः, चेलस्य= वस्त्रस्य च भ्रमणादीनि एवमादयः पदार्था अद्भूतसानुभावा

भवन्ति। अत एवे कविनाऽद्भूतस्य व्यक्तये वर्णनीया नटेनाभिनेयाश्च। अद्भूतस्य व्यभिचारिणः अश्रु-स्तम्भ-स्वेद-गद्गद-रोमाञ्चरूपाः सात्त्विकभावाः, आवेगः संभ्रमः मोहः, जडता, प्रलयश्चैवमादयो भवन्ति। एते विभावादयो भरतेनैवं निर्दिष्टाः -

अत्रानुभावे गणितौ अश्रु-स्वेदौ नयनादिजलरूपौ विस्मयस्य कार्यभूतौ स्तः। व्यभिचारिषु गणितास्तु अश्रुप्रभृतय आन्तरा नयनजलादेः कारणभूताः सात्त्विकभावाः सन्ति। सात्त्विकेषु व्यभिचारित्वपि भवतीति पूर्वं प्रतिपादितमेव। अनुभावगणने गृहीतेन हर्षेण हर्षस्य मुखविकासादयः कार्यरूपा अनुभावा एव गृह्यन्ते। अन्यथा हर्षस्य व्यभिचारित्वेनानुभावे गणनं विरुद्धं भवेत्। एवमद्भूतस्योक्तं स्वरूपं प्रतिपाद्य भरतस्तत्र प्रमाणरूपेण गुरुशिष्यपरम्परायां प्रसिद्धे द्वे आर्ये एवं वदति –

अत्रानुवंश्ये आर्ये भवतः –

"यत् त्वतिशायार्थयुक्तं वाक्यं शीलं च कर्मरूपं च।
एभिः त्वर्थविशेषो रसोऽद्भूतो नाम विज्ञेयः॥
स्पर्शग्रहोल्लुकसनैर्हाहाकारैश्च साधुवादैः।
वेपथुग्दगदवचनैः स्वेदाद्यैरभिनयस्तस्य॥"[18]

अत्र प्रथमयाऽऽर्यया अद्भूतस्य विभाव उक्तः। अस्याः प्रथमाया आर्याया अयमभिप्रायो वर्तते- योऽतिशेते अन्यापेक्षयोत्कृष्टो भवति सोऽतिशय उच्यते। एवम् अतिशयशब्दस्यार्थ उत्कर्षो भवति। अतिशयेन युक्तः सातिशय उच्यते। एवं सातुशयशब्दस्य फलितोऽर्थ उत्कृष्टो भवति। एवं सातिशयेन उत्कृष्टेन अर्थेन युक्तं वाक्यम् अर्थाद् उत्कृष्टस्यार्थस्य प्रतिपादकं वाक्यम्, शीलम्, कर्म, रूपम् सौन्द्र्यं च यद् भवति तौरद्भूतरसो भवतीत्यर्थो भवति। उत्कृष्टं

[18]ना.शा. ६।९५ (वरोदासंस्करणम्, १म खण्डः पृः २३०)

व्कायशीलकर्मरूपादिकं यद् यद् भवति तत् सर्वम् अद्भूतस्य विभावो भवति। अभिनवभारत्यनुसारेण प्रथमायाम् आर्यायाम् ‘यद् वाक्यं यच्च शिल्पं कर्मरूपम्’ इति पाठः प्रतिभाति। तदनुसारेणोत्कृष्टं वाक्यं कर्मरूपम् प्रशस्तं कर्मस्वरूपं शिल्पं चाद्भूतस्य विभाव इत्यर्थो भवति। कर्मरूपमित्यत्र प्रशंसायां रूपम् प्रत्ययो वर्तते। एवं सातिशयं सर्वं वस्तु अद्भूतस्य विभावो भवतीति प्रथमाया आर्याया अर्थो भवति। द्वितीययाऽर्ययाऽद्भूस्यानुभाव उच्यते। तस्याद्भूतरसस्याभिनयः स्पर्शग्रहोल्लुकसनैः स्पर्शस्य ग्रहैः उल्लुकसनैः, हाहाकारैः‘हा हा’ इति शब्दस्य करणैः साधुवादैः‘साधु साधु’ इति शब्दस्योच्चारणैः वेपथुना कम्पेन गद्गदवचन-स्वेदप्रभृतिभिरनुभावैः कर्तव्य इत्यर्थो भवति। अत्र स्पर्शशब्द उल्लुकसनशब्दश्च पारिभाषिको वर्तते। अस्यार्थो भवति नेत्रयोरीषत्संकोचं भ्रुविक्षेपं च कृत्वा स्कन्धयोः कपोलयोश्च स्पर्शः। अङ्गस्य आनन्देन सहोर्ध्वं आनन्देन धूननम् कम्पनम् उल्लुकसनं कथ्यते। स्पर्श उल्लुकसनं चैवम् अभिनयविशेषौ स्तः। अपि च, नाट्यशास्त्रे दृश्यते अद्भुतरसप्रसङ्गे –

“स्पर्शग्रहोल्लुकसनैर्हाहाकारैश्च साधुवादैश्च।
वेपथुगदगदवचनैः स्वेदाद्यैरभिनयस्तस्य”॥[19]

अपि च -

“दिव्यश्चानन्दजश्चैव द्विधा ख्यातोऽद्भुतो रसः।
दिव्यदर्शनजो दिव्यो हर्षादानन्दजः स्मृतः”॥[20]

---

[19]ना.शा. ६।९६ (वरोदासंस्करणम्, १म खण्डः)
[20]ना.शा. ६।१०२ (वरोदासंस्करणम्, १म खण्डः)

आर्यायां 'स्पर्शग्रहोल्लुकसनैः' इत्यत्र बहुवचनेन स्पर्शस्योल्लुकसनस्य च प्रकृतिभेदेन नाना भेदाः सूच्यन्ते। एवं द्वितीययाऽऽर्यया स्पर्शोल्लुकसनादयोऽद्भूतस्यानुभावाः प्रतिपादिताः। एवं भरतेनाद्भूतो रसः सप्रमाणं निरूपितः। दिव्यदर्शनादिना विभावेन नयनविस्तारादिणानुभावेन अश्रुस्तम्भादिरूपेण व्यभिचारिणा च साधारण्येन प्रतीयमानो विस्मयः स्थायी भावोऽद्भूतो रस उच्यत इति सारं विद्यते।

परवर्तिनिकाले अद्भुतरसविषये स्पष्टतया कथितमाचार्यधनञ्जयेन। तस्य ग्रन्थस्य दशरूपकमिति विदितम्। ग्रन्थेऽस्मिन् तेन उक्तम् –

"अतिलोकैः पदार्थैः स्याद् विस्मयात्मा रसोऽद्भुतः"।[21]

"कर्मास्य साधुवादाश्रुवेपथुस्वेदगद्गदाः।
हर्षावेगधृतिप्राया भवन्ति व्यभिचारिणः"॥[22]

ग्रन्थस्य टीका तावद् अवलोकः। तत्र दृश्यते लोकसीमातिवर्तिपदार्थवर्णादिविभावितः साधुवादाद्यनुभावपरिपुष्टो विस्मयस्थायिभावोहर्षावेगादिव्यभिचारिभावो रसोऽद्भुतः। तत्र उदाहरणं दृश्यते –

दोर्दण्डाञ्चितचन्द्रशेखरधनुर्दण्डावभङ्गोद्धत-
ष्टङ्कारध्वनिरार्य वालचरितप्रस्तावना डिण्डिमः।
द्राकपर्याप्तकपालसंपुटमिलद्ब्रह्माण्डभाण्डोदर –
भ्राम्यत्पिन्डितचन्डिमा कथमसौ नद्यापि विश्राम्यति॥[23]

अतिलोकपदार्थदर्शनादिजन्मना विस्मयेनाद्भुतः साधुवादादिभिरनुभावितो हर्षावेगादिभिः व्यभिचारिभिः प्रकृष्टः अद्भुतात्मा रसो भवतीत्यर्थः।

[21] द.रू.- ७८ श्लोकः
[22] द.रू.- ७९ श्लोकः
[23] महा.च.- १।५४

खृीष्टीयनवमशतकस्यालंकारिकः रुद्रटाचार्यः तस्य काव्यालंकारे ग्रन्थे अद्भुतरसविषये सामान्यतया आलोचना कृता। रुद्रटाचार्येण मुख्यतः अलंकारस्य विस्तृता समीक्षा कृता परन्तु रसविषये पाण्डित्यपूर्णा आलोचना दृश्यते अस्माभिः ग्रन्थेऽस्मिन्। अद्भुतरसविषये तेनोक्तम् -

"स्यादेष विस्मयात्मा रसोऽद्भुतो विस्मयोऽप्यसंभाव्यात्।
स्वयमनुभूतादर्थादनुभूयान्येन वा कथितात्"॥[24]

"नयनविकासो वाष्पः पुलकः स्वेदोऽनिमेषनयनत्वम्।
संभ्रमगदगदवाणी साधुवचांस्युत्तमे सन्ति"॥[25]

अत्र सुगमम् इत्यत्र न वरम्। विस्मय इति स्थायिभावः। विभावश्चासंभावि। अनुभावो नयनविकासादिः।

सागरनन्दिनातस्यनाटकलक्षणरत्नकोषाख्यग्रन्थे नाट्यशास्त्रमतानुसारतः अद्भुतरसस्य आलोचना कृता। तत्र तेनोक्तम् –

अद्भुतो विस्मयस्थायिभावप्रभव उच्यते।
प्रसादोद्यानशैलादिगमनैर्दिव्यदर्शनैः।
सभाविमानमायेन्द्रजालशिल्पादिदर्शनैः।
हृदयेप्सितलाभैश्च विभावैस्तस्य सम्भवः॥
दन्तलोचनविस्तारप्रसादोपगमादिभिः।
रोमाञ्चस्वेदहर्षाश्रुसाधुवादैश्च दर्शयेत्॥
स्तम्भाश्रुस्वेदरोमाञ्चगद्गदालापसम्भ्रमाः।

---

24. का. लङ्का- १५ नं अध्यायः १नं श्लोकः

25. का. लङ्का- १५ नं अध्यायः १०नं श्लोकः

जड़ताप्रलयाद्याश्च भावा स्युर्व्यभिचारिणः॥ [26]

परवर्तिनिकाले एकादशख्रीष्टाब्दे आलंकारिकेन मम्मटाचार्येण तदीये काव्यप्रकाशे ग्रन्थे अद्भुतरसविषये सविमर्षम् आलोचना कृता। तेनोक्तम् - 'विस्मयस्थायिभावको विस्मयजनककर्मकर्त्रालम्बनकोविस्मयकर्माद्युद्दीपितश्चकिताद्यनुभावितो हर्षादिसंचारितोऽद्भुतः।'[28]

अस्मिन् रसविषये उदाहरणं तेन दीयते –

"चित्रं महानेष बतावतारः क्व कान्तिरेषाऽभिनवैव भङ्गिः।
लोकान्तरं धैर्यमहो प्रभावः काव्यकृतिर्नूतन एष सर्गः॥"

वामनमुद्दिश्य वलेरुक्तिरियम्। अत्र चित्रादिशब्दाः भङ्गिभेदेन समभिव्याहृतपदार्थस्य तदवच्छेदकस्य वा लोकोत्तरमहिमत्वप्रतिपादकाः, न तु विस्मयार्थकाः, तस्यात्र स्थायितया वाच्यतादोषापत्तेः। तथा च महान् महात्म्यशील एष पुरुषः चित्रं लोकोत्तरं वस्त्वितिसंबन्धः। माहात्म्यविशिष्टेऽन्वितस्य लोकोत्तरत्वस्य विशेषणे माहात्म्ये पर्यवसानम्। वतावतार इति अत्रापि एष इति मध्यमणिन्यायेन संवध्यते। एषोऽवतारः सदाचारप्रवर्त्तकः, वतेति हर्षः। एषा दृश्यमाना कान्तिः क्व, न क्वापीति भङ्ग्यन्तरेण लोकोत्तरेत्युक्तं भवति। भङ्गिः गमनोपवेशनदर्शनादिगतप्रकारविशेषः अभिनवैव अपूर्वैव इति। एवङ्कारेण वैलक्षण्यं व्यङ्ग्यम्। यद्वा विलक्षणैवेत्यर्थः वैलक्षण्यगतमात्यन्तिकत्वमेवकारार्थः। धैर्येविरोधिसहस्रैरपि अचलचित्तत्वं लोकोत्तरंलोकविलक्षणम्। प्रभावः सामर्थ्ये सकलवशीकरणम् अहो अलौकिकः। आकृतिः अवयवसंस्थानं कापि अनिर्वचनीया। एष सर्गः निर्माणं नूतनः प्रसिद्धब्रह्मसर्गविलक्षणः। अत्र वामन आलम्वनम्, कान्तिगुणातिशयादिः उद्दीपनम्,

26. नाटकलक्षणः रत्नाकोषः।

स्तवादयोऽनुभावाः, मतिधृतिहर्षादयोव्यभिचारिणः, विस्मयः स्थायिभावः, अभिज्ञे सामाजिके विस्मयप्रकृतिकोऽद्भुतो रसो व्यज्यते एवं विभावादयो भावादिष्वपि भाव्याः।[27]
विस्मयश्चित्तविस्तारो वस्तुमाहात्म्यदर्शनात्। तस्मात् जायते अद्भुतो रसः।

अस्मिन् समये आगतः आलंकारिकः भोजराजः। तेन शृङ्गाररसस्य व्याख्या प्रधानत्वेन कृता। किन्तु अद्भुतरसस्यापि विवेचनमपि तेन कृतमेव। अद्भुतरसविषये तेनोक्तम्-

एतेन वीरकर्मापि न भवेदद्भुतो रसः।
हेतुत्वं तु तदुपत्तौ तस्यापि न निवार्यते॥[28]

परवर्तिनिकाले द्वादशशताव्द्याः अपर आलंकारिकः तावद् हेमचन्द्रः। तस्य ग्रन्थः काव्यानुशासनमिति। तेन काव्यानुशासने ग्रन्थे द्वितीयाध्याये नवरसानां वर्णना कृता। तत्र अद्भुतरसस्य स्थायिभावो विस्मयो निगदितः। तेनोक्तम् - 'दिव्यदर्शनादिविभावो नयनविस्ताराद्यनुभावो हर्षादिव्यभिचारी विस्मयोऽद्भुतः'[29]। दिव्यदर्शनेप्सितमनोरथाव्याप्त्युपवनदेवकुलादिगमनसभाविमानमाहेन्द्रजालातिशायिशत्यकर्मादिविभावोनयनविस्तारानिमेषप्रेक्षणरोमाञ्चाश्रुस्वेदसाधुवाददानहाहाकारचेलाङ्गुलिभ्रमणाद्यनुभावो हर्षवेगजडतादिव्यभिचारी चित्तविस्तारात्मा विस्मयः स्थायिभावश्चर्वर्नीयतां गतोऽद्भुतो रसः। यथा –

कृष्णेणाम्व गतेन रन्तुमधुना मृद्भक्षिता स्वेच्छया,
सत्यं कृष्ण, क एवमाह, मुशली मिथ्याम्व पश्याननम्।
व्यादेहीति विकाशिते शिशुमुखे माता समग्रं
जगद्दृष्ट्वा यस्य जगाम विस्मयपदं पायास्त वः केशवः॥

[27]उद्द्योतटीका (नागोजीभट्टकृता)
[28]शृ.प्र.
[29]का.नु.- २य अध्यायः

अलंकारशास्त्रस्य अपर आलंकारिकः विद्यानाथः। तस्य आर्विभावकालः द्वादशशताव्द्याम् इति केचित् मन्यन्ते। तस्य रचना प्रतापरुद्रीयम्। विद्यानाथेन पूर्वसंदर्शनेन चित्तविस्तारेण सम्बन्धो विस्मयभावोत्पन्नाद्भूतरसस्य लक्षणाणि समुल्लिखितानि। तस्योदाहरणाणि च प्रदत्तानि। तेनोक्तम् - 'अपूर्वार्थदर्शनाच्चित्तविस्तारो विस्मयः'। यथा –

औन्नत्यं महदन्यदेव महितः कोऽप्येष्याम्भीरिमा-
काप्यन्या सरणिः प्रतापयशसोरन्यैव वाह्योः प्रथा।
सर्वं नूतनमेव रुद्रनृपतेर्जाने न तन्निमित्तौ
सामग्री चतुरानेन कियती कीदृक्क्रमाकल्पिता॥

नाट्यशास्त्रीयं ग्रन्थं 'नाट्यदर्पणं' रामचन्द्रगुणचन्द्रौ विरचितवन्तौ। विवेकचतुष्टयमस्ति अस्य ग्रन्थस्य। ग्रन्थेऽस्मिन् द्वादश रूपकानि आलोचितानि। तेषु तृतीयविवेकेषु अद्भुतरसविषये आलोचना दृश्यते। तेनोक्तम् –

दिव्येन्द्रजालरम्यार्थदर्शनाभीष्टसिद्धितः।
अद्भुतः सोऽभिनेतव्यः श्लाघारोमाञ्चहर्षतः ॥[30]

दिव्याः शक्रादयः। इन्द्रजालं मन्त्रद्रव्यहस्तयुक्त्यादिनाऽसम्भवाद् वस्तुदर्शनम्। रम्यः सातिशयत्वेन हृद्योऽर्थः शिल्पकर्म रूपवाक्यगन्धरसस्पर्शनृत्तगीतादिकस्तस्य दर्शनं साक्षात्कारः। अनेन स्वयं कीर्त्तनं श्रवणं च गृह्यते। अभीष्टमत्यन्तमीप्सितम्। तस्य सिद्धिः प्राप्तिर्निष्पत्तिर्वा। एवमादिभ्यो विभावेभ्यो विस्मयस्हाय्यद्भुतो रसो भवति। हर्षेण स्वानुभावाः सूच्यन्ते। एभिर्नयनविस्तारः गात्रोल्लुकसनानिमिषप्रेक्षणचेलाङ्गुलिभ्रमणः

---

[30]ना.द.- ३य विवेकः १।२।१

गद्गदवचनवेपथुस्वेदादेरनुभवस्य ग्रहः। व्यभिचारिणः च अस्य आवेगजड़तासम्भ्रमस्तम्भाश्रुगद्गदरोमाञ्चदय इति।

शरदातनयेन अद्भुतरसोऽद्भुतैश्वर्यभावयुक्तविचित्रितापूर्णविचित्राकृतिवेषाद्यालम्बन-विभावैर्निगद्यते। रोमाञ्चस्तम्भस्वेदादयोऽद्भुतरसे भावा भवन्ति। विस्मयेनायं रसो भवति। रोमाञ्चस्वेदादयः सात्त्विकभावा अनुभावा विस्मयात्मसंयुक्ता भवन्ति। विमानोद्यान-भवनसभादिदर्शनैरसंभावोत्पत्तिदर्शनैरुद्धसमागमादिविभावैरुत्पद्यतेऽद्भुतरसः। तेनोक्तम् –

सदानुभूयमाना ये हृदि वैचित्र्यकारिणः।
भावाश्चित्रा इति ज्ञेयस्तेऽद्भुतैश्वर्यभावकाः॥[31]

अपि च –

विचित्राकृतिवेषाश्च विचित्राचारविभ्रमाः।
अद्भुतालम्वना भावा मायालीलाविलासिनः॥[32]

अपि च –

हर्षगर्वस्मृतिमतिश्रमा धृतिमदावपि।
तर्को विवोधश्चिन्ता च रोमाञ्च स्तम्भवेपथु।
स्वेदश्चेद्भुते भावाः कथिता नाट्यकोविदैः॥[33]

अपि च –

अद्भुतस्याप्यधिष्ठानं नानाशिल्पात्मिकैव धीः॥
ब्रह्मणः सेयमस्तीति सोऽयमस्याधिदैवतम्।
विचित्रा यस्य भवति चित्तवृत्तिस्ततोऽद्भुतः॥[34]

---

[31]भाव प्रः, १म अधिः, पृः ५
[32]भाव प्रः, १म अधिः, पृः ६
[33]भाव प्रः, १म अधिः, पृः ६
[34]भाव प्रः, १म अधिः, पृः ७

अपि च –

विस्मयात्मा भवत्येव समप्रकृतिरद्भुतः॥
कर्मणोऽतिशयान्नृणामीप्सितार्थोपसङ्गमात्।
मनोरथफलप्राप्तेर्दिव्यभावावलोकनैः॥
विमानोद्यानभवनसभारमावलोकनैः।
विरुद्धानां पदार्थानामाविरुद्धसमागमैः॥
असम्भाव्यस्य चार्थस्य सम्भवोऽपत्तिर्दर्शनैः।
अदेशकालसम्पत्तैरभीष्टादेरचिन्तितम्॥
इत्यादिभिधिभावैस्तैरद्भुताख्या रसो भवेत्।
स्तम्भवेपथुरोमाञ्चस्वरसादाश्रुनिर्गमाः।
सञ्चारिणोऽपि तस्य स्युर्ये शृङ्गारोपयोगिनः।[35]

एवञ्च उक्तम् –

ध्यानं नयनविस्तारः प्रसादो वदने दृशि।
आनन्दाश्रु सरोमाञ्चमनिमेषावलोकनम्॥
अनिश्चलत्वं मनसो यस्मात्तन्मानसोऽद्भुतः।
चेलाङ्गलीनां भ्रमणमुथ्थायो वल्गनम्॥
दानप्रवन्धो नटनमाश्लेषश्च परस्परम् ।
परस्परस्य भुजयो परस्परतलाहतिः॥
एवमादिविकारो यः स भवेदाङ्गिकोऽद्भुतः।
हाहाकारः साधुवादः कपोलास्फालनध्वनिः॥
उच्चैर्हासो हर्षघोषैः गीतमुच्चावचं वचः॥
एवमादिर्वकारो यः स भवेद्वाचिकोऽद्भुतः॥[36]

[35]भाव प्रः, १म अधिः, पृः ७
[36]भाव प्रः, १म अधिः, पृः ८

अलंकारशास्त्रस्य नवाध्यायः सूचितः चतुर्दशखीष्टाब्दे। समयेऽस्मिन् आलंकारिकः विश्वनाथः अन्यतमः। तस्य ग्रन्थः 'साहित्यदर्पण' इति। ग्रन्थोऽयं दशमपरिच्छेदेन समाप्तः। ग्रन्थस्य तृतीये परिच्छेदे तेन रसविषये विस्तृता आलोचना कृता। अद्भुतरसविषये सूक्ष्मरूपेण तेन स्वमतं प्रकाशितम्। तेनोक्तं –

अद्भुतो विस्मयस्थायिभावो गन्धर्व्वदैवतः।
पीतवर्णो वस्तु लोकातिगमालम्बनं मतम्॥
गुणानां तस्य महिमा भवेदुद्दीपनं पुनः।
स्तम्भः स्वेदोऽथ रोमाञ्चगद्गदस्वरसंभ्रमाः॥
तथा नेत्रविकाशाद्या अनुभावाः प्रकीर्त्तिताः।
वितर्कावेगसंभ्रान्तिहर्ष्याद्या व्यभिचारिणः॥[37]

अद्भुतरसः विस्मयः स्थायीभावो यस्य सः। गन्धर्वो दैवतं देवतास्येति गन्धर्वदैवतः, गनादिना विस्मयोत्पादनं गन्धर्वैः क्रियते इति पुराणादिषु प्रसिद्धमित्येवधेयम्। 'अद्भुतो ब्रह्मदैवत' इति भरतोक्त्या तु 'ब्रह्माधिदैवतः' इति पाठो भवितुं युक्तः। पीतवर्ण इत्यर्थः गन्धर्वाणां पीतवर्णत्वादेवायमपि पीतस्वरूपः लोकातिगमं लोकं संसारमतिगच्छत्यतिक्रामतीति तादृशं लोकोत्तरमलौकिकमिति यावत्, इन्द्रजालिकं वस्तु आलम्बनं मतम्। तस्य लोकातिवस्तुनि गुणानां महिमा गुणमहत्त्वं पुनरुद्दीपनं भवेत्। स्तम्भो जाड्यमयम् स्वेदः, रोमाञ्चः, गद्गदस्वरः सम्भ्रमो वेगः च इमे तथा नेत्राविकाशः, आद्यपदात् निमेषरहितावलोकनादयश्च अनुभावाः प्रकीर्त्तिताः कथिताः। वितर्कः, आवेगः सम्भ्रान्तिर्जडत्वम्, हर्ष आद्यपदात् औत्सुक्यादयश्च व्यभिचारिणो भवेयुः। तथा च विस्मयस्थायिभावको विस्मयजनकः कर्त्राद्यालम्बनको विस्मयकर्माद्युद्दीपितः स्तम्भाद्यनुभावितो वितर्कादिसञ्चारितोऽद्भुतो रसः। उदाहरणं यथा-

[37]सा.द. ३।२०७

दोर्दण्डाञ्चितचन्द्रशेखरधनुर्दण्डावभङ्गोद्यत-
ष्टंकारध्वनिरार्थ्यवालचरितप्रस्तावनाडिण्डिमः।
द्राक्पर्यस्तकपालसंपुटमिलद्ब्रह्माण्डोदर-
भ्राम्यत्पिण्डितचण्डिमा कथमहो नाद्यपि विश्राम्यति॥[38]

महावीरचरिते रामेण धनुंषि भग्ने सति दीर्घकालव्यापकेन हरधनुष्टङ्कारेण विस्मयापन्नस्य लक्ष्मणस्योक्तिरियम्। दोर्दण्डाभ्यां भुजदण्डाभ्यं 'भुजबाहुप्रवेष्टो दोः' इत्यमरः, अञ्चित आकृष्टो यश्चन्द्रशेखरस्य महेशस्य धनुर्दण्डस्तस्य अवभङ्गाय द्विखण्डीकरणाय उद्यत उत्थितः, आर्यस्य श्रीरामचन्द्रस्य बालचरितानां प्रस्तावनायाम् उपक्रमे डिण्डिमो वाद्यभेदः। टङ्कारध्वनिः अत्र दण्डद्विरुक्त्या पुनरुक्तत्वं दोषः, द्राक् झटिति पर्यस्तो विक्षिप्तः कपालसंपुट ऊर्द्धकाटाहः कटाहः पिधानपात्राकारब्रह्माण्डोपरिभाग इति यावत् तेन मिलनसङ्गच्छमानं ब्रह्माण्ड एव भाण्डं स्थाल्यादिवत् पात्रं तस्य उदरे अभ्यन्तरे भ्राम्यन् अतएव पिण्डितः स्तुपीकृतो बहुलीकृत इति यावत् चण्डिमा प्रखरता यस्य स तथोक्तः सन् कथमद्यापि इदानीमपि न विश्राम्यति न विरमति शरावच्छन्नमुखस्थालीमध्ये उत्पाद्यमानः शब्दो बहुलो भवत्यभिप्रेत्येदम् इत्यहो महदाश्चर्यम्।

परवर्तिनिकाले अपर आलंकारिकः भानुभक्तः। तस्य ग्रन्थः रसतरङ्गिनीति। ग्रन्थेऽस्मिन् अद्भुतरसविषये सामान्यतया तेन आलोचना कृता। विस्मयस्य सम्यक्समृद्धिरद्भुतः, सर्वेन्द्रियाणां तटस्थ्यंवा। वर्णः अस्य पीतो, दैवतं ब्रह्मा। स च स्वनिष्ठः परनिष्ठश्च। स्वनिष्ठो यथा-

[38]सा.द. ३य परिच्छेदः

लीलानिबद्धपाथोधिर्हैलाहतदशाननः।
स रामः सीतयाश्लिष्टमात्मानं वह्वमन्यते॥

परनिष्ठो यथा-

त्यक्ता जीर्णदुकूलबद्धसुमति बद्धोम्वुधिविन्दुव
द्वानाग्रेण जरत्वपोतक इव व्यापादितो रावणः।
लङ्का कोऽपि विभीषणाय सहसा मुद्रेव हस्तेऽर्पिता
श्रुत्वैवं रघुनन्दनस्य चरितं को वा न रोमाञ्चति॥

अत्युक्तिभ्रमोक्तिचित्रोक्तिविरोधाभासप्रभृतयो अद्भुत एव।

परवर्तिनिकाले पण्डितराजजगन्नाथेन रसगङ्गाधरग्रन्थे अद्भूतरसस्य विस्तृता आलोचना क्रियते। तेनोक्तम्- 'अलौकिकवस्तुदर्शनादिजन्मा आश्चर्याख्यो विस्मयः।'[39] उदाहरणम्-

चराचरजगज्जालसदनं वदनं तव।
गलद्गगनगाम्भीर्ये वीक्ष्यास्मि हृतचेतना॥

कदाचिद्भगवतो वासुदेवस्य वदनमालोकितवत्याः यशोदाया इयमुक्तिः। अत्र वदनमालम्बनम्। अन्तर्गतचराचरजगज्जालदर्शनमुद्दीपनम्। हृतचेतनत्वं तेन गम्यं रोमाञ्चनेत्रस्फारणादि चानुभावः। त्रासादयो व्यभिचारिणः। नैवात्र विद्यमानेऽपि पुत्रगता प्रीतिः प्रतीयते व्यञ्जकाभावात्। प्रतीतायां वा तस्यां विस्मयस्य गुणत्वं न युज्यते। एवं कश्चिन्महापुरुषोऽयमिति भक्तिरपि तस्याः पुत्रो ममायं बाल इति निश्चयेन प्रतिबन्धादुत्पत्तुमेव नष्टे। अतः तस्यामपि विस्मयस्य गुणीभावो न शङ्क्यः।

---
[39]रस.ग.– १म आननः

यदि भगवतो मुखं पश्यन्त्या यशोदया एवमुच्यते तदा तु वरं प्राधान्येन विस्मयस्य स्थितिः परन्तु प्रकरणादिपर्यालोचनेन सूनुवदनमवलोकितवत्या तयोच्यते ततः प्रीतेरेव प्राधान्यं विस्मयस्य गुणीभाव इति। पुत्रो वा परमेश्वरो वा भृत्यो वा दासी वा यः कोऽपि वा भवतु। यत्र गगनस्यापि गम्भीरिमागलन् वर्तते। यद् वीक्षहृतचेतनत्वं सम्पद्यते तत्र कथनं न विस्मयः। किं पुत्रादौ सत्यपि प्रेम्नि विलक्षणतादर्शने विस्मयो नो हेतुः, को हेतुः? नास्ति हेतुरतो रसोऽत्राद्भुत इति एव सुस्थितम्। एवं प्रकरणादिपर्यालोचने 'अयं बालो मम पुत्रः' इति तस्या यशोदाया निश्चयेन प्रतिबन्धादवरोधात् अयं कश्चित् महापुरुष इति तस्या यशोदायाः तत्र श्रीकृष्णे भक्तिरपि उत्पत्तुं नष्टे न समर्था। अतः उत्पत्यभावात् तस्यामपि भक्तावपि विस्मयस्य गुणीभावो न शङ्क्यः।यत्तु सहृदयशिरोमणिभिः प्राचीनैरुदाहृतम् -

"चित्रं महानेष नवावतारः, क्व कान्तिरेषाभिनवैव भङ्गिः।

लोकोत्तरं धैर्यमहो प्रभावः, काप्याकृतिर्नूतन एष सर्गः॥"

अत्र प्रतीयतां नामात्र विस्मयः, परन्तु असौ कथंकारम् अद्भुतरस ध्वनिव्यपदेशहेतुः। प्रतिपाद्यमहापुरुषविशेषविषयायाः प्रधानीभूतायाः स्तोतृगतभक्तेः प्रकर्षकत्वेन अस्य गुणीभूतत्वात्। यथा महाभारते गीतासु विश्वरूपं दृष्टवतः पार्थस्य 'पश्यामि देवांस्तव देव देहे सर्वांस्तथा भूतविशेषसंघान्' इत्यादिवाक्यसन्दर्भे। इत्थं चास्य रसालंकारत्वमुचितम्। भक्तिनैवात्र प्रतीयते इति चेद्दरमुकुलितलोचनं विदां कुर्वन्तु सहृदयाः। अत्र चित्रमिति पद्ये पश्यामि देवानित्यादि वाक्यसन्दर्भे अस्य विस्मयस्य। चेत् स्थूलतो दर्शनेन भक्तिनैव प्रतीयते तर्हि ईषन्मुकुलिते लोचने विधाय विदां कुर्वन्तु जानन्तु।

आचार्येण शृङ्गभूपालेन तदीये रसार्णवसुधाकरग्रन्थे अद्भुतरसविषये सामान्यतया आलोचना कृता। विशेषतः तेन नाट्यशास्त्रस्य मतमवलम्व्य अस्य रसस्य व्याख्या क्रियते। तेनोक्तम् –

‘विभावैरनुभावैश्च स्वोचिवैर्व्यभिचारिभिः’॥
नीतः सदस्यरस्यत्वं विस्मयोऽद्भुततां व्राजत्॥
अत्र धृत्यावेगजाड्यहर्षाद्या व्यभिचारिणः॥
चेष्टास्तु नेत्रविस्तारस्वेदाश्रुपुलकादयः।[40]

यथा –

सोडाहे नमतेति दूतमुखतः कार्योपदेशादरं
तत्तादृक् समाराङ्कनेषु भुजायेर्विक्रान्तमव्याहतम्।
भीतानां परिरक्षणं पुनरपि स्वे स्वे पदे स्थापनं
स्मारं स्मारमरातयः पुलकिता रेचल्लशिङ्गप्रभो॥

अत्र नायकगुणातिशयजनितो विरोधिनां विस्मयस्मृतिहर्षादिभिर्व्यभिचारिभिरुपचितः पुलकादिभिः अनुभावैर्व्यज्यमानोऽद्भुतत्वमापद्यते।

आलंकारिकेन धनञ्जयेन अद्भुतरसप्रसङ्गेन पूर्वाचार्यस्य भरतस्य मतं स्वीकृतम्। परन्तु केषु विषयेषु उभययोः वैमत्यानि दृश्यन्ते। ताभ्याम् द्वाभ्यामेव अद्भुतरसः स्वीकृतः। अपि च विस्मयस्थायिभाव इति मन्येते। नाट्यशास्त्रकारमतेन दिव्यजनदर्शनमनोरथदेवकुलादिगमसभाविमानइन्द्र-जालादिभिः प्रभृतिभिः विभावैरुत्पद्यते अद्भुतरसः। परन्तु धनञ्जयेन केवलमतिलोकपदार्थं विभावतया स्वीकृतम्। तत्र टीकायां

[40]वसुधाकर- २४१-२४२

दृश्यते - ‘लोकसीमातिवृत्तपदार्थ-वर्णनादिविभावितः’[41]। भरतमतेन यो ‘दिव्यजनदर्शन’ स एव धनञ्जयमतेन लोकसीमातिवृत्तपदार्थः। अनुभावप्रसङ्गेन तेन भरतमतं स्वीकृतम्। व्यभिचारविषयेन तेन स्वमतं प्रतिष्ठितम्। धनञ्जयेनोक्तं हर्षवेगदिव्यव्यभिचारिभावो रसोऽद्भुतः। यस्तु धनञ्जयेन व्यभिचारित्वेन स्वीकृत स एव भरताचार्येण अनुभावत्वेन गुणीभूतः इति। भरतमतेन अद्भुतरसः द्विविधः। दिव्यज आनन्दजश्चेति।[42] सभाविमानादिदर्शनजन्यात् जायते दिव्यवस्तुः। हर्षाज्जोयते आनन्दजः। टीकायां तत्र दृश्यते ‘दिव्यदर्शनजो दिव्यो हर्षादानन्दजः स्मृतः’[43] धनञ्जयेन न तादृशो भेदः क्रियते अद्भुतरसस्य। पुनश्च भरताचार्यमतेन अद्भुतरसस्य देवता ब्रह्मा।[44] वर्णोऽपि पीतः।[45] दशरूपककारेण अद्भुतरसस्य देवता न स्वीकृता। वणोऽपि तेन न स्वीकृतः।

अप्रधानानां रसानां संज्ञा कण्ठतः मम्मटाचार्येण न प्रदत्ता। एतेन अनुमातं शक्यते यद्भरतस्वीकृतः अद्भुतरसः तेनापि स्वीकृत एव निरपेक्षतया। अतएव अभिनवतया अद्भुतरसलक्षणनिर्माणे तत्र प्रयासः न परिलक्षितः। तथापि भरतस्वीकृतस्याद्भुतरसस्य स्वरूपविश्लेषणे तात्पर्यबोधे वा मतान्तरस्यावकाशः आसीत् इति वक्तुं शक्यते। अतो हि टीकाकारैः मम्मटसम्मतस्य अद्भुतरसस्य व्याख्या प्रदत्ता। भरतमम्मटौ अद्भुतरसं स्वीकृतवन्तौ। भरतेन नाट्यशास्त्रे अद्भुतरसस्य संज्ञा स्पष्टतया निरूपिता। काव्यप्रकाशकारेण मम्मटाचार्येण न तादृशी संज्ञा स्पष्टतया प्रदत्ता । तेन केवलं उदाहरणेन अद्भुतरसस्य व्याख्या कृता। तेन केवलम् अस्य रसस्य स्थायिभावः विस्मयः स्वीकृतः, न कापि आलोचना कृता।

---

[41]अवलोकटीका- द.रू.

[42]ना.श.- ‘दिव्यश्चानन्दजश्चैव द्विधा ख्यातोऽद्भुतो रसः’। षष्ठाध्यायः (वरोदासंस्करणम्)

[43]ना.श.- अः भाः

[44]ना.श.- ‘स्यादद्भुतो ब्रह्मदैवतः।’

[45]ना.श.- ‘पीतश्चैवाद्भुतः स्मृतः।’

ग्रन्थस्य टीकायामद्भुतरसस्य संज्ञा प्राप्यते अस्माभिः।[46] भरताचार्येण अद्भुतरसस्य विभावानुभावाः पृथग्रूपेण समुल्लिखिताः। विषयेऽस्मिन् मम्मटाचार्येण भरतमतं परित्यज्य स्वमतस्य प्राधान्यं दीयते। तेन पृथग्भावेन कस्यापि रसस्य विभावानुभावाः न स्वीकृताः। तेनोक्तम् - 'व्याघ्रादयो विभावा भयानकस्यैव वीराद्भुतरौद्राणामश्रुपातादयोऽनुभावाः शृङ्गारस्येव वीरकरुणभयानकानामिति पृथगनैकान्तिकत्वात् सूत्रे मिलिता निर्दिष्टाः'।[47] तत्र 'सूत्रे' इत्यर्थः भरतस्य रससूत्रम्। वस्तुतः भरतेनविस्मयस्य कापि संज्ञा न प्रदत्ता। तत्र टीकायां कापि संज्ञा न दृश्यते विस्मयस्थायिभाववियषे। परन्तु काव्यप्रकाशस्य टीकायां विस्मयस्थायिभावस्य एका संज्ञा विद्यते।[48] भरताचार्येण अद्भुतरसस्य भेदः स्वीकृतः। तेनोक्तम् - 'दिव्यश्चानन्दजश्चैव द्विधा ख्यातोऽद्भुतो रसः'।[49] मम्मटाचार्येण न तादृशो कोऽपि भेदः स्वीकृतः। भरताचार्येण अद्भुतरसस्य देवता स्वीकृता। वर्णोऽपि तेन स्वीकृतः।[50] काव्यप्रकाशकारेण अद्भुतरसस्य देवता न प्रदत्ता। वणोऽपि न।

रसविचारक्षेत्रेण भरतविश्वनाथयोः मतपार्थक्यं दृश्यते। भरताचार्येण अष्टौ रसाः स्वीकृताः।[51] विश्वनाथेन नवरसाः स्वीकृताः। तनोक्तम् –

'शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।

वीभत्सोऽद्भुत इत्यष्टौ रसा शान्तस्तथामतः'।

---

[46]का.प्र.- 'विस्मयस्थायिभावको ... हर्षादिसञ्चारितोऽद्भुतः। ४र्थाध्यायः [बालबोधिनीटीका- झालकीकरस्य]'

[47]शृङ्गारवीरहास्याः मम्मटाचार्येण प्राधान्येन स्वीकृताः। अन्या रसास्तु अप्राधान्येन।

[48]का.प्र.- 'विविधेषु पदार्थेषु लोकसीमातिवर्त्तिषु। विकारश्चेतसा वस्तु स विस्मय उदाहृतः॥' [बालबोधिनीटीका- श्रीझालकीकरस्य]

[49]ना.शा.- षष्ठोध्यायः

[50]ना.शा.- 'स्यादद्भुतो ब्रह्मदैवतः।' 'पीतश्चैवाद्भुतः स्मृतः।'

[51]ना.शा.- शृङ्गारहास्यकरुणा ... चेत्यष्टौ नाट्य रसाः स्मृताः॥ ६।१५ (वरोदासंस्करणम्)

नाट्याभिप्रायेण शान्तस्य नाट्ये तादृक्पुष्टिविरहात्। भरतेनोक्तं दिव्यजनदर्शनेप्सितमनोरथप्राप्त्युपवनदेवकुलादिगमनविमानमायेन्द्रजालसम्भावनादिभिर्विभावैरुत्पद्यते अद्भुतरसः। विश्वनाथेन केवलम् 'अलौकिकवस्तुदर्शनं' अस्य रसस्य विभावः कथ्यते। भरतमतेन 'दिव्यजनदर्शन' इत्यर्थः गन्धर्वादयः। विश्वनाथमतेन गन्धर्वगणादिना विस्मयोत्पादनं क्रियते इति पुराणादिषु प्रसिद्धमित्यवधेयम्। अनुभावविषयेन भरतेन कथितं नयनविस्तारानिमेषप्रेक्षणरोमाञ्चाश्रुस्वेदहर्षसाधुवाददानप्रबन्धहाहाकारबाहुवदनचेलाङ्गुलिभ्रमणादिभिरनुभावैरभिनयः प्रयोक्तव्यः। विश्वनाथेन केवलं स्वेदरोमाञ्चगदगदस्वरसंभ्रमनेत्रविकाशाद्याः अनुभावाः कथिताः। व्यभिचारभावक्षेत्रेण विश्वनाथेन भरतस्य मतं न अनुसृतम्। तेनोक्तं वितर्कावेगसंभ्रान्तिजडत्वमेव हर्षश्च औत्सुक्यादयश्च व्यभिचारिणो अद्भुतरसस्य। विश्वनाथेन अस्य रसस्य देवता गन्धर्व इति स्वीकृतम्। वर्णोऽपिपीतस्तेन स्वीकृतः। नाट्यशास्त्रे दृश्यते यद्वीरेणाक्षिप्तं वीरस्य पर्यन्तेऽद्भुतः फलमित्यनन्तरां तदुपादनं तथा च वक्ष्यते पर्य्यन्ते कर्तव्यो नित्यं रसोऽद्भुतः।[52] विश्वनाथेनोक्तं 'लोकोत्तरचमत्कारःप्राणः'।[53] अत्र चमत्कारशब्दस्य अर्थो चमत्कारश्चित्तविस्ताररूपोविस्मापरपर्य्यायः।[54] वस्तुतः रत्यादिस्थायिभावाः यत्र अनुभूयन्तेतत्र यथायथं शृङ्गारादिरसाः वर्त्तन्ते। परन्तु यत्र रत्यादिस्थायिभावाः न अनुभूयन्ते तत्र सामान्यतया अद्भुतरसः वर्त्तते।[55]

---

[52]ना.शा.- अः भाः (वरोदासंस्करणम्)

[53]साः दः- ३य परिः

[54]साः दः- ३य परिः

[55]साः दः- "चमत्कारसारत्वे चमत्कारस्थायिभावत्वे। तस्मात् सर्व्वत्राद्भुतरसानुभावात्। वस्तुतस्तु रत्याद्यानुभूयमानत्वे यथायथं ... भवेदद्भुतव्यापदेका इति मन्तव्यम्।" (रामतर्कटीका)

भरतशारदातनयौ अद्भुतरसं स्वीकृतवन्तौ। विस्मयस्थायिभावाद् अद्भुतरसः जातः। शारदातनयमतेन अद्भुतरसः त्रिगुणात्मकः।[56] विभाव-व्यभिचारभावयोः उभयोः मतपार्थक्यं न दृश्यते। अनुभावविषयेन तेन स्वमतं प्रतिष्ठितम्। तेन मतेन विचित्राकृतिवेषाश्च विचित्राचारविभ्रमाः। अद्भुतालम्बनाभावा मायालीलाविलासिनः।[57] ताभ्याम् द्वाभ्याम् वीररसात् जायते अद्भुतरसः इति स्वीक्रियते।[58] शारदातनयेन अद्भुतरसस्य निर्वचनप्रसङ्गेन उक्तं 'अथ्' धातोः 'अद्भुतः' इति शब्दस्य निर्वचनं भवति। 'अथ' इत्यस्य शब्दस्य अर्थो वैचित्र्यम्।[59] शारदातनयेन अद्भुतरसप्रसङ्गेन एका काहिनी वर्णिता। अपरैः आलंकारिकैः कापि काहिनी न वर्णिता।[60] ग्रन्थेऽस्मिन् अद्भुतरस्य त्रिविधः मानसाङ्गिकवाचिकभेदः। परन्तु भरताचार्यमतेन अद्भुतरसः द्विविधः दिव्यज आनन्दश्च।[61] शारदातनयमतेन अस्य रसस्य देवता ब्रह्मा। विषयेऽस्मिन् विश्वनाथेन सह मतपार्थक्यं दृश्यते। दर्पणकारमतेन गन्धर्वः इति देवता।[62] देवताप्रसङ्गेन शारदातनयेन एका व्याख्या प्रतिष्ठिता स्वमतसमर्थनजन्यात्।[63] अद्भुतरसस्य वर्णप्रसङ्गेन दर्पणकारेण सह तस्य सादृश्यं दृश्यते। उभयोः वर्णोऽपि पीतः स्वीकृतः।

सागरनन्दिना अद्भुतरसप्रसङ्गेन भरताचार्यस्य मतमतुसृतम्। अस्य रसस्य विभावविषयेन भरतमतं स्वीकृत्य स्वमतमपि तेन प्रतिष्ठितम्। 'प्रसाद्योद्यान' 'शैलादिगमनम्' इति शब्दद्वयं तेन विभावप्रसङ्गेण भरतमतेन सह प्रयुक्तं रसविषयेन। अनुभावप्रसङ्गेन

[56]"विस्मयश्चित्तवैचित्र्यं स त्रिधा त्रिगुणात्मिका ... विस्माप्यते स्वयं कश्चिद्विस्मापयति वा भवेत्।" (भाव प्रः, पृः- ३५ द्वितीयाधिकारः)

[57]भावः प्रः, १म अधिः, पृः- ६

[58] 'अहंकाररजःसत्त्वयुक्ताद्वाह्यार्थसङ्गतात्। मनसो ... रजोऽहङ्कारवर्ज्जितात्।' (भावः प्रः, २य अधिः, पृः- ४७)

[59]'अथ वैचित्र्य (?) ... चित्तवृत्तिस्ततोऽद्भूतः'- (भावः प्रः, २य अधिः, पृः- ४८-४९)

[60]'यदाङिनीतं भरतैः सम्यक् त्रिपुरमर्दनम् ... तस्मादद्भुतनिष्पत्तिर्वीरादेवेति कथ्यते।' (भावः प्रः, ३य अधिः, पृः- ५७-५८)

[61]नाः शाः- ६।१०२ (वरोदासंस्करणम्)

[62]साः दः- 'अद्भुतो विस्मयस्थायिभावो गन्धर्वदैवतः।' (३य परिच्छेदः)

[63]'महेन्द्रदैवतो ... ब्रह्मणः सेयमस्त्रीति सोऽयमस्याधिदैवतम्।' (भावः प्रः, ३य अधिः, पृः- ६८)

भरताचार्येणोक्तं केवलम् 'लोचनविस्तारः'। सागरनन्दिना उक्तम् - 'दन्तलोचनविस्तारः'। व्यभिचारप्रसङ्गे उभयोः सादृश्यं दृश्यते। आचार्यभरतेन अद्भुतरसो द्विविधः स्वीकृतः ।[64] सागरनन्दिता तादृशः भेदो न स्वीकृतः।

रामचन्द्र-गुणचन्द्रैः तस्य नाट्यदर्पणग्रन्थे भरतचार्यमतस्य प्राधान्यं दत्तवन्तौ। भरताचार्येण अद्भुतरसस्य भेदः स्वीकृतः। नाट्यदर्पणे तादृशः भेदो न दृश्यते।

शृङ्गभूपालेन रसार्णवसुधाकरग्रन्थे कापि नूतना वार्त्ता न कथ्यते। तेन भरतमतस्य प्राधान्यं दीयते।नाट्यशास्त्रे अद्भुतरसस्य भेदः दृश्यते। रसार्णवसुधाकरग्रन्थे अस्य रसस्य कोऽपि भेदः न प्राप्यते।

रुद्रटाचार्यस्य काव्यलंकारग्रन्थे भरताचार्यमतस्य प्रतिविम्बनं दृश्यते। अस्य रसस्य अनुभवः केवलं सामाजिकानां मनसि न अनुभूयते, अपि तु नायकादीनां मनसि। एषा कथा स्पष्टतया उक्ता रुद्रटाचार्येण। तेनोक्तम् - 'स्वयमनुभूयादर्थादनुभूयान्येन वा कथितात्'। रुद्रटाचार्यः अद्भुतरसस्य कोऽपि भेदः न स्वीकृतः। वर्णोऽपि तेन न स्वीकृतः। भरताचार्येण अस्य रसस्य भेदः स्वीकृतः। वर्णोऽपि तेन स्वीकृतः।

आलंकारिकस्य हेमचन्द्रस्य काव्यानुशासनग्रन्थे अद्भुतरसप्रसङ्गेन न कोऽपि प्रधानः विषयोऽस्ति। तेन भरताचार्यस्य मतमनुसृतम्। ग्रन्थेऽस्मिन् अद्भुतरसस्य कोऽपि भेदः न दृश्यते। नाट्यशास्त्रे तु भेदः दृश्यते।[65]

---

[64]नाः शाः- 'दिव्यश्चानन्दजाश्चैव ख्यातोऽद्भुतो रसः।' ६।१०२

[65]नाः शाः- ६।१०२

विद्यानाथस्य ‘प्रतापरुद्रीयम्’ श्रीभानुदत्तस्य रसतरङ्गिनीयमिति ग्रन्थद्वये भरताचार्यस्य मतमनुसृतम्। अस्य रसस्य भेदविषयेण मतपार्थक्यं विद्यते[66] भरताचार्येण सह।

पण्डितराजस्य जगन्नाथस्य रसगङ्गाधरग्रन्थे अद्भुतरसप्रसङ्गेन विशेषा व्याख्या आलोचना वा न दृश्यते। तेन केवलमद्भुतरसस्य साममेव संज्ञा दीयते। विभावानुभावव्यभिचारिभावा विषयाः तेन स्पष्टतया न परिस्कृताः। उदाहरणेन तेन अस्य रसस्य व्याख्या आलोचना वा कृता। परन्तु तेन परोक्षतया भरतमतमनुसृतम्। भरतमतानुसारतः तेन न अस्य रसस्य भेदः स्वीकृतः। परन्तु दर्पणकारस्य अद्भुतरसस्य समालोचना तेन कृता।[67]

---

[66]रसतरङ्गिनी- ‘स च स्वनिष्ठः परनिष्ठश्च।’

[67]र. गङ्गा.- “यच्च सहृदयशिरोमणिभिः ... भक्तिनैवात्र प्रतीयते इति चेद्दरमुकुलि ... लोचनं विदांकुर्वन्ति सहृदयाः।” (१म आननः)

## ।। कालिदासीयेषु नाटकेष्वद्भुतरसस्य विवेचनम् ।।

### क) अभिज्ञानशाकुन्तले अद्भुतरसप्रयोगः

नाटकमिदं मुख्यतया शृङ्गाररसप्रधानम्, परन्तु कविना शृङ्गाररसं विना अन्ये रसाः अपि मुख्या इति मन्यते। नाटकेऽस्मिन् अद्भुतरसस्य प्रयोगवैचित्र्यं दृश्यते अस्माभिः।

तत्र प्रथमाङ्के दृश्यते यत् –

**“राजा – (परिक्रम्यावलोक्य च) इदमाश्रमद्वारम्। यावत् प्रविशामि।**

**(प्रविश्यच निमित्तं सूचयन्)**

**शान्तमिदमाश्रमपदं स्फुरति च बाहुः कुतः फलमिहास्य ।**

**अथवा भवितव्यानां द्वाराणि भवन्ति सर्वत्र”।।**[68]

अत्र श्लोके ‘स्फुरति च वाहुः’ इत्युक्त्या बाहुमालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च ‘स्फुरति च’ इत्यंशे विभावनोद्रेकात् उद्दीपनविभावः। अपि च ‘प्रविश्य च निमित्तं सूचयन्’ इत्यंशे अनुभावः। किञ्च ‘कुतः फलमिहास्य’ इत्युक्त्या विस्मयेन वितर्कभावप्रकाशनात् व्यभिचारिभावः दृश्यते।

पुनश्च दृश्यते यत् प्रथमाङ्के-

**“(नेपथ्ये)**

**इतः इतः सखौ**

68. अभि.श. ,(अङ्कः – १, श्लोकः – १५)

**राजा – (कर्णं दत्त्वा) अये दक्षिणेन वृक्षवटिकामालाप इव श्रूयते। यावदत्र गच्छामि। (परिक्रम्यावलोक्य च) अये, एतास्तपस्विकण्यकाः स्वप्रमाणानुरूपैः सेचनघटैः वालपादेभ्यः पयो दातुमित एवाभिवर्तन्ते। (निपुणं निरूप्य) अहो मधुरमासां दर्शनम्"।**

मृगयार्थं कण्वाश्रमपदं प्रविष्टवान् महाराजो दुष्यन्त इति स्वाभाविकी वार्त्ता। आश्रमपदं खलु शमप्रधानम्। तत्स्थानं हि ब्रह्मचर्यव्रतादिपालनस्य पवित्रं स्थानम्। तत्रैवाश्रमे लौकिकपरिणयस्य किमपि स्थानं नास्ति। तथापि तत्राश्रमे प्रवेशमात्रेण दुष्यन्तस्य बाहू स्फुरति। पर्यवेक्षणद्वारेण बाहुस्फुरणं भाविपरिणयस्य सूचकं स्यादिति लोकजीवने प्रचलितमस्ति। दुष्यन्तः खलु लोकजीवनस्यास्य ज्ञानलब्धः पुरुषः। तस्मादेव कारणात् बाहुस्फुरणस्य फलं तत्राश्रमे तत्रभवता किम्प्रकारेण प्राप्तव्यमिति विस्मयाभिभूतोऽभवत् तत्रभवान् दुष्यन्तः। इदमेव परिणयरूपं फलं मानवचिन्तनस्य अतीतमिति ज्ञात्वा तेन चिन्तितं यद् यस्य विषयस्य संघटनम् अवश्यम्भावि मानवचिन्तनातीतञ्च तस्य विषयसंघटनाया द्वाराणि सर्वत्रैव सन्ति इति विस्मयः। अयंप्रकारो मानवचिन्तागोचरो विस्मयावहश्चमत्कारः। अयम्प्रकारो चमत्कारोऽद्भुतरस एव। अस्मिन् अंशे 'एतास्तपस्विकण्यकाः' इत्यंशे तपस्विकण्यकामवलम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च 'अहो मधुरमासां दर्शनम्' इत्युक्त्या विभावनोद्रेकात् उद्दीपनविभावः। एवञ्च 'निपुणं निरूप्य' इत्यंशे प्रेक्षणरूपेण अनुभावः। किञ्च अस्मिन् अंशे विस्मयेन हर्षभावप्रकाशनात् व्यभिचारिभावः दृश्यते।

पुनश्च दृश्यते यत् प्रथमाङ्के –

**“राजा – (ग्रहीतुमिच्छन् निगृह्य आत्मानम्। आत्मगतम्) अहो चेष्टाप्रतिरूपिका कामिजनमनोवृत्तिः। अयं हि –**

**अनुयास्यन् मुनितनयां सहसा विनयेन वारितप्रसरः ।**

**स्थानादनुच्चलन्नपि गत्वेव पुनः प्रतिनिवृत्तः”।।[69] इति**

कामिजनमनोवृत्तिः मानवानां कृते साधारणी प्रवृत्तिरिति स्वाभाविकी। असाधारणानां कृते एष न स्वाभाविकः। अत्र दुष्यन्तो न साधारणः पुरुषः। सार्वभौमो नृपः सः। नृपः सर्वदा देवताया अंशविशेषः मनुसंहितायां दृश्यते।[70] तस्मादेव कारणादसाधारण एव दुष्यन्तः। राजा सर्वदा जीतेन्द्रियो भवेत्। स्मृतिशास्त्रकारेणोक्तम् - ‘जितेन्द्रियो हि शक्नोति वशे स्थापयितुं प्रजाः’[71] इति। असाधारणानां मानवानां कृते सर्वदा कामिजनवृत्तिः त्यजनीया इति दुष्यन्तेन चिन्तितम्। अत्र राजा दुष्यन्तः शकुन्तलां ग्रहीतुमिच्छन्नपि लोकापवादादात्मानं रक्षितुं संयतया स्थातुमिच्छति। तथापि आत्मनः कामिजनमनोवृत्तिः न निवृत्तेति कृत्वा दुष्यन्तश्चिन्तयति। सः असाधारणत्वेऽपि साधारणवदाचरतीति चिन्तयित्वा स विस्मितोऽभवत्। तस्य इमां मानसिकावस्थां दृष्ट्वा स स्वयमाश्चर्यान्तितः अभवत्। अयम्प्रकारः आश्चर्योऽद्भुतरस एव । अतः तेनोक्तम् - ‘अहो’ इति शब्दः। ‘अहो’ शब्दः आश्चर्यार्थवाचकः’। अत्र श्लोके ‘मुनितनयां’ इत्युक्त्या मुनितनायामालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च ‘चेष्टाप्रतिरूपिका कामिजनमनोवृत्तिः’ इत्यंशे विभावनोद्रेकात्

---

[69]अभि.श.,(अंकः – १, श्लोकः – २६)

[70]मनु.(७/४-५)

[71]मनु. (३/४४)

उद्दीपनविभावः। एवञ्च ‘ग्रहीतुमिच्छन् निगृह्य आत्मानम्। आत्मानम्’ इत्यंशे स्पर्शग्रहरूपेण अनुभावः। किञ्च अत्र श्लोके विस्मयेन रोमाञ्चभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

नाटकेऽस्मिन् द्वितीयाङ्के अद्भुतरसस्य प्रयोगवैचित्र्यं दृश्यते यत् –

**“राजा – वयस्य, किं बहुना –**

**चित्रे निवेश्य परिकल्पितसत्त्वयोगा रूपोच्चयेन मनसा विधिना कृता नु।**

**स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः”।।[72] इति**

मृगयार्थं महाराजा दुष्यन्तो कण्वाश्रमं प्रविष्टवान्। आश्रमस्थानं तावत् ब्रह्मचर्यादिव्रतपालनस्य पवित्रं स्थानम्। तस्मिन् आश्रमपदे दुष्यन्तः शकुन्तलां दृष्टवान् । तत्रैव शकुन्तलायाः रूपलावण्यं दृष्ट्वा राजा विस्मयोऽभवत्। अस्मिन् आश्रमपदे ब्रह्मचर्यादिव्रतपालनेन किं प्रकारेण इदं रूपलावण्यं सम्भवति ? राजधान्यामीदृशं रमणीसौन्दर्यं दुष्यन्तो न कदापि दृष्टवान्। शकुन्तलाया रूपसौन्दर्यं मानवीयोनिजातं न सम्भवतीति दुष्यन्तेन विचिन्तितम्। इयं रूपसृष्टिः विधिना परिकल्पितेन सर्वश्रेष्टरूपेण निर्मिता। अतएव सा अपरा स्त्रीरत्नसृष्टिः। ब्रह्मणः सृष्टिः लोकातिक्रान्तत्वादलौकिकी। शकुन्तलाया इदमलौकिकसौन्दर्यं दृष्ट्वा दुष्यन्तः स्वयं विस्मयोऽभवत्। अयं प्रकारो विस्मयः चमत्कारः। अतः अयं प्रकारो चमत्कारोऽद्भुतरस एव। अत्र श्लोके ‘सा’ इत्युक्त्या शकुन्तलामालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। लौकिकं प्रतिक्रियामतिरिच्य या मानसिकी प्रतिक्रिया दुष्यन्तस्य मनसि जायते सैवात्र उद्दीपनविभावः। सौन्दर्यसृष्टौ लौकिकसामर्थ्यं ग्रहणीयं स्यात्। पुरन्तु तदेव यदि लौकिकातितं भवति तर्हि तत् ब्रह्मणः

[72]अभि.श. ,(अङ्कः – २, श्लोकः – ९)

अलौकिकसामर्थात् सम्भवतीति उद्दीपनविभावः। एवञ्च श्लोकेऽस्मिन् अनिमेषरूपेण अनुभावः। किञ्च 'विधिना कृता नु' इत्युक्त्या विस्मयेन वितर्कभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

चतुर्थाङ्के नाटकेऽस्मिन् दृश्यते यत् –

**"(प्रविश्योपायनहस्तौ)**

**ऋषिकुमारौ – इदमलंकरणम्। अलंक्रियतामत्रभवती"।**

**(सर्वा विलोक्य विस्मिताः)**

**"गौतमी – वत्स नारद, कुत एतत्?**

**प्रथमः – तातकाश्यपप्रभावात्।**

**गौतमी – किं मानसी सिद्धिः?**

**द्वितीयः- न खलु । श्रुयताम् । तत्रभवता वयमाज्ञप्ताः शकुन्तलाहेतोर्वनस्पतिभ्यः कुसुमान्याहरतेति । तत इदानीम् –**

**क्षौमं केनचिदिन्दुपाण्डु तरुणा माङ्गल्यमाविष्कृतं**
**निष्ठ्यूतश्चरणोपभोगसुलभो लाक्षारसः केनचिते ।**
**अन्येभ्यो वनदेवताकरतलैरापूर्वभागोत्थितै-**
**र्दत्तान्याभरणानि तत्किसलयोद्भेदप्रतिद्वन्द्विभिः"।।**[73]

[73] अभि.श. ,(अङ्कः – ४, श्लोकः – ५)

आश्रमस्थानं तावत् स्वभावतो ब्रह्मचर्यादिव्रतपालनस्य पवित्रं स्थानम्। अतोऽत्र जागतिकभोगसाधनविषया न प्राप्यन्ते। परन्तु शकुन्तलायाः पतिगृहप्रेरणावसरे शकुन्तलालंकृतासीत्। अतः मुनिकुमारयोर्हस्तयोर्बहुमूल्यवन्तोऽलंकारान् दृष्ट्वा सर्वे विस्मिताः। कुत्र ताभ्यामिमेऽलंकाराः प्राप्यन्ते इति पृच्छति माता गौतमी। कुमारौ उक्तवन्तौ यद् एष तातकाश्यपेन प्रभावाज्जायते। आश्रमवासिनोऽकस्मादलंकारदर्शनेन विस्मयोऽनुभूयते। अयम्प्रकारोऽलंकारदर्शनरूपो विषयश्चमत्कारः। अयम्प्रकारः चमत्कारोऽद्भुतरस एव। अस्मिन् अंशविशेषे 'इदमलंकरणम्' इत्युक्त्या अलंकारमालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अत्र सौमाद्यलंकरणानि आलम्बनविभावः। भगवतः तातकाश्यपस्य प्रतावात् इदमलंकरणमनुष्ठितमिति श्रवणेन विस्मयाद्रेकः अत्र उद्दीपनविभावः। अपि च 'सर्वा विलोक्य विस्मिताः' इत्यंशे नेत्रविकाशात् अनुभावः। किञ्च 'वत्स नारद, कुत एतत्' इत्युक्त्या विस्मयेन सन्देहप्रकाशात् वितर्कभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

अङ्केऽस्मिन् पुनश्च दृश्यते –

**"(आकाशे)**

**"रम्यान्तरः कमलिनीहरितैः सरोभिश्छायाद्रूमैर्नियमितार्कमयूखतापः।**

**भूयात् कुशेशयरजोमृदुरेणुरस्याःशान्तानुकूलपवनश्च शिवश्च पन्थाः"।।[74] इति**

**('सर्वे सविस्मयमाकर्णयन्ति')**

---

[74]अभि.श.,(अङ्कः – ४, श्लोकः – ११)

शकुन्तलायाः पतिगृहगमनवेलायामाकाशे दैववाणी अभवत्। अत्राकाशे इत्यर्थः शून्ये तपोवनतरुस्थितवनदेवतानामुक्तिरियम्। दैववाणीं श्रूत्वा सर्वे समुपस्थिता आश्रमवासिनो विस्मिताः। इयं वाणी मानवश्रुतिगोचरापि वाणीकारो न दृष्टिगोचरो।तस्मात् दैवीति अलौकिको विषयः । तस्मात् अलौकिकत्ववस्तुदर्शनं श्रवणं वा चमत्कारकारणमिति मन्यते पण्डितराजजगन्नाथेन। तेनोक्तम् - 'अलौकिकवस्तुदर्शनादिजन्मा आश्चर्याख्यो विस्मयः' इति। अयं प्रकारो विस्मयोऽद्भुतरसस्य जनकः। अत एवात्र कालिदासेन कृतमद्भूतरसप्रयोगवैचित्र्यमिदं जगन्नाथसम्मतम्। अत्र श्लोके 'आकाशे' इत्यर्थः आकाशवाणीमालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। वनदेवतानां दैववाणीश्रवणम् अत्र आलम्बनविभावः। तस्याः दैववाण्यां विषयाः तु उद्दीपनविभावः। अपि च 'सर्वे सविस्मयमाकर्णयन्ति' इत्यंशे नेत्रविकाशात् अनुभावः। किञ्च श्लोकेऽस्मिन् विस्मयेन रोमाञ्चभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

पञ्चमाङ्के अद्भुतरसस्य प्रयोगवैचित्र्यं दृश्यते यत् –

**"आश्चर्यम् !**

**राजा – (आकर्ण्य) किं नु खलु स्यात्?**

**(प्रविश्य)**

**पुरोहितः – (सविस्मयम्) देव, अद्भुतं खलु संवृत्तम् ।**

**राजा - किमिव?**

**पुरोहितः – देव, परावृत्तेषु कण्वशिष्येषु**

**सा निन्दन्ती स्वानि भाग्यानि बाला बाहुत्क्षेपं क्रन्दितुं च प्रवृत्ता।**

**राजा – किं च।**

**पुरोहितः – स्त्रीसंस्थानं चाप्सरस्तीर्थमारादुत्क्षिप्यैनां ज्योतिरेकं जगाम"।।** [75] **इति**

**(सवे विस्मयं रूपयन्ति)**

अत्रासन्नप्रसवां शकुन्तलां दुष्यन्तो वधूरूपेण न स्वीकरोति। अनेन शकुन्तला नितरामपमानिताऽभवत्। रुदती प्रस्थिता सा। तस्मिन् समये एका तेजोमयी मूर्त्तिः शकुन्तलां नीत्वा अप्सरतीर्थं गतवती। राजपुरोहितात् इमां वार्त्तां श्रुत्वा दुष्यन्तो विस्मतोऽभवत्। सर्वे समुपस्थिता राजपुरूषा अपि विस्मयापन्नाः। अयम्प्रकारो विस्मयः चमत्कार एव। अत्र टीकाकारेण राघवभट्टेनापि स्वीकृतोऽद्भुद्रसप्रयोगः। तन्मते यथा –

'दुर्लभाभीष्टसंप्राप्तिः खेचराणां विलोकनम्।

एते यत्र विभावाः स्युरनुसंचारिणस्त्वमी।।

स्तम्भः खेदश्च रोमाञ्चः प्रलयो गद्गगद्वचः।

आवेगसंभ्रमौ जाड्यमिति यत्राथ विस्मयः।।' इति

अस्मिन्अंशविशेषे'स्त्रीसंस्थानं'इत्युक्त्याविभावनोद्रेकात्उद्दीपनविभावः।अपि च 'ज्योतिरेकं' इत्यंशे ज्योतिरेकमालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च 'सर्वे विस्मयं रूपयन्ति' इत्यंशे स्तब्धताभावेन अनुभावः। किञ्च अस्मिन् अंशविशेषे विस्मयेन स्तम्भसात्तिकभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

---

[75] अभि.श.,(अङ्कः – ५, श्लोकः – ३०)

सप्तमाङ्के अद्भूतरसप्रयोगस्य वैचित्र्यं दृश्यते –

**“राजा – (सविस्मयम्)**

**उपोढशब्दा न रथाङ्गनेमयःप्रवर्त्तमानं न च दृश्यते रजः।**

**अभूतलस्पर्शतयानिरुद्धतस्तवावतीर्णोऽपि रथो न लक्ष्यते”।।[76] इति**

**मातलि- एतावानेव शतक्रतोरायुष्मतश्च विशेषः।**

महाराजो दुष्यन्तो देवतायाः साहार्य्यार्थं रथानारुह्य स्वर्गं गतः। यदा दुष्यन्तो रथादवतरति तदा चलमानं रथं दृष्ट्वा स विस्मितोऽभवत्। दुष्यन्तस्य रथः शून्ये धावति। रथो न भुतलं स्पृशति । अस्मादेव कारणाद्रथाङ्गस्य शब्दो न श्रूयते। मर्त्यलोके मार्गोऽस्ति। स च मार्गो धूलिधूसरितो वर्तते। स्वर्गलोकः शून्ये तिष्ठति। परं तत्र शून्ये मार्गो नास्ति। अत एव तत्र न भूतलं स्पृशति। कथं दुष्यन्तः रथादवतरतीति न बोद्धुमर्हति सः। इमामवस्थां दृष्ट्वा महाराजः स्वयमाश्चर्यान्वितः। अत्र श्लोके ‘रथाङ्गनेमयः’ इत्यंशे रथाङ्गमालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च ‘उपोढशब्दा’ ‘प्रवत्तमानं न च दृश्यते रजः’ इत्यंशे विभावनोद्रेकात् उद्दीपनविभावः। अपि च ‘उपोढशब्दा न रथाङ्गनेमयः प्रवत्तमानं न चदृश्यते रजः। अभूतलस्पर्शतयानिरुद्धततः’ इत्यंशे रथाङ्गस्य प्रशंसाप्रकाशनात् अनुभावः। किञ्च ‘अवतीर्णोऽपि रथो न लक्ष्यते’ इत्यंशे विस्मयेन सन्देहभावप्रकाशनात् वितर्करूप व्यभिचारिभावः सूच्यते।

अङ्केऽस्मिन् पुनश्च दृश्यते यत् –

**“राजा – ननु विस्मयादवलोकयामि।**

---

[76]अभि.श.,(अङ्कः – ७, श्लोकः – १०)

**प्राणानामलिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने**

**तोये काञ्चनपद्मरेणुकपिशे धर्माभिषेकक्रिया।**

**ध्यानं रत्नशिलातलेषु विवुधस्त्रीसन्निधौ संयमो**

**यत् काङ्क्षन्ति तपोभिरन्यमुनयस्तस्मिंस्तपस्यन्त्यमी"।।[77] इति**

महर्षिर्दुष्यन्तो मारीचाश्रमपदं प्रविश्य विमुग्धोऽभवत्। आश्रमस्थानं तावद् ब्रह्मचर्यादिव्रतपालनस्य पवित्रं स्थानम्। तत्र मुनयो विलासपरिगता अपि संयमेन जीवनं धारयन्ति। प्राणधारणाय तेऽनिलं भक्षयन्ति, न तु कल्पवृक्षेण प्रदत्तानि वस्तूनि भक्षयन्ति। रत्नशिलातलेषु ध्यानं कुर्वन्ति, न तु रत्नशिलातलत्वेन क्रीडन्ति। विबुधस्त्रीसन्निधौ देवयोषिदभ्याशे संयमं कुर्वन्ति मुनयः। अन्ये मुनयस्तपोभिः यत् कांक्ष्यन्ति अमी मुनयः तस्मिन् तपस्यन्ति। मारीचाश्रमपदे मुनीनामिमां जीवनधारणक्रियां दृष्ट्वा दुष्यन्तो विस्मितोऽभवत्। अयं प्रकारो विस्मयोऽद्भुतरस एव। अत्र श्लोके 'तपोभिरन्यमुनयस्तस्मिंस्तपस्यन्त्यमी' इत्युक्त्या 'अमी' इति मारीचाश्रमपदे मुनिमालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च 'प्राणानामलिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने' अपि च 'ध्यानं रत्नशिलातलेषु विवुधस्त्रीसन्निधौ संयमो' इत्यंशे विभावनोद्रेकात् उद्दीपनविभावः। अपि च 'ननु विस्मयादवलोकयामि' इत्यंशे नेत्रविकाशप्रकाशनात् अनुभावः। किञ्च श्लोकेऽस्मिन् विस्मयेन आवेगभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

अपि च, अन्यत्राप्यद्भुतरसस्य दृष्टान्तः प्राप्यते --

---

[77]अभि.श.,(अङ्कः – ७, श्लोकः – १२)

**“राजा – (कर्णं दत्त्वा) अभूमिरियमविनयस्य। को नु खल्वेष निषिध्यते। (शब्दानुसारेणावलोक्य। सविस्मयम्।) अये को नु खल्वयमनुवध्यमान-स्तपस्विनीभ्यामवालसत्त्वो बालः।**

**अर्धपीतस्तनं मातुरामर्दक्लिष्टकेसरम्**

**प्रक्रीडितुं सिंहशिशुं वलात्कारेण कर्षति”।।[78] इति**

महाराजो दुष्यन्तो मारीचाश्रमपदं प्रविष्टवान्। तत्र आश्रमस्य बालकं दृष्ट्वा दुष्यन्तो विस्मितोऽभवत्। बालकः क्रीड़ायै सिंहशिशुं बलादकर्षतीति। शिशवः सिंहाद्बिभ्यतीति स्वाभाविकी। परन्तु बालकोऽयं विपरीतस्वभावविशिष्टः। स न विभेति सिंहात्। एष कथं सम्भवतीति दुष्यन्तेन मन्यते। बालकोऽयं न साधारणः। यो न साधारणः सोऽवश्यमेवासाधारणः। असाधारणो खलु अद्भुत एव । अस्यासाधारणस्य बालकस्य महावीरत्वं दृष्ट्वा राजा स्वयमाश्चर्यान्वितोऽभवत्। अयम्प्रकारो चमत्कारो विस्मयः। अयं प्रकारो विस्मयोऽद्भुतरस एव। अत्र श्लोके ‘खल्वमयमनुवध्यमानस्तपस्विनीभ्यामबालसत्त्वो बालः’ इत्यंशे बालकमालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च ‘अर्धपीतस्तनं मातुरार्मदक्लिष्टकेसरम् प्रक्रीडितं सिंहशिशुं वलात्कारेण कर्षति’ इत्यंशे विभावनोद्रेकात् उद्दीपनविभावः। अपि च ‘शब्दानुसारेणावलोक्य सविस्मयम्’ इत्यंशे भ्रुकुञ्चनप्रकाशनात् अनुभाव। किञ्च श्लोकेऽस्मिन् विस्मयेन गर्वभावप्रकाशनात् व्यभिचारिभावः सूच्यते।
पुनश्च दृश्यते यत् –

**“राजा – (बालस्य हस्तमवलोक्य) कथं चक्रवर्तिलक्षणमप्यनेन धार्यते। तथा ह्यस्य -**

---

[78]अभि.श., अङ्कः – ७, श्लोकः - १४

**प्रलोभ्यवस्तुप्रणयप्रसारितो विभाति जालग्रथिताङ्गुलिः करः।**

**अलक्ष्यपत्रान्तरमिद्धरागया नवोषसा भिन्नमिवैकपङ्कजाम्”।।[79] इति**

महर्षिर्दुष्यन्तो मारीचाश्रमपदमागतवान्। तत्रैव बालकमिमं स दृष्टवान्। बालकस्य महावीरत्वं दृष्ट्वा स विस्मितोऽभवत्। अपि तु बालकस्य हस्तोऽपि दृष्टस्तेनेति कृत्वा विस्मयाभिभूतस्य बालकस्य हस्ते राजचक्रवर्तिलक्षणं दृष्टम्। इदं लक्षणं राजवंशस्य प्रतीकभूतम्। आश्रमपदं खलु मुनिकुमाराणां स्थानमिदं लोकव्यवहारे प्रचलितमस्ति। राजकुमारस्योपस्थितिरत्र न स्वाभाविकी। अयं बालकः न मुनिकुमारः, बालकोऽयं कस्यचिद्राजवंशस्य कुमार इति दुष्यन्तेन चिन्तितम्। बालकेन यदा क्रीडनकं नेतुं हस्तद्वयं प्रसारितम्, तदा बालकस्य हस्ते राजचक्रवर्त्तिलक्षणं[80] दृष्ट्वा दुष्यन्तस्य मनसि विस्मयोऽजायत। अयं प्रकारो विस्मयोऽद्भुतरस एव। अस्मिन् अंशे ‘बालस्य हस्तमवलोक्य’ इत्यंशे बालकस्य हस्तमालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च ‘चक्रवर्तिलक्षणमप्यनेन धार्यते’ इत्युक्त्या विभावनोद्रेकात् उद्दीपनविभावः। एवञ्च नेत्रविकाशभावप्रकाशनात् अनुभावः किञ्च श्लोकेऽस्मिन् बालकस्य हस्ते चक्रवर्तिलक्षणं दृष्ट्वा राज्ञः मनसि हर्षानुभवः जायते। हर्ष इति अद्भूतरसस्य व्यभिचारिभावः सूच्यते।

अङ्केऽस्मिन् पुनश्च दृश्यते यत् –

**“तापसी – (उभौ निर्वण्य) आश्चर्यमाश्चर्यम्।**

**राजा – आर्ये किमिव।**

---

[79]अभि.श.,(अङ्कः – ७, श्लोकः – १६)

[80]‘अङ्कुशं कुण्डलं चक्रं यस्य पाणितले भवेत्।

चक्रवर्त्ती भवेन्नित्यं समुद्रकवचो यथा।।’

**तापसी – अस्य बालकस्य ते अपि संवादिनी आकृतिः इति विस्मितास्मि। अपरिचितस्य अपि ते अप्रतिलोमः संवृत्तः इति।**

**राजा – (बालकमुपलालयन्) न चेन्मुनिकुमारोऽयम्, अथ कोऽस्य व्यपदेशः?**

**तापसी – पुरुवंशः।**

**राजा – (आत्मगतम्) कथमेकान्वयो मम। अतः खलु मदनुकारिणमेनमत्रभवती मन्यते। अस्त्येतत् पौरवाणामन्त्यं कुलव्रतम्।**

**भवनेषु रसाधिकेषु पूर्वंक्षितिरक्षार्थमुशन्ति ये निवासम्।**

**नियतैकयतिव्रतानि पश्चात्तरुमूलानि गृहीभवन्ति तेषाम्।।[81] इति**

**(प्रकाशम्) न पुनरात्मगत्या मनुष्याणामेव विषयः।"**

राजा दुष्यन्तो यदा स्वर्गादवतरति तदा मङ्गलदर्शनार्थं मारीचेन सह मिलितुमिच्छन् स मारीचाश्रमपदं प्रविष्टवान्। तत्र भवान् एकं बालकमालोक्य विस्मितोऽभवत्। बालकमुपलालयता तेन मनसि चिन्तितं यद्बालकोऽयं न चेन्मुनिकुमारः। सहसैका तापसी तत्रोपस्थिता। तापसी राजा च बालकश्चोभौ निवर्ण्य विस्मितौ स्तः। बालकस्याकृतिः राज्ञामाकृतिसमेति सा चिन्तितवती। अपरिचितोऽपि बालको राज्ञामप्रतिलोमः संवृत्त इति। अतोऽत्र भवती एनं बालकमालोक्य नृपस्यानुकारीति मन्यते इति। तथाहि विस्मयाभिभूताभूत् सा। अस्मिन् अंशे 'अस्य बालकस्य' इत्यंशे बालकमालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च 'ते अपि संवादिनी आकृतिः इति विस्मितास्ति। अपरिचितस्य अपि ते अप्रतिलोमः संवृत्तः इति' इत्यंशे विभावनोद्रेकात् उद्दीपनविभावः। अपि च

---

[81]अभि.श. (अङ्कः – ७, श्लोकः – २०)

अंशेऽस्मिन् प्रेक्षणभावप्रकाशनात् अनुभावः। किञ्च अस्मिन् अंशविशेषे विस्मयेन हर्षानुभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

पुनश्च सप्तमाङ्के दृश्यते यत् –

**"प्रथमा – (विलोक्य सोद्वेगम्) अहो रक्षाकरण्डकमस्य मनिबन्धे न दृश्यते।**

**राजा – अलमलमावेगेन। नन्विदमस्य सिंहशावविमर्दात्**

**परिभ्रष्टम्।(आदातुमिच्छति)**

**उभे – विस्मयादुरोनिहितहस्ते परस्परमवलोकयतः। मा खलु इदमवलम्ब्य। कथं गृहीतमनेन।**

**राजा – किमर्थं प्रतिषिद्धाः स्मः।**

**प्रथमा – शृणोतु महाराजः। एषा अपराजिता नाम ओषधिः अस्य जातकर्मसमये भगवता मारीचेन दत्ता। एतां किल मातापिरतौ आत्मानं च वर्जयित्वा अपरः भूमिपतितां न गृह्णाति।**

**राजा – अथ गृह्णाति।**

**प्रथमा – ततः तं सर्पः भूत्वा दशति।**

**राजा – भवतीभ्यां कदाचिदस्याः प्रत्यक्षीकृता विक्रिया?**

**उभे – अनेकशः।**

**राजा – (सहर्षमात्मगतम्) कथमिव सम्पूर्णमपि मे मनोरथं नाभिनन्दामि। (इति बालं परिष्वजते)**

**द्वितीया – सुव्रते एहि। इमं वृत्तान्तं नियमव्यापृतायै शकुन्तलायै निवेदयावः”[82]।**

प्रथमा तापसी बालकस्य मणिबन्धे रक्षाकरण्डकं न दृष्ट्वा विस्मयाभिभूता जाता। तत्र भवान् दुष्यन्तो तापसीमाश्वस्तीकृतवान्। तेनोक्तं यत् सिंहशावकविमर्दनाद्बालकस्य हस्तादिदं कवन्धकं परिभ्रष्टमभवत्। तस्मिन् क्षणे कवन्धकमालोक्य राजा तद्हस्तगतं कृतवान्। राजहस्ते तद्दृष्ट्वा तापसौ उरोन्निहितहस्ते विस्मयाभिभूते। तदा राजा रक्षाकरण्डकं रहस्यं जिज्ञासितवान्। एषा अपराजिता नामौषधिरस्य बालकस्य जातकर्मसमये भगवता मारीचेन दत्तेति ते वदन्ति। मातापितरौ वर्जयित्वाऽपरो कोऽपि भूमिपातितं करण्डकं स्पृशति चेद् तत्सर्पो भूत्वा दशति। एषां कथां श्रुत्वा दुष्यन्तः स्वयं विस्मयाभिभूतः। तेन मनसि चिन्तितं यद्बालकः ममात्मजः। आत्मपुत्रलाभेन दुष्यन्त आनन्दितोऽभवत्। अतएवात्रायं रक्षाकरण्डकवृत्तान्तः नियमेन व्यापृतः। नियमव्यापृतो वृत्तान्तः खलु भवति सर्वदालौकिकः। योऽलौलिकः स एवाद्भुतः। सप्तमाङ्के कवचवृत्तान्तं योजयित्वा कालिदासेन आलंकारिकसम्मतम् - ‘कार्यं निर्वहणेऽद्भुतम्’ इति वचनस्य प्राधान्यं दीयते। अस्मिन् अंशे ‘मा खलु इदमवलम्ब्य’ इत्युक्त्या राजा दुष्यन्तमालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च ‘कथं गृहीतमनेन’ इत्यंशे विभावनोद्रेकात् उद्दीपनविभावः। एवञ्च ‘विस्मयादुरोनिहितहस्ते’ इत्यंशे अनुभावः। किञ्च अस्मिन् अंशविशेषे विस्मयेन हर्षभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

---

[82]अभि.श.(सप्तमाङ्कः)

## ख) विक्रमोर्वशीये रूपकेऽद्भुतरसप्रयोगसमीक्षणम्

महाकविना कालिदासेन विक्रमोर्वशीयमिति नाटके नवरसेष्वद्भुतस्य प्रयोगवैचित्र्यं समुपवर्णितम्। तत्र पञ्चमाङ्केऽप्यद्भुतरसस्य प्रयोगवैचित्र्यं दृश्यते। तद्यथा -

**"कञ्चुकी – जयतु जयतु देवः।**

**अनेन निर्भिन्नतनुः स बध्यो वलेन ते मार्गणतां गतेन।**

**प्राप्यापराधोचितमन्तरीक्षात्समौलिरत्नः पतितः पतत्री"।।[83] इति**

**(सर्वे विस्मयं रूपयन्ति)**

कञ्चुकी सशरं मुनिना सह प्रवेशयति नृपस्य कक्षाभ्यन्तरम्। भर्त्तुरत्यन्तरविलासि-मौलिरत्नयोग्यं गृध्रेणाक्षिप्तम्। ततस्तस्य गृहस्य शान्तिरूपेण नृपो वाणसंयोगं कृतवान्। वाणेन विदारितः सन् तस्करविहङ्गो वसुधातलात् पतति। ततः सर्वे समुपस्थिता राजपुरुषा तस्करविहङ्गं पश्यन्ति। विहङ्गस्य विचित्राकृतिं दृष्ट्वा सर्वे राजपुरुषा विस्मयाभिभूता जाता इति कृत्वायं प्रकारो विस्मयजोऽद्भुतरस एव। अस्मिन् अंशे 'स बध्या बलेन' इत्युक्त्या स इति पतत्री बोधनात् विभावनोद्रेकात् आलम्बनविभावः। अपि च 'अनेन निर्भिन्नतनुः स बध्या' इत्यंशे विभावनोद्रेकात् उद्दीपनविभावः। एवञ्च अस्मिन् अंशे श्लाघाप्रकाशनात् अनुभावः। किञ्च अत्र विस्मयेन रोमाञ्चभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

पुनश्च दृश्यते यत् –

[83]विक्रमो., (अङ्कः – ५, श्लोकः – ६)

**“राजा – भगवति अभिवादये।**

**तापसी – महाभाग, सोमवंशविस्तारयिता भव। (आत्मगतम्) अहो अनाख्यातोऽपि विज्ञातोऽस्य राजर्षेरौरसः सम्बन्धः। (प्रकाशम्) जातः प्रणम्य ते गुरुम्।**

**(कुमारश्चापगर्भमञ्चलिं करोति)**

**राजा – आयुष्मान् भव।**

**कुमारः – (आत्मगतम्)**

**“यदि हार्दमिदं श्रुत्वा पिता ममायं सुतोऽहमस्येति।**

**उत्सङ्गवर्धितानां गुरुषु भवेत् कीदृशः स्नेहः”।।[84] इति**

अस्मिन्अंशे‘राजर्षेरौरसः’इत्युक्त्याराजर्षिमालम्ब्यविभावनोद्रेकात् आलम्बनविभावः। अपि च ‘कुमारश्चापगर्भमञ्जलिं करोति’ इत्यंशे अङ्गुलिसञ्चालनभावप्रकाशनात् अनुभावः। किञ्च अंशेऽस्मिन् विस्मयेन हर्षभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

पुनश्च दृश्यते यत् –

**“राजा – भगवति, किमागमनप्रयोजनम्।तापसी – शृणोतु महाराजः। एष दीर्घायुर्वायुर्जातमात्र एवोर्वश्या किमपि निमित्तमवेक्ष्य मम हस्ते न्यासीकृतः। यत् क्षत्रियकुमारस्य जातकर्मादिविधानां तदस्य भगवता च्यवनेनाशेषमनुष्ठितम्। गृहीतविद्यो धनुर्वेदे च विनीतः।**

---

[84]विक्रम., (अङ्कः – ५, श्लोकः – १०)

**राजा – सनाथ खलु संवृत्तः।**

**तापसी – अद्य पुष्पसमिदर्थमृषिकुमारकैः सह गतेनानेनाश्रमविरुद्धमाचरितम्।**

**विदूषकः – कथमिव।**

**तापसी – गृहीतामिषः किल गृध्रः पादपशिखरे निलीयमानो लक्ष्यीकृतो वाणस्य।**

**(विदूषको राजानमवलोकयति)**

**राजा – ततस्ततः।**

**तापसी –ततः उपलब्धवृत्तान्तेन भगवता च्यवनेनाहं समादिष्टा निर्यातया हस्तन्यासमिति। तदिच्छाम्युर्व्यर्शीं प्रेक्षितुम्”[85]।**

पुरुरवसा सह पुत्रेण साक्षात्कारोऽत्र वर्णितः। तत्र राजर्षिभ्यां समं कुमारस्य सादृश्यं दृष्ट्वा तापसी आश्चार्यान्विताभवत्। अपरिचितेनापि राज्ञा सह बालकस्य कोऽपि सम्बन्धो वर्तते इत्यात्मगतं मन्यते तापसी। परन्तु लोकपवादात् सा तन्न प्रकाशयति। राज्ञा तापसीमुखात् कुमारस्य जन्मवृत्तान्तो ज्ञातः। महर्षिश्च्यवणः कुमारस्याभिभावक इति ज्ञात्वा राजर्षिः परमानन्दितोऽभवत्। पुरुरवा कुमारस्य महावीरत्वं तापसीमुखाच्छ्रुत्वा स्वयं विस्मयान्वितोऽभवत्। अयं प्रकारको विस्मयोऽद्भुतरसस्य जनकः। अस्मिन् अंशे ‘पादशिखरे निलीयमानो’ इत्युक्त्या विभावनोद्रेकात् आलम्बनविभावः। अपि च ‘लक्ष्यीकृतो’ इत्यंशे विभावनोद्रेकात् उद्दीपनविभावः। किञ्च अंशेऽस्मिन् विस्मयेन हर्ष।भावप्रकाशनात् व्यभिचारिभावः सूच्यते।

[85]विक्रमो. (पञ्चामाङ्कः)

पञ्चमाङ्के पुनश्च दृश्यते यत् –

**“(सर्वे दृष्टिविघातं रूपयन्ति)**

**राजा – (आकाशमवलोक्य) किं नु खलु निरभ्रे विद्युत्सम्पातः।**

**उर्वशी – (विलोक्य) अम्मो भगवान् नारदः”[86]।**

आकाशे सहसा विद्युत्सम्पातो दृश्यते। विद्युत्सम्पातमाध्यमेन नारदस्यागमनवार्त्ता सूचिता। निर्मले आकाशे विद्युत्सम्पातोऽस्वाभाविकः। अतिथेरागमनवार्त्ता विद्युत्सम्पातेन सूचितेत्यलौकिकः। महर्षिर्नारदो न साधारणपुरुषः। स एव दिव्यः पुरुषः। दिव्यपुरुषदर्शनजनितो विस्मयोऽद्भुतरसस्य जनकः। तत्रभवतालंकारिकेण हेमचन्द्रेनोक्तम् - ‘दिव्यदर्शनादिविभावो नयनविस्ताराद्यनुभावो हर्षादिव्यभिचारी विस्मयोऽद्भुतः’[87] इति। उर्वशी महर्षिं नारदं दृष्ट्वा चमकिता जाता। नारदं दृष्ट्वा सर्वे विस्मिता भवन्ति। अयम्प्रकारको विस्मयः चमत्कारः। अयञ्चमत्कारोऽद्भुतरस एव। अत्र कालिदासेन कृतं दिव्यवस्तु-प्रयोगदर्शनेनाद्भुतरसप्रयोगवैचित्र्यं हेमचन्द्रसम्मतम्। अस्मिन् अंशे ‘निरभ्रेविद्युत्सम्पातः’ इत्युक्त्या दिव्यपुरुषं नारदमालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च ‘विद्युत्सम्पातः’ इत्यंशे दिव्यभाव विभावनोद्रेकात् उद्दीपनविभावः। अपि च नेत्रविकाशप्रकाशनात् अनुभावः। किञ्च अंशेऽस्मिन् विस्मयेन हर्षभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

[86]विक्रमो. (पञ्चमाङ्कः)

[87]काव्यानुशासनम्

पुनश्च दृश्यते यत् –

**“नारदः – त्रिकालदर्शिभिर्मुनिभिरादिष्टः सुरासुरविमर्दो भावी। भवांश्च सांयुगीनः सहायोः नः। तेन त्वया न शस्त्रं संन्यस्तब्यम्। इयं चोर्वशीयावदायुस्तव सहधर्मचारिणी भवत्विति।**

**उर्वशी – (अपवार्य) अहो शल्यं मे हृदयादपनीतमिव”[88]।**

अत्र दृश्यते यद् उर्वशी नारदस्यागमनवार्त्तां श्रुत्वा चमकिता सञ्जाता। नारदेनोक्तं यद्देवासुरयोर्युद्धे पुरुरवो देवतायाः प्रधानरूपेण सहायकः। अतएवात्र तेन न शस्त्रं संन्यस्तव्यम्। पञ्चमाङ्के नृपस्य पुत्रदर्शनकारणात् पुनः विप्रलम्भशृङ्गरसः सहृदयैर्मनसानुभूयते। नाट्यकारेण चातुर्य्येनाद्भूतरसप्रयोगेनास्य विप्रलम्भरसस्यो प्रसङ्गो निवारितः। अङ्केऽस्मिन् इन्द्रस्य संवादेन नारदस्योपस्थितिरद्भूतरसात्मिकीति प्रतीयते। उर्वशी सर्वदैवपुरुरवसः सहधर्मिनी स्थातव्येति वार्त्तेन्द्रेण दत्तेत्युक्तं नारदेन। वार्त्तामिमां श्रुत्वा उर्वशी आश्चर्यान्विताभवत्। वाणप्रस्थग्रहणेच्छुं राजानं निवारयितुं नारदवृत्तान्तोऽङ्केस्मिन्नावश्यकः। अयं वृत्तान्तः सत्यमेव विस्मयसूचकः। अयम्प्रकारो विस्मयोऽद्भुतरसस्य उत्स एव। अस्याद्भुतरसस्य आश्रयो नारदः। आलम्बनविभावस्तावद् उर्वशीति। इन्द्रस्य संवादः उद्दीपनविभावः। अपरा भावा अपि विलसन्त्यत्र। एतेन अद्भुतरस उद्भवति। अंशेऽस्मिन् ‘त्रिकालदर्शिभिर्मुनिभिः’ इत्युक्त्या मुनिमालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च ‘सुरासुरविमर्दीभावी’ इत्यंशे विभावनोद्रेकात् उद्दीपनविभावः। एवञ्च पुलकभावप्रकाशनात् अनुभावः दृश्यते। किञ्च अस्मिन् अंशे विस्मयेन हर्षभावप्रकाशनात् व्यभिचारिभावोऽपि सूच्यते।

[88]विक्रमो. (पञ्चमाङ्कः)

## ग) मालविकाग्निमित्रे नाटके अद्भुतरसस्य व्यवहारविधिः

कालिदासेन तदीये मालविकाग्निमित्रे रूपकेऽपि अद्भुतरस उपन्यस्तः।

दिङ्मात्रमुदाहरणं तावत् ---

**“विदूषकः – अविहा! अविहा! उपस्थिता देवी पीठमर्द्दिकां पण्डितकौशिकीं पुरस्कृत्य तत्रभवती धारिणी”[89] इति ।**

गणदास-हरदत्तौ आत्मनः विवादनिरासनाय नृपसमीपमागतवन्तौ। तयोर्वार्ता श्रुत्वा नृपो विवादस्य निरसनार्थं राजमहिषीं धारिणीं विचारकरूपेण आह्वयति। राजमातारमालोक्य विदूषकः परमानन्दं लब्धवान्। परन्तु धारिण्या सह कौशिकीं दृष्ट्वा स किञ्चिदाश्चर्यचकितोऽभूत्। सा कौशिकी महती विदूषीति सत्यम्। क्षुद्रविवादस्य निरसनाय एतादृश्यामहत्या विदुष्याः समागमं दृष्ट्वा विदुषको विस्मितोऽभवत्। चमत्कृतेन विदुषकेनोक्तम् - ‘अविहा अविहा’। ‘अविहा अविहा’ इति विस्मयार्थकमव्ययम्। अत्र सम्भ्रमे द्विरुक्तिः। अयम्प्रकारो विस्मयोऽद्भुतरसस्य द्योतकः। अस्मिन् अंशे कौशिकीमवलम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च विवादनिरसनार्थं कौशिक्या आगमनदर्शनं खलु उद्दीपनविभावः। अपि च ‘अविहा अविहा’ इत्यंशे अनुभावः सूच्यते। किञ्च अंशेऽस्मिन् विस्मयेन रोमाञ्चभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

तृतीयाङ्के पुनः अद्भुतरसस्य प्रयोगवैचित्र्यं नयनयोरापतति –

**“राजा – ननु विस्मयादेतदवलोकयामि।**

---

[89]मालवि., (प्रथमाङ्कः)

**रक्ताशोकरूचा विशेषितगुणो विम्बाधरालक्तकः**

**प्रत्याख्यातविशेषकं कुरुवकं श्यामावदातारुणम्।**

**आक्रान्ता तिलकक्रिया च तिलकैर्लग्नद्विरेकाञ्जनैः**

**सावज्ञेव सुखप्रसाधनविधो श्रीर्माधवो योषिताम्"।।[90] इति**

**(उभौ नाट्येनोद्यानशोभां निर्वर्ण्ययतः)**

दिवसं यावत् राजकार्यं कृत्वा राजा परिश्रान्तोऽभवत्। तस्य चित्तं कर्मविमुखं जातम्। श्रमपरिहाराय राज्ञावश्यमेव प्रमोदोद्यानं गन्तव्यमिति विदूषकेणोक्तम्। अतो राजा प्रमोदोद्यानं प्रविष्टवान्। प्रमोदोद्याने वसन्तकालः समागतः। प्रमोदोद्याने वसन्तकालस्य शोभा स्त्रीणां प्रीतिपूर्वकम् अलङ्करणकर्मभिः वर्धिता जाता। तत्र स्त्रीणामधरालक्तकान्तिः परिभूतापि रक्ताशीककुसुमसौन्दर्यमतीव रमणीयमिति प्रतिभाति। उपरिगतानि भ्रमरशोभितरक्तरागपुष्पाणि स्त्रीणां ललाटस्थमध्यकृष्णचिह्नितसिन्दुरतिलकेभ्यो रमणीयानीति। वसन्तलक्ष्मीर्वेशाद्युवतिवेशानामपकर्षात् स्त्रीणां तत्रावज्ञामिव करोतीति। एतादृशीं प्रमोदवनशोभां दृष्ट्वा नृपो विस्मयाभिभूतः।अत्र श्लोके 'सुखप्रसाधनविधौ श्रीर्माधवी' इत्युक्त्या श्रीमाधवीमालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च 'रक्ताशोकरूचा विशेषितगुणो विम्वाधरालक्तकः प्रत्याख्यातविशेषकं कुरुवकं श्यामावदातारुणम् आक्रान्ता तिलकक्रिया च तिलकैर्लग्नद्विरेकाञ्चनैः' इत्यंशे उद्यानस्य सौन्दर्यमत्र उद्दीपनविभावः। अपि च 'उभौ नाट्येनोद्यानशोभां निर्वर्णयतः'

[90]मालवि., (अङ्कः – ३, श्लोकः – ५)

इत्यंशे उच्चनीचवाक्यप्रयोगैः अनुभावः। किञ्च श्लोकेऽस्मिन् विस्मयेन हर्षभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

नाटकेऽस्मिन् चतुर्थाङ्केऽद्भुतरसस्य प्रयोगवैविध्यं दृश्यमानतां गतम्। तदुदाहरणं तावत् -

**"राजा - अहो! दीर्घरोषता तत्रभवत्याः। अतः परं कथय"[91] इति।**

नृपस्य मालविकां प्रति पूर्वरागं दृष्ट्वा इरावती नृपं प्रति प्रकुपिताभवत्। इरावत्या दीर्घसमयं रोषं दृष्ट्वा राजाश्चर्यान्वितः। इरावत्यास्तदानीमुपज्ञातो रोषः इदानीं राज्ञा कदापि न दृष्टः।अस्मिन् अंशे 'तत्र भवत्या' इत्युक्त्या इरावतीमवलम्ब्य विभावनोद्रेकात् आलम्बनविभावः। मालविकाश्च वकुलवालिकायाश्च दुरवस्था स्मरणं अत्र उद्दीपनविभवः। किञ्च अंशेऽस्मिन् विस्मयेन रोमाञ्चभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

किञ्च, अङ्केऽस्मिन् पुनश्च दृश्यते–

**"(नेपथ्ये) – आश्चर्य्यमाश्चर्य्यम्। अपूर्ण एव पञ्चरात्रे दोहदस्य मुकुलैः सन्नङ्गस्तपनीयाशोकः! यावद्देव्यै निवेदयामि"[92]।**

नेपथ्ये उद्यानपालिकाया उक्तिरियम्। अत्र वाराङ्गनाचरणाघातमद्य पञ्चरात्रे अपूर्णम् एव तपनीयशोकः स्वर्णवर्णीयशोकपुष्पवृत्तम्, मुकुलैः सन्नङ्गं जुष्टमिति। तथाहि मालविकायाः पदाघातात् पञ्चरात्राभ्यन्तरे एव अशोके पुष्पमुकुलानि जातानीति

---

[91]मालवि., (चतुर्थाङ्कः)
[92]मालवि.

दृष्ट्वा सर्वे उद्यानपालिकाः विस्मयाभिभूताः। इमां वार्त्तां उद्यानपालिकाः धारिणीदेव्यै निवेदयन्ति।अस्मिन् अंशे 'मुकुलैः सन्नङ्गस्तपनीयाशोकः' इत्युक्त्या विभावनोद्रेकात् आलम्बनविभावः। अपि च 'अपूर्ण एव पञ्चरात्रे' इति चित्रमत्र इत्यंशे विभावनोद्रेकात् उद्दीपनविभावः। किञ्च अंशेऽस्मिन् विस्मयेन रोमाञ्चभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

पुनश्च नाटकेऽस्मिन् पञ्चमाङ्के लक्ष्यतेऽद्भुतरसप्रयोगवैचित्र्यम् –

**" देवी - मालविके! इतः प्रेक्षस्व! कातरा ते सङ्गीतसहकारिणी रोचते?**

**उभे (मालविकां दृष्ट्वा) ! (इति प्रणम्य) तया सह वाष्पं विकिरतः। अहो भर्त्तृदारिका! जयतु भर्त्तृदारिका।**

**(सर्व्वे सविस्मयमवलोकयन्ति)"[93] इति।**

विदर्भराजः मालविकायाः गीतशिक्षार्थं द्वे शिल्पीदारिके प्रेषितवान्। शिल्पीदारिके मालविकां सहसा दर्णमात्रतःपरमेव वाष्पविसर्जिते मालविकापि दर्शनमात्रतः वाष्पविसर्जितेत्युमामवस्थां दृष्ट्वा सर्व्वे धारिण्यो राजप्रभृतयश्च विस्मिता भवन्ति। परिचितदर्शनमात्रेण मनसि शोकानन्दभावो जायते। परन्तु अपरिचितदर्शनात् कथं मालविका क्रन्दतीति चिन्तयित्वा सर्व्वे विस्मिता भवन्ति।अस्मिन् अंशविशेषे मालविकात्र आलम्वनविभावः। तस्याः पूर्वपरिचयस्मृतिरेवात्र उद्दीपनविभावः। अपि च 'सर्व्वे सविस्मयमवलोकयन्ति' इत्यंशे नेत्रविकाशात् अनुभावः सूच्यते। किञ्च अंशेऽस्मिन् विस्मयेन आवेगभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

[93]मालवि., (पञ्चमाङ्कः)

पुनश्चाङ्केऽस्मिन् दृश्यते यत् –

**“राजा – मौद्गल्य! ननु कलभेन युथपतिरनुकृतः’ इति।**

**कञ्चुकी – देव अयं कुमारः।**

**नैतावत्ता वीरविजृम्भितेन चित्तस्य नो विस्मयमादधाति।**
**यस्या प्रधृष्यः प्रभवस्त्वमुच्चैरग्नेरपां दग्धुरिवोरुजन्मा॥**[94]

राजा मौदगल्यं तस्य मानसिकीमवस्थां वर्णयत्यत्र । यथा करिराजस्य तुलनया कलभस्य कार्यकारित्वमाश्चर्य्यकरं तथैव महावीरादस्य शिशोर्वसुमित्रस्यासाधारणं यौवनपराजयं दृष्ट्वा राजा स्वयमाश्चर्यान्वितः। यो ह्यसाधारणः स एवालौकिकः। अलौकिकः एव अद्भुतः। अयम्प्रकारोऽद्भुतः विस्मय एव।अत्र श्लोके ‘देव अयं कुमारः’ इत्युक्त्या कुमारमालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च ‘नैतावत्ता वीरविजृम्भितेन’ वारवानलस्य उत्सस्वरूपम् उर्वं स्मृत्वा कञ्चुका विस्मयापन्नाभावात् इति स्मरणमत्र उद्दीपनविभावः। अपि च श्लोकेऽस्मिन् श्लाघारूपैः अनुभावः सूच्यते। किञ्च श्लोकेऽस्मिन् विस्मयेन हर्षभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

---

[94]मालवि., अङ्कः-५, श्लोकः-१७

## ।। भासीयेषु नाटकेष्वद्भुतरसवैचित्र्यम् ।।

रसप्रयोगे भासोऽद्वितीयः। तस्य नाटकेषु सर्वेषां रसानामेकत्र समाहारो दरीदृश्यते ।

**क) भासविरचिते प्रतिमानाटके अद्भुतरसस्य प्रयोगवैचित्र्यं नयनयोरापपति बहुशः। उदाहरणैर्विषयोऽयं परिष्क्रियते–**

नाटकेऽस्मिन् प्रथमाङ्केऽद्भुतरसप्रयोगवैचित्र्यं दृश्यते यत् -

**"रामः – (ततः प्रविशति रामः) हन्त भोः !**

**आरब्धे पटहे स्थिते गुरुजने भद्रासने लङ्घिते**

**स्कन्दोच्चारणनम्यमानवदनप्रच्योतितोये घटे ।**

**राज्ञाहूय विसर्जिते मयि जनो धैर्येण मे विस्मितः**

**स्वः पुत्रः कुरुते पितुर्यदि वचः कस्तत्र भोः ! विस्मयः"।।**[95]

रामचन्द्रस्योपरि राज्यभारं प्रदाय दशरथो वनं गमिष्यतीति दशरथः चिन्तितवान्। महाराजस्यादेशानुसारेण शीघ्रं राजपुरुषा अभिषेकोपयोगिसामग्रीसम्भाराः संगृहीताः। अभिषेकोपकरणानि सर्वाण्येव सुसज्जितानि। नगरवासिनो जना अभिषेकदर्शणार्थं मन्त्रिभिः साकं समभ्यागताः। अभिषेकस्य मङ्गलहेतुना भगवान् वशिष्टदेवोऽप्युपस्थितः। रामचन्द्रो भद्रासनमुपविष्टवान्। अतः पटहध्वनिः श्रूयते। सहसा महाराजो रामचन्द्रमाहूय भद्रासनादन्यत्र गमनायादिष्टवान्। पितुरादेशपालनं पुत्राणां धर्म एवेति स्वाभाविकः। अतो नास्ति विस्मयकारणमिति परन्तु समयेऽस्मिन्

[95]प्रतिमा (अङ्कः - १, श्लोकः -४)

भद्रासनत्यागोऽस्वाभाविकः। रामचन्द्रस्यैतादृशं व्यवहारं दृष्ट्वाभिषेकदर्शनार्थमागता जनाः विस्मिताः। अत्रापि विस्मयत्वादद्भुतरसः।अत्र श्लोके आलम्बनविभावः रामचन्द्रः । उद्दीपनविभावश्च रामचन्द्रस्य स्थैर्यमिति । अपि च 'विसर्जिते मयि जनो धैर्येण' इत्यंशे स्तम्भरूपेण अनुभावः। किञ्च 'राजाहूयः' इत्यंशे विस्मयेन वितर्कभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

पुनश्च अङ्केऽस्मिन् दृश्यते यत् –

**"रामः – मैथिलि ! त्वं तावत् किं तर्कयसि ?**

**सीता – तर्कयाम्यार्यपुत्रेणाभणित्वा किञ्चिद् दीर्घं निःश्वस्य महाराजस्य पादमुलयोः पतितमिति ।**

**रामः – सुष्ठु तर्कितम्। अल्पं तुल्यशीलानि द्वन्द्वानि सृज्यन्ते।**

**तत्र हि पादयोरस्मि पतितः।**

**समं वाष्पेण पतता तस्योपरि ममाप्यधः ।**

**पितुर्मे क्लेदितौ पादौ ममापि क्लेदितं शिरः ।। "** [96]

अस्मिन् अंशे आलम्बनविभावः सीता । स्वल्पतया दम्पत्तीः तुल्यस्वभावत्वमुद्दीपनविभावः । अपि च 'समं वाष्पेण पतता' इत्युक्त्या अश्रुरूपेण अनुभावः भवति। किञ्च 'ममापि क्लेदिं शिरः' इत्युक्त्या विस्मयेन अश्रुनेत्रभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

[96]प्रतिमा (अङ्कः - १, श्लोकः -६)

पुनश्चदृश्यते यत् –

**“सीता – ततस्ततः।**

**रामः - ततोऽप्रतिगृह्यमाणेष्वनुनयेषु आसन्नजरादोषैः स्वैः प्राणैरस्मि शापितः।**

**सीता – ततस्ततः।**

**रामः – ततस्तदानीम्,**

**शत्रुघ्नलक्ष्मणगृहीतघटेऽभिषेके छत्रे स्वयं नृपतिना रुदता गृहीते।**

**सम्भ्रान्तया किमपि मन्थरया च कर्णे राज्ञः शनैरभिहितं च न चास्मि राजा”।।**[97]

राज्यभारविषये रामचन्द्रस्य सर्वथोपेक्षाभारः प्रदर्शित इति दृष्ट्वा दशरथः चिन्तितोऽभवत्। यदि दशरथप्रदत्तं राज्यं रामचन्द्रेण न गृहीतं तर्हि जराग्रस्ताः प्राणाः दुःखेन त्यजति दशरथः। पितुराज्ञापालनाय रामचन्द्रो राज्यभारान् वोढुमङ्गीचकार। तदा अभिषेकसमये शत्रुघ्नलक्ष्मणाभ्यां स्तीर्थाम्बुपूर्णो घटो उत्तोलितः। दशरथः आनन्दाश्रुविमुञ्चितेन छत्रः गृहीतः। तस्मिन् समये क्षिप्रमागता कैकेयीपरिचारिकया मन्थरया दशरथकर्णे मृदुस्वरेण किमपि कथितम्? तस्मात्कारणाद्रामचन्द्रो राजा न भविष्यति। एतद्दृष्ट्वा सामाजिकानां मनसि विस्मयोद्रेको भवति। मन्थरा किं कथयति इति चिन्तयित्वा ते विस्मिता भवन्ति। विस्मयाख्यस्थायिभावादत्राद्भुतरसः। अत्र श्लोके ‘मन्थरया’ इत्युक्त्वा मन्थरामालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च ‘सम्भ्रान्तया’ इत्युक्त्या विभावनोद्रेकात् उद्दीपनविभावः। एवञ्च ‘न चास्मि राजा’

---

[97]प्रतिमा , (अङ्कः - १, श्लोकः -७)

इत्यंशे उद्वेगरूपेण अनुभावः। किञ्च 'सम्भ्रान्तया किमपि मन्थरया' इत्युक्त्वा विस्मयेन वितर्कभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

पुनश्च, नाटकेऽस्मिन् द्वितीयाङ्के अद्भुतरसप्रयोगवैचित्र्यं दृश्यते यत् –

**"राजा – (ऊर्ध्वमवलोक्य) अये रामकथाश्रवणसन्दिग्धहृदयं ममाश्वासयितुमागताः पितरः"।**

**राजा – (आचम्यावलोक्य)**

**अयममरपतेः सखा दीलिपो, रघुवयमत्रभवानजः पिता मे ।**

**किमभिगमनकारणं भवद्भिः सह वसने समयो ममापि तत्र ।।**[98]

रामचन्द्रः सीतया लक्ष्मणेन सह वन गतवान्। प्रियपुत्रविरहेन दशरथस्य मरणं प्रत्यासन्नमिति। अतोऽभिषेकाय श्रीघ्रं पुत्रो भरतः मातुलभवनादागतवान्। रामः इति शब्दश्रवणेन दशरथस्य हृदयो व्याकुलोऽवत्। तस्य तापितहृदयमाश्वासयितुं पितृपुरुषगणः आर्विभूतः। प्रपितामहो दिलीपः पितामहो रघुः पिता अजः चेति सर्वे आर्विभूताः। पितृपुरुषान् सहसा दृष्ट्वा दशरथः चमत्कृतोऽभवत्। यस्मिन् लोके ते निवसन्ति तत्र तस्मिन् लोके तैः सह निवासे दशरथस्य समयकालः समागत इति चिन्तयित्वा दशरथो विस्मितोऽभवत्। अतोऽत्राद्भुतरसः।अस्मिन् अंशे दिलीपादि पितृपुरुषादयः आलम्बनविभानः । अलौकिकपितृपुरुषाणाम् अलौकिकदर्शणः खलु उद्दीपनाविभावः । अस्मिन् अंशे विस्मयेन उद्वेगभावप्रकाशनात् व्यभिचारिभावः सूच्यते। रोमाञ्चोऽत्रानुभावः ।

---

[98]प्रतिमा, (अङ्कः - २, श्लोकः -२१)

अङ्केऽस्मिन् पुनश्च दृश्यते –

**“काञ्चुकीय – (सर्वतो विलोक्य) अहो तु खलु रामनिर्गमनदिनादारभ्य शून्यैवेयमयोध्या संलक्ष्यते। कुतः –**

**नागेन्द्रा यवसाभिलाषविमुखाः सास्रेक्षणा वाजिनो**
**ह्लेषाशून्यमुखाः सवृद्धवनितावालाश्च पौरा जनाः।**
**त्यक्ताहारकथाः सुदीनवदनाः क्रन्दन्त उच्चैर्दिसा**
**रामो याति यया सदारसहजस्तामेव पश्यन्त्यमी।।”[99]**

अत्र श्लोके द्रुमामही च आलम्बनविभावौ। तयो गमनशीलत्वम् उद्दीपनविभावः। अपि च रोमाञ्चोऽनुभावः। अपि च आवेगोऽत्र व्यभिचारिभावः।

नाटकेऽस्मिन् तृतीयाङ्के अवलोक्यते यत् –

**“सुमन्त्रः – जयतु महा (इत्यर्धोक्तसविषादम्) अहोस्वरसादृश्यम् ! मन्ये प्रतिमास्थो महाराजो व्याहरतीति”।[100]**

प्रतिमागृहसमीपे तरुणः राजा इव अज्ञातपरिचयः कश्चिज्जनः मूर्च्छितभावेन पतितः। अयं न अपरः कोऽपि जनः। स एव भरतः। मूर्च्छितं भरतं सहसा दृष्ट्वा सुमन्त्रः विस्मितोऽभवत्।अस्मिन् अंशे ‘प्रतिमास्थो महाराजो’ इत्युक्त्या महाराजमालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च ‘स्वरसादृश्यम् ! मने प्रतिमास्थो महाराजो’ इत्यंशे विभावनोद्रेकात् उद्दीपनविभावः। अपि च ‘इत्यर्धोक्तसविषादम्’

[99]प्रतिमा, अङ्कः – २, श्लोकः-२

[100]तत्रैव, (अङ्कः - ३)

इत्यंशे स्तम्भरूपानुभावः। किञ्च ‘मन्ये’ इत्यंशे विस्मयेन वितर्कभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

नाटकेऽस्मिन् पञ्चमाङ्के अद्भूतरसप्रयोगवैचित्र्यं दृश्यते यत् –

**“रावणः – (स्वगतम्) अहो असह्यः खल्वस्यावलेपः। (प्रकाशम्) अये विद्युत्सम्पात इव दृश्यते। कौशल्यामात! इहस्थमेव भवन्तं पूजयति हिमवान्। एष काञ्चनपार्श्वः”।**

तातस्य दशरथस्यानुसंवत्सरश्राद्धविधिः समुपस्थितः। अतः किम्प्रकारेण पिण्डदानादिक्रिया सम्पद्यतेति चिन्तयति रामचन्द्रः। ततः कुटिरसम्मुखे परिव्राजकवेषो रावणः उपस्थितः। अतिथिसत्कारात्परं रामचन्द्रः श्राद्धकल्पविषये प्रदत्तेषु वस्तुषु मध्ये केन द्रव्येन पितॄणां तृप्तिरिति रावणं पृच्छति। विरुढेहषु दर्भाः, अषोधीषु तिलाः, कलायं शाकेषु, मत्स्येषु महाशफरः, पक्षिषु वार्ध्राणसः, पशुषु गौः खड्गो वा इत्येते मनुष्याणां विहिता इति रावणेनोक्तम्। तथापि कालिकापुराणे –

‘नलग्रीवो रक्तशीर्षः कृष्णपादः सितच्छदः ।

वार्धाणसः स्यात् पक्षीशो मम विष्णोरतिप्रियः ॥’ इति

तथा चोक्तम् मानवे – ‘वार्ध्राणसस्य मासेन तृप्तिर्द्वादशवार्षिकीते।’ इति। एषु द्रव्येषु यदि काञ्चनपार्श्वमृगमांसैस्तर्पितः तर्हि पितरः पुत्रफलानि लभन्ते। परन्तु मृगोऽयं हिमालयं प्राप्नोति। कथं अस्मिन् वनप्रदेशे मृगमांसः प्राप्यते इति चिन्तयति रामचन्द्रः सहसा विद्युत्सम्पात इव दृश्यते एकः काञ्चनपार्श्वमायामृगः। अस्मिन् वनप्रदेशे

काञ्चनपार्श्वमृगं दृष्ट्वा रावणो विस्मितोऽभवत्।अस्मिन् अंशे 'असह्य खल्वस्यावलेपः' इत्युक्त्या पितृहीनरामचन्द्रः विभावनोद्रेकात् आलम्बनविभावः। रावनेन पितृहीनस्य रामचन्द्रस्य श्राद्धकल्पनाश्रवणम् अत्र उद्दीपनविभावः। अपिच 'अये विद्युत्सम्पा इव दृश्यते' इत्यंशे नेत्रविकाशरूपेण अनुभावः दृश्यते। किञ्च 'इहस्थमेव भवन्तं पूजयति हिमवान्। एष काञ्चनपार्श्व' इत्युक्त्या विस्मयेन हर्षभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

पुनश्च अङ्केऽस्मिन् दृश्यते यत् –

**"रावणः – अये अयमर्घ्यमादायोपसर्पति राघवः। एष इदानीं पूजामनवेक्ष्य धावन्तं मृगं दृष्ट्वा धनुरारोपयति राघवः।**

**अहो बलमहो वीर्यमहो सत्त्वमहो जवः ।**

**राम इत्यक्षरैरप्लैः स्थाने व्याप्तमिदं जगत्"।।**[101]

काञ्चनपार्श्वमृगं दृष्ट्वा राघवः परमान्दितः यत् तातस्यैतानि भाग्यानि स्वयमिहागतानि। अतः श्राद्धस्यार्घ्यमादायोपसर्पति राघवः। धावन्तं गृगं दृष्ट्वा राघवो धनुरारोपयति। धनुर्धारिनं राघवं दृष्ट्वा रावणः चमत्कृतोऽभवत्। तस्य शारीरिकी शक्तिः मनसः स्थैर्यं द्रुतगमनशक्तिः लोकोत्तरवीर्यादिमत्वात् पुरुष इव रामचन्द्रो दृश्यते। रामः इत्यल्पैरक्षरैर्जगद्परिव्याप्तम्। यो हि लोकोत्तरः स ह्यलौकिक एव चमत्कारः। अयम्प्रकारो चमत्कारोऽद्भुत एव। अत्र श्लोके 'राम इत्यक्षरैरल्पैः' इत्युक्त्या रामचन्द्रमवलम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च 'बलमहो वीर्यमहो

[101]प्रतिमा, (अङ्कः - ५, श्लोकः - १४)

सत्त्वमहो जवः’ इत्यंशे विभावनोद्रेकात् उद्दीपनविभावः। ‘अहो’ इत्यंशे गदगदस्वररूपेण अनुभावः दृश्यते। किञ्च ‘स्थाने व्याप्तमिदं जगत्’ इत्युक्त्या विस्मयेन रोमाञ्चभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

**ख) अधुना भासस्य श्रेष्ठे रूपके स्वप्नवासवदत्ते प्राप्यमानमद्भुतरसं पर्यालोचयामि-**

नाटकेऽस्मिन् प्रथमाङ्के अद्भूतरसप्रयोगवैचित्र्यं दृश्यते यत् –**“ततः प्रविशति परिव्राजकवेशो यौगन्धरायणः आवन्तिकावेशधारिणी वासवदत्ताच**

**यौगन्धरायणः – (कर्णं दत्त्वा) कथमिहाप्युत्सार्यते। कुतः –**

**धीरस्याश्रमसंश्रितस्य वसतस्तुष्टस्य वन्यैः फलैः**

**मानार्हस्य जनस्य वल्कलवतस्त्रासः समुत्पाद्यते ।**

**उत्सिक्तो विनयादपेतपुरुषो भाग्यैश्चलैर्विस्मितः**

**कोऽयं भो निभृतं तपोवनमिदं ग्रामीकरोत्याज्ञया”।।**[102]

लावाणकग्रामे अवस्थानसमये उदयनमहिषी वासवदत्ता अग्निदाहेन दग्धा मृतेति वार्तां सर्वतः उद्घोष्य परिव्राजकवेशी यौगन्धरायणः आवन्तिकावेशधारिण्या वासवदत्तया सह मगधराज्यप्रान्तवर्तिनि कस्मिंश्चिदाश्रमपदं समुपागतः। आश्रमस्थानं खलु मुनीनां वासस्थानम्। तत्र मुनयः भोगस्पृहारहिताः सन्तो जीवनं धारयन्ति। सामान्यैर्वन्यफलैस्ते तुष्टा जाताः। आश्रमपदं खलु जनकोलाहलवर्जितं निभृतं स्थानम्। तत्र केचित् पुरुषाः बलदृप्तेन तपोवनं कोलाहलपूर्णं कुर्वन्ति। मुनिहृदये त्रासं

[102]स्वप्न., (अङ्कः - १. श्लोकः - ३)

सञ्चारयन्ति ते। अतो धनयौवनोद्धताः पुरुषाः तपोवनविरोधि आचरणं कुर्वन्ति। एतेषां पुरुषाणामाचरणं दृष्ट्वा यौगन्धरायणो विस्मितोऽभवदिति कृत्वाद्भुतरसः।अत्र श्लोके ‘उत्सिक्तो विनयादपेपुरुषः’ इत्युक्त्या राजपुरुषामालम्ब्य विभावनोद्रेकात् आलम्ब्नविभावः। अपिच ‘उत्सिक्तो विनयादपेतपुरुषो भागैश्चलैः’ इत्यंशे विभावनोद्रेकात् उद्दीपनविभावः। अपि च ‘कर्णं दत्त्वा’ इत्यंशे अनुभावः दृश्यते। किञ्च ‘कोऽयं भो निभृतं तपोवनमिदं ग्रामीकरोत्याज्ञया’ इत्यंशे विस्मयेन वितर्कभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

पुनश्च, चतुर्थाङ्के दृश्यते यत् –

**“राजा – वयस्य वसन्तक ! अयमयमागच्छामि।**

**कामेनोज्जयिनीं गते मयि तदा कामप्यवस्थां गते**

**दृष्ट्वा स्वैरमवन्तिराजतनयां पञ्चेषवः पातिताः।**

**तैरद्यापि सशल्यमेव हृदयं भूयश्च विद्धा वयं**

**पञ्चेषु मदनो यदा कथमयं षष्ठः शरः पातितः”।।**[103]

मदनपीडितां स्वावस्थां वर्णयति राजा। तदा विवाहात्प्राग् उज्जयिनीं गत्वा राजा वासवदत्तां दृष्टवान्। वासवदत्तां दृष्ट्वा राजा प्रेमानुरक्तोऽभवत्। मदनदेवेन तस्योपरि पञ्चवाणो निक्षिप्त इति मन्यते राजा। अधुनापि राज्ञः हृदये वासवदत्तायाःप्रेमासक्तिः न हि नूनेति। परवर्त्तिनि काले उदयनः पद्मावतीमुद्वहति स्म। पद्मावतीं प्रति राजा प्रेमानुरक्तो जातः। यदा वासवदत्तां दृष्ट्वा राज्ञो हृदये कामभावो जायते तर्हि पद्मावतीदर्शनात्परं

[103]स्वप्न, (अङ्कः - ४, श्लोकः - १)

कथं राज्ञो मनसि प्रेमानुभावो जायते इति चिन्तयति राजा। मदनदेवस्य पञ्चवाणः इति प्रसिद्धिस्तदा कथं केन प्रकारेण षष्ठः शरः पतितः उदयनस्योपरि? यदि पञ्चसंख्यका एव शरा मनोभावनियताः स्युस्तर्हि कथं षष्ठशरव्यवहारो मदनदेवकृत इति विचिन्त्य राजा स्वयमाश्चर्यान्वितोऽभवत्।अत्र श्लोके 'स्वैरमवन्तिराजतनयां' इत्युक्त्या अवन्तिराजतनयालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अत्र वासवदत्ता आलम्बनविभावः । रूपयौवनसम्पनायां वासवदत्तायाः दर्शणसुखकरणस्मरणं यथा राजानां कामपिड़ीतं करोति तथा षष्ठस्वरनिपतनमिवतमेव पीड़यतिः इति मानसरत्युद्रेकादत्र उद्दीपनविभावः ।अपि 'दृष्ट्वा' इत्युक्त्या भ्रूक्षेपरूपेण अनुभावः दृश्यते। किञ्च 'कथमयं षष्ठ शरः पातितः' इत्यंशे विस्मयेन वितर्कभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

**ग) <u>अविमारके रूपकेऽप्यद्भुतरसस्य प्रयोगवैविध्यं संलक्ष्यते -</u>**

तत्र प्रथमाङ्के दृश्यते यत् -

**"भूतिकः – (सविस्मयम्) अहो प्रच्छन्नरत्नता पृथिव्याः। अस्य तावत् पुरुषस्य निर्व्याजेन विक्रमेन मन्दीभूता इव मनस्विनां विक्रमबुद्धयः। एकस्तु मे संशयः, किमर्थमात्मनमन्वयं चाच्छादयति। अथवा कः शक्तः सूर्यं हस्तेनाच्छादयितुम्। इह हि,**

**छन्ना भवन्ति भूवि सत्पुरुषाः कथञ्चित् स्वैः कारणैर्गुरुजनैश्च नियम्यमानाः ।**

**भूयः परव्यसनमेत्य विमोक्तुकामा विस्मृत्य पूर्वनियमं विवृता भवन्ति"॥**[104]

राजकुमारी कुरङ्गी उद्याने क्रीडारतासीत्। सहसा मदान्धाख्यो गजस्तत्रोपस्थितः। मदस्रवनजलार्द्रदुर्दिनं तदाननम्। गजं दृष्ट्वा सर्वे भीता भवन्ति। गजभयात् सर्वा स्त्रिय उच्चैः हाहाकारं कुर्वन्ति। सहसा कश्चित् सुदर्शनीयस्तरुणोऽप्यनहङ्कारः दाक्षिण्यवान् वलवान् च कुमारः तत्रोपस्थित्य राजकुमारीं रक्षति स्म। तरुणोऽयं स्वयम् अकुलीनः इति वार्ता सर्वत्र प्रसार्य अकुलीनस्यैतादृशानि महत्त्वानि वैशिष्ट्यानि न दृश्यन्ते इति सर्वजनविदितम्। अस्य पुरुषस्य विक्रमेन मन्दीभूता इव मनस्विनां विक्रमबुद्धयः। अतः भूतिकमनसि संशयो जायते। किमर्थं तरुणः आत्मपरिचयं गोपयति? अस्मिन् जगति आत्मानमाच्छादयन्ति। ते पुरुषा यदा परव्यसनं दृष्ट्वा तदा परव्यसनविमुक्ताय गुरुजननियमं विस्मृत्यात्मानं प्रकाशिताः परन्तु तत्रभवान् परव्यसनविमोक्तुकामः कुमारः आत्मपरिचयं न प्रकाशितवान् इति दृष्ट्वा भूतिको विस्मितोऽभवदिति हेतोरद्भुतरसः। अस्मिन् अंशे 'अस्य तावत् पुरुषस्य' इत्युक्त्या पुरुषमालम्ब्य इति अविमारकमवलम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अविमारकस्य परव्यसनसहायादिरूपं माहात्म्यकीर्तनमत्र उद्दीपनविभावः । माहात्म्यश्रवणात् परं विस्मयोऽयं अनुभावः। किञ्च 'एकस्तु मे संशयः' इत्यंशे विस्मयेन वितर्कभावप्रकाशनात् व्यभिचारिभाव सूच्यते।

पुनश्च द्वितीयाङ्के दृश्यते यत् –

**"अविमारकः – अहो विचित्रस्वभावता जगतः। कुतः**

[104]अवि.मा., (अङ्कः - १, श्लोकः - ६)

**व्यामृष्टसूर्यतिलको विततोडुमालो नष्टातपो मृदुमनोहरवशीतवातः ।**

**संलीनकामुकजनः प्रविकीर्णशूरो वेषान्तरं रचयतीवमनुष्यलोकः"।।**[105]

अविमारकः विदूषकेण सह नगरं प्रविष्टवान्। नगरस्य अपूर्वशोभां दृष्ट्वा स चमत्कृतः। अस्तमितो भगवान् दिवाकरः। नभोमण्डले नक्षत्राणि दृष्यन्ते। मृदुमनोहरशीतलवातः प्रवहति। कामुकजना अभिसारं गच्छन्ति। सैन्यिकाः नगरस्य रक्षाकार्ये निविष्टः। पूर्वा दिक् तु तिमिरानुलिप्ता इव दृश्यते। पश्चिमाशा सन्ध्यानुरुणा च भाति। द्विधा विभक्तमन्तरिक्षम् अर्धनारीश्वररूपमिव दृश्यते। जगत ईदृशं विचित्ररूपं दृष्ट्वाविमारको विस्मितोऽभवत्।विचित्रस्वभावा जगदत्र आलम्बनविभावः। तस्याः जगतः अलौकिकं रूपं दर्शनं खलु उद्दीपनविभावः जगतः विचित्रस्वभावतां परिलक्ष्य अविमारकस्य विस्मयविजरितः नेत्रविकाशोऽत्र अनुभावः। किञ्च श्लोकेऽस्मिन् विस्मयेन अविमारकस्य चित्ते हर्षभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

नाटकेऽस्मिन् तृतीयाङ्के दृश्यते यत् –

**"मागधिका – साधु विलासिनी ! साधु ! आत्मनो नामसदृशं कृतम्। एतस्मिन् शिलातले रचितं शयनम्"**[106]**।**

कुरङ्ग्या सह मागधिका प्रमदोद्याने आलापरता। अतो प्रदोषः समागतः। सर्व्वेण सखिजनेन सह कुरङ्गी प्रसादं प्रवेशयति। सन्ध्याकाले कुरङ्गी शयानं इच्छति। विलासिनी शिलातले विरचितानि शयनासनानि। विलासिनी रचितम् अपूर्वं शयानासनं

---

[105]अवि.मा., (अङ्कः - २, श्लोकः – १३)

[106]अवि.मा., (अङ्कः -३)

दृष्ट्वा मागधिका चमकिता यत् एतादृशं सुसज्जितं शयानासनं मागधिका पूर्वे न दृष्टा। विलासिनी नामसदृशं कार्यं कृतमिति मागधिका विलासवतीम् उक्तवती। अपूर्ववस्तुदर्शनात् जायते विस्मय इति मन्यते विद्यानाथः तदीये ग्रन्थे। तेनोक्तम् - 'अपूर्वार्थदर्शनाच्चित्तविस्तारो विस्मयः।' इति। अत एवात्र भासेन कृतोऽविमारकस्य नाटकस्य अद्भूतरसप्रयोगः विद्यानाथसम्मतः।अस्मिन् अंशे 'विलासिनी' इत्युक्त्या विलासिनिमालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च 'साधु विलासीनि साधु !' इत्यंशे साधुवादरूपेण अनुभावः प्रकाशयति। किञ्च 'आत्मनो नामसदृशं कृतम्' इत्युक्त्या विस्मयेन हर्षभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

अङ्केऽस्मिन् पुनश्च दृश्यते यत् –

**"अविमारकः – इदं तयोक्तं जालयन्त्रम्। (विघाट्य प्रविश्यावलोक्य च) साधु कुन्तिभोज ! साधु! उत्प्रहसित इव भवनेनानेन स्वर्गः। तथाहि,**

**हंसाः स्वपन्ति मनिरत्नशिलातलेषुवैदूर्यमौक्तिककृताः सिकताप्रतानाः ।**

**स्तम्भाः प्रवालविहिताः किमिह प्रलापैर्मन्दीभवन्ति मणिदीपहताः प्रदीपाः"।।**[107]

जालमार्गेन राजगृहं प्रविश्य अविमारकः सहसा चमत्कृतः। प्रसादः इष्टकखण्डेन काष्ठखण्डेन च निर्मितः इति स्वाभाविको दृश्यते। परन्तु अयं राजप्रसादः मणिरत्नेन निर्मितः। तत्र जलाशये हंसो निर्भयेन स्वपन्ति। समुद्रो वैदूर्यमणिना निर्मितः। अस्य राज्यस्य तटभूमिः शोभिता। प्रासादस्य शोभाया स्वर्गशोभा मन्दीभवतीति अविमारकेन मन्यते। अविमारकस्य राजप्रासादादयं प्रासादोऽतिशयः सुन्दरः। अतिशयवस्तुदर्शनमेव

[107]अवि.मा, (अङ्कः - ३, श्लोकः - १६)

विस्मयः। अयम्प्रकारो विस्मितोऽद्भूतः।[108] स्वर्गतुल्यं भवनमत्र आलम्बनविभावः। 'उत्प्रहसिह इव भवनेनानेन स्वर्गः' इत्यंशे नानामणिरत्नशिलदिभिः सज्जितस्य भवनस्य नयनसुखकरस्य दृश्यस्य अवलोकनम् अत्र उद्दीपनविभावः। साधुवादेन प्रोत्साहदानमत्र गदगदत्वेन प्रकाश्यते। अतएवात्र गदगदभावोऽत्र अनुभावः आवेगश्च व्यभिचारिभावः।इत्यंशे साधुवादरूपेण अनुभावः प्रकाशितः।

नाटकस्यास्य चतुर्थाङ्के दृश्यते यत् –

**"अविमारकः – (अग्निं प्रविश्य सकुतूहलम्) किमिदं वर्तते।**

**दग्धाः स्फुलिङ्गनिकरैर्निपतन्ति वृक्षा ज्वालाश्च मे मलयचन्दनपङ्कशीताः ।**

**अग्निर्दयां हि कुरुते मदनातुरेऽपि पुत्रं पितेव च परिष्वजति प्रहृष्टः"।।**[109]

राज्ञः मनः अद्य प्रियाविरहेन वेदनातुरं जातम्। प्रियाविरहात्तस्य मानसिक्यवस्था अतीव दुःखदायिनीति कृत्वा स राजा प्राणान् त्यक्तमुद्यतः। प्राणान् विसर्जितुं स राजा वह्नौ प्रविष्टः। स्वाभाविकगत्याग्निः देहं दहति। परन्तु अयमग्निरविमारकं निकषा मलयचन्दनमिव प्रतिभाति। पिता यथा सानन्दं पुत्रमालिङ्गति तथैवाग्निदेवः आनन्देनाविमारकम्। मन्यते यदग्निस्तस्य स्वाभाविकं वैशिष्ट्यं परित्यजति। अग्निर्दाहकरूपेण परिचितः। परन्तु अवस्थां दृष्ट्वा अविमारको विस्मितोऽभवदिति कृत्वाद्भुतरसोऽत्राभिव्यक्तः।अत्र श्लोके 'अग्निं प्रविश्य सकुतुहलम्' इत्युक्त्या अग्निरत्र आलम्बनविभावः। अग्नेः दाहादिविरुद्धानि कार्यानि अत्र उद्दीपनविभावः।

---

[108]तुलनीयं तावत् कालिदासस्य मेघदूते यक्षगृहस्य वर्णनायाम् - 'वापि चास्मिन् मरकतशिलाबन्धसोपानमार्गा' – उत्तरमेघस्य ११५मिते श्लोके

[109]अवि.मा., (अङ्कः - ४, श्लोकः - ८)

नेत्रविकाशरूपेण अनुभावः प्रकाशितः। किञ्च 'अग्निं प्रविश्य सकुतुहलम्' इत्युक्त्या विस्मयेन रोमाञ्चभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

नाटकेऽस्मिन् पुनश्च दृश्यते यत् –

**"अविमारकः - वाढम् ! (खडगं गृहीत्वा सविस्मयम्) अहो खडगस्य प्रभावः।**

**प्रच्छन्नरूपस्त्वशनिः कथञ्चित्खड्गीकृतः स्यात्तु तडित्कलापः ।**

**निर्भर्त्सयन् सूर्यकृतां प्रदीप्तिं वनं दावाग्निः सहसाभ्युपैति ।।**[110]

अत्र श्लोके 'खडगस्य प्रभावः' इत्युक्त्या खडगमालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च 'प्रभावः' इत्यंशे खड़गस्य प्रभावः खलु विभावनोद्रेकात् उद्दीपनविभावः। अपि च 'प्रच्छन्नरूपस्त्वशनिः' इत्युक्त्या प्रश्नास्तु अनुभावाः। किञ्च 'कथञ्चित्खडगीकृतः स्यात्तु तडित्कलापः' इत्युक्त्या विस्मयेन वितर्कभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

पुनश्च दृश्यते यत् –

**विद्याधरः – अहो वीर्यमग्निपुत्रस्य। अस्य खड्गस्य प्रभावं विद्याधरेष्वपि कतिचित् सहन्ते । अग्निः खलु भगवानिमं रक्षति।**

**अविमारकः – (खड्गं दृष्ट्वा) अहो भगवतीनां विद्यानां प्रभावः।**

**दिव्यं स्वभावं समुपागतोऽस्मिस एव नामास्मि गुनैर्विशिष्टः ।**

[110]अवि.मा., (अङ्कः - ४, श्लोकः - १५)

**इदं यदा निर्गुणमर्त्यवृन्दैर्न ज्ञायते चास्ति च मे शरीरम्"।।**[111]

खड्गः स्वाभाविकतया लौहनिर्मितः। लौहः कदापि मणिसदृशो नोज्ज्वलः। परन्तु अयं खड्गो दीप्तियुक्तः। इन्द्रस्य खड्ग इव विद्याधरस्य खड्गोऽलौकिक इव राजते। अविमारको विद्याधरप्रदत्तं खड्गं दृष्ट्वा चमत्कृतोऽभवत्। खड्गोऽयं न लौहनिर्मितः। तडित्शिखया निर्मितेयम्। अस्य वज्रस्य प्रभावात् रविप्रभापि मलिना दृश्यते। खड्गस्यास्यासाधारणं वैशिष्ट्यं दृष्ट्वाविमारको विस्मितोऽभवत्। यन्न साधारणं तच्चासाधारणम्। अत्रासाधारणभावश्चमत्कारः। चमत्कारोऽयम् अद्भुतः।विद्याधरस्य खड्गो न साधारणः। सर्वे न धारयितु पारयन्ति तदेव खड्गम्। विद्याधरेषु केचनास्य प्रभावं सहितुमलम्। दैवपुरुषोऽस्य खड्गस्य प्रभावं धारयन्ति। अविमारकः खलु न दैवः पुरुषः। परन्तु खड्गधारणेन स न दग्धो जातः। अविमारकः खड्गस्य प्रभावेन प्रभावितो न भवतीति प्रेक्ष्य विद्याधरस्य मनसि विस्मयेन चमत्कारो जायते । अविमारकोऽपि स्वात्मनि विशिष्टगुणसमावेशाद्विस्मितो जातः। साधारणगुणोऽयं हि चमत्कारः। चमत्कारोऽयं विस्मय इति कृत्वाद्भुतः।दिव्यः खड़गोऽत्र आलम्बनविभावः। स्वर्गीयविद्यायाः समुपागमनुपलब्धिः अत्र उद्दीपनविभावः। वात्रविकाशोऽत्र अनुभावः। वितर्कोऽत्र व्यभिचारिभावः।

---

[111]अवि.मा, (अङ्कः - ४, श्लोकः - १६)

पुनश्च दृश्यते यत् –

**“विदूषकः - आश्चर्यमाश्चर्यम् ! कुत इदानीमेतस्यागमः।**

**विदूषकः – आश्चार्यमाश्चर्यम्। अहमपि तावददृश्यः। मम शरीरमस्ति वा नास्ति वा। उच्छिष्टं करिष्यामि। थु थु”**[112] **इत्यत्र ।**

अङ्गुरीयकं स्मारकचिह्नरूपेण व्यवहृयते साधारणतया। परन्तु अङ्गुरीयकमत्र न स्मारकचिह्नरूपेण व्यवहृतम्। अङ्गुरीयकस्य एकदा दैवीशक्तिरासीत्। अङ्गुरीयकस्य परिधानेन मानवोऽदृश्योऽभवत्। विद्याधरेण प्रदत्तमङ्गुरीयकमविमारकस्य सकाशे दृष्ट्वा विदूषकश्चकितोऽभवत्। अङ्गुरीयकपरिधानेन विदूषकोऽदृश्योऽभवत्। अङ्गुरीयकस्येमां शक्तिं दृष्ट्वा विदूषको विस्मितोऽभवदिति हेतोरद्भुतरसः। स्वशरीरस्य अदर्शनजन्यम् इन्द्रजालमत्र उद्दीपनाविभावः।अस्मिन् अंशे ‘अहमपि तावददृश्य’ इत्युक्त्या इन्द्रजालमालम्ब्य विभावनोद्रेकात् उद्दीपनविभावः। अपि च ‘मम शरीरमस्ति वा नास्ति वा’ इत्यंशे विस्मयेन वितर्कभावप्रकाशनात् व्यभिचारिभावः सूच्यते।अस्मिन् अंशे अङ्गुरीयमालम्ब्य विभावनद्रेकान् आलम्ब्यनविभावः।

[112]अविमारकस्य चतुर्थाङ्कः

**घ)चारुदत्तमिति रूपकेऽप्यद्भुतरसस्य प्रयोगवैविध्यं संलक्ष्यते -**

तत्र नाटकेऽस्मिन् प्रथमाङ्के अद्भुतरसप्रयोगवैचित्र्यं दृश्यते यत्-

**विदूषकः-'अन्यच्चाश्चर्यम्। ममोदरमवस्थाविशेषं जानाति[113]।'**

नाटकस्य मुख्यचरित्रःचारुदत्तः। जन्मसूत्रेण स ब्राह्मणः परन्तु वृत्तिना वणिकः स आसीत्। वैभवप्राचुर्येउज्जयिन्यां न कोऽपि तस्य तुल्यासीत्। स कदापि मित्राणां कश्चित्विभावैरमभितः। प्रभूतदानेन शनैः शनैः स दरिद्रो भवति। दानशीलता मानवस्यमहद्गुणः। परन्तु भूरिदानेन दारिद्र आयाति। अधिकदानं मानवानां पक्षतः नहितकर भवतीति मन्यते महामतिना चानक्येण[114] । चारुदत्तस्य एकःवयस्योऽस्ति। तस्य नाम मैत्रेय इति। स पूर्वे चारुदत्तस्य गृहे सयन्तेन अहोरात्रःसुगन्धिव्यञ्जनः मोदकखाद्यस्य खादितवान्। परवर्तिकाले स जीवनधारणायजीविकां अन्विष्यमानः अन्यत्र गच्छति। अभावस्य ताडनया स अल्पेन तुष्टोभवति। स तस्य उदरमवस्थाविशेषं जानाति। एकदा बहुकमप्योभवं भरिष्यतिदीयमानं न याचतेऽदीयमानं न प्रत्याचष्टे। अद्य स अल्पेन सन्तुष्टः जातः। आत्मनम्उदरविशेषस्य परिवर्तनं दृष्ट्वा मैत्रेयो विस्मितो जातः। तोनोक्तम्- 'अन्यच्चाश्चर्यम्'। अस्मिन् अंशे 'ममोदरवस्थाविशेषम्' इत्युक्त्या परिवर्त्तितंमुदरम् अत्र आलम्बनः ।अभावस्य मानसिकी नाड़नात्र उद्दीपनः। अपि च 'ममोदरवस्थाविशेषम्' इत्यंशे अवस्थाविशेषमिति विभावनोद्रेकात् उद्दीपनविभावः। किञ्च अंशेऽस्मिन् विस्मयेन धृतिभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

---

[113]चारुदत्तम्- (अङ्कः-१)

[114]अतिदर्पे हता लङ्का अतिमाने च कौरवाः।
अतिदाने वलिर्बद्धः सर्वमत्यन्तगर्हितम्।।

पुनश्च नाटकेऽस्मिन् तृतीयाङ्के दृश्यते यत्-

**“विदूषकः-भो वयस्य! कः कालः कृतपरिघोषणतया निःस्मपाता राजमार्गाः।कुक्कुरा अप्यवसुप्ताः। वयं निद्रां न लभामहे। अन्यच्चेदानींमाश्चर्यम्। इमां हतवीणांन रमे। अधिकदृढस्थाने विच्छिन्नतन्त्रीका भवतु[115]।”**

सङ्गीतशालात् प्रत्यागतायां काले निःसम्पाता राजमार्गाः। राजमार्गेसारमेया प्रसुप्ताः। गृहे प्रत्यागमनकाले चारुदत्त वीणाया प्रशंसां करोति। वीणायासुरः सर्वे रम्यन्ते। वीणाया सुरः यस्य न रमते स एव अद्भूतचरित्रस्य। वीणायासुरः विदूषकस्य न रमते। वीणा यदि विच्छिन्नतन्त्री भवतु तर्हि विदूषकःआनन्दितो भवति। विदूषकः विचित्रचरित्रस्य पुरुषः यो न सङ्गीतस्य मधुरसुरंरमते। यो न स्वाभाविका स एव विचित्रः। विचित्रचरित्र एव विस्मयजनकः। अयंप्रकारो विस्मय अद्भूत एव। अत्र विदूषकमालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च प्रेक्षणरूपेण अनुभावः सूच्यते। किञ्च अंशेऽस्मिन् विस्मयेन चञ्चलभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

पुनश्च नाटकेऽस्मिन् चतुर्थाङ्के दृश्यते यत्-

**“चेटी- भण भण! कोऽस्यागमः।**

**सज्जलकः – त्वत्स्नेहात् साहसं कृतम्।**

**उभे- हुं साहसिकाः।**

[115]चारुदत्तम्- अङ्कः-3

**सज्जलकः- यथा प्रभाते मया श्रुतं श्रेष्ठिचत्वरे प्रतिवसति सार्थवाहपुत्रश्चारुदत्तोनाम।**

**उभे- हुं।**

**"सज्जलकः- अयि,**

**"विषादस्त्रस्तसर्वाङ्गी सम्भ्रमोऽफुल्ललोचना।**

**मृहीव शरविद्धाङ्गी कम्पसे चानुकम्पसे "[116]।।**

**चेटी- सत्यं भण। सार्थवाहुकूले साहसं कर्वता त्वया कश्चित् कुलपुत्रः शास्त्रेणास्तिपरिक्षतो व्यापादितो वा।"**

सज्जलकः मदनिकाय स्पृहयतिस्म। चारुदत्तस्यगृहात् सज्जलकः वसन्तसेनया गच्छितालङ्कारान चोरितवान्। एषा वार्तासज्जलकस्य मुखात् श्रुत्वा मदनिका चमकिता जाता। सा विषादाभिभूता जाता।तस्या लोचनौ सम्भ्रमोत्फुल्लौ आस्ताम् तस्या सर्वाङ्गी चानुकम्पा।विषादसम्भ्रमानुकम्पाश्च अद्भूतरसस्य विभावानुभावव्यभिचारिभावाश्च। अतःमदनिकाया मनसि अद्भुतरसःसमुद्भूतः। अत्र श्लोके चेटीं मदनिकां प्रति प्रेमासाक्तः सज्जलकः प्रेमिकायाः पणमुक्त्यर्थं चारुदत्तगृहात् अलंकारान् चोरितवान्। ते अलंकारास्तु वसन्तसेनया चारुदत्तस्य गृहे न्यस्ता आसन्निति ज्ञातम्। तद् यथा रदनिका ज्ञातुं संमर्था अभवत्। तदा स्नेहात् सज्जलकेन यत् साहसं कृतं तदर्थं विश्वासवञ्चनाशङ्क्य विषादग्रस्ता अभवत् चेटी। अत्र विश्वासवञ्चनात् एवं साहसं कृतम् इत्यमुभूय चेटी विशादग्रस्ताभवन्निति

---

[116]चारुदत्तम्- अङ्कः-४, श्लोकः- ३

विशादमिश्रितविस्मयात् अद्भुतरसः। अलंकारा अत्र आलम्बनविभावः। चारुदत्तं प्रति विश्वासवञ्चना कृतेति चिन्तनम् उद्दीपनविभावः।'हुँ' इति नेत्रविकाशात् अनुभावः। अत्र आवेगभावप्रकाशान्त् व्यभिचारिभावः सूच्यते।

पुनश्च दृश्यते यत्-

**"विदूषकः-अहो गणिकावाटस्य सश्रीकता। नानापट्टणसमागतैरागमिकैः पुस्तकानिवाच्यन्ते! संयोज्यन्ते चाहारप्रकाराः। वीणा वाद्यन्ते। सुवर्णकाराअलङ्कारप्रकारणादरेण योजयन्ति [117]।"**

सज्जलकः चारुदत्तगृहात् स्वर्णालङ्कारान् चोरितवान्। एतान् अलङ्कारान् वसन्तसेना चारुदत्तं निकषा न्यासरूपेण रक्षितः।गच्छितवस्तु यदा चौर्येणापहृतं स्यात्। तदा चारुदत्तः चिन्तितोऽभवत्। तेन ज्ञायतेदुःखं न्यासस्य रक्षणम्। अतः स अलङ्कारस्य सममूल्यमेकं मुक्तावलीं विदूषकेनदत्वा वसन्तसेनाया गृहं प्रेरयति। विदूषकः गणिकागृहस्य शोभां दृष्ट्वाविस्तितोऽभवत्। नानादेशागतैः पण्डितैः पुस्तकानि पठ्यन्ते। शास्त्रवाक्यानिकेवलं ब्रह्मचर्याश्रमे पठ्यन्ते, गणिकागृहे न। गणिकागृहे वीणाः वाद्यन्ते। वीणासाधारणतया सङ्गीतशालायां वाद्यन्ते। स्वर्णकारा अलङ्कारप्रकारानादरेणयोजयनन्ति। गणिकागृहस्य विचित्रां शोभां दृष्ट्वा विदूषकः विस्मितोऽभवत्।अयं प्रकारः विस्मयोऽद्भूत एव।अस्मिन् अंशे 'गणिकाटस्य सश्रीकता' इत्यंशे गणिकागृहस्य शोभामालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च गणिकागृहेऽपि गृहस्थ्यसदृशा सज्जास्ति इति विस्मयकरं चिन्तनम् उद्दीपनविभावः।

---

[117]चारुदत्तम्- अङ्कः-४,( साहित्यसम्भारः-पृ.१२०)

अपि च 'सर्वतो विलोक्य' इत्यंशे नेत्रविकाशात्र अनुभावः सूच्यते। किञ्च अंशेऽस्मिन् विस्मयेन रोमाञ्चस्तु व्यभिचारिभावः सूच्यते।

नाटकेऽस्मिन् पुनश्च दृश्यते यत्-

**"गणिका- साधु! चारुदत्त साधु! भागधेयपरिवृत्ततायां दशायां मानावमानितंरक्षितम्।"**

चारुदत्त सच्चरित्रस्यब्राह्मणः आसीत्। सच्चरित्राणां मनुष्याणां भागधेयपरिवृत्ततायांदशायामात्मनः चरित्रं रक्षितम्। भाग्यविपर्ययेषु चारुदत्तो दरिद्रोऽपिन्यासद्रव्यस्य तुल्यमूल्यं द्रव्यं वसन्तसेनां हस्ते ददाति इति न विस्मृतः। चारुदत्तस्यचरित्रस्य महानुभवतां वुद्धिप्राखर्यञ्च दृष्ट्वा वसन्तसेना विस्मृता जाता।अस्मिन् अंशे 'साधु ! चारुदत्त साधु !' इत्युक्त्या चारुदत्तमालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। चारुदत्तस्य भाग्यविपर्ययदशायामपि स्वीयसम्मानरक्षितम् इति चिन्तमत्र उद्दीपनविभावः।अपि च 'भागधेयपरिवृत्ततायां दशायां मानावमानितरक्षितम्' इत्यंशे विभावनोद्रेकात् उद्दीपनविभावः। एवञ्च 'साधु ! चारुदत्त साधु !' इत्यंशे साधुवादोऽत्र अनुभावः सूच्यते। किञ्च अंशेऽस्मिन् विस्मयेन सम्भ्रमभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

**ङ)<u>प्रतिज्ञायौगन्धरायणमिति रूपकेऽप्यद्भुतरसस्य प्रयोगवैविध्यं संलक्ष्यते -</u>**

तत्र नाटकेऽस्मिन्प्रथमाङ्के अद्भुतरसप्रयोगवैचित्र्यं दृश्यते यत्-

**"यौगन्धारयणः- एतदपि मेघाविलक्षणम्। भोः वनजप्रच्छादितशरीरंनीलहस्तिनमुपन्यस्य प्रद्योतः स्वामिनं छलयितुकामः इति प्रवृत्तिरूपगता नः।अपीदानीं स्वमिनो बुद्ध्यातिक्रमो न स्यात्। अहो तु खलु वत्सराजभीरुत्वं प्रद्योतस्य। व्यक्तीकृतमसामर्थ्यमक्षौहिन्याः।**

**कुतः–**

**"व्यक्तं बलं बहु च तस्य न चैककार्यं**

**सङ्ख्यातवीरपुरुषं च न चानुरक्तम्।**

**व्याजं ततः समभिनन्दति युद्धकाले**

**सर्वं हि सैन्यमनुरागमृते कलत्रम्[118]।।"**

प्रजापालनमेव राज्ञः परमधर्मः[119] । प्रजापालनेन सह युद्धयात्रामेव राज्ञःअवश्यकर्तव्यः। युद्धं क्षत्रियस्य धर्मः। रणकौशलस्य कश्चित् नियमो वर्तते।तुल्यबलसम्पन्नो नृपेषु युद्धं भवति। समरे शास्त्रहीनं वधमनुचितमितिस्मृतिशास्त्रकारेण मनुना मन्यते[120] । अत्र महाराजो प्रद्यतो उदयनं जिघत्सतियः कौशलः अवलम्बनीयः स एव क्षत्रियधर्मस्य विरुद्धाचरणम्। समरेप्रतारणया शत्रुं हन्तुं न उचितम्। परन्तु प्रद्योतो प्रतारणाम्

---

[118]प्रतिज्ञायौगन्धरायणम्- अङ्क-१, श्लोकः-४

[119]मनु-'क्षत्रियस्य परो धर्मः प्रजानामेव पालनम्' -७/१४४

[120]मनु सप्तमोऽयायः- योधधर्मः (९०-९५श्लोकाः)

अवलम्बितः।वत्सराजस्य विषये महाराजस्य प्रद्योतस्य मनसि भीरुत्वं दृष्ट्वायौगन्धरायणः चमकितोऽभवत्। बहुवलत्वेऽपि प्रद्योतसेनः कथं क्षात्रधर्मस्यविरुद्धाचरणं क्रियते इति चिन्तयित्वा यौगन्धरायणः चमकितोऽभवत्।अयम्प्रकारः चमत्कारो विस्मयभावः। अयम्प्रकारो विस्मयोऽद्भूत एव।अस्मिन् अंशे 'अहो तु खलु वत्सराजभीरुतंप्रद्योतस्य' इत्युक्त्या प्रद्योतमहाराजमालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च 'व्याजं ततः समभिन्दति युद्धकाले' इत्यंशे विभावनोद्रेकात् उद्दीपनविभावः। किञ्च श्लोकेऽस्मिन् विस्मयेन गर्वभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

पुनश्च दृश्यते यत्-

**"हंसकः- अन्यच्चेदानीमाश्चर्यम्। अन्योन्यानुनयेन तत्रैको व्यवसितोऽकार्यंकर्तुम्। स दक्षिणाभिमुं परिवर्त्य भर्त्तारं समरव्यायामसंक्षोभितान् निरुपचारंसंक्षिप्य केशान् पीडयित्वा करेण करवालं प्रहारवेगमुत्पादयितुकाम आधावन्।"**[121]

महाराजः वत्सराजः नागवनं प्रविष्टवान्। तत्र स शत्रुसैन्यैः आक्रान्तः।समस्तदिवस युद्धं कुर्वन् परिश्रान्तो महाराजो मोहं गतः। शत्रुसैन्येनबहुप्रहरणेन तस्य तुरगः प्राणान् त्यजति। शत्रुवः वत्सराजं नगन्यशत्रुरिवमत्वा प्रधर्षितो भवति। शत्रुसैन्यानाम् अवसितावलेपेषु पापेषुप्रत्यागतप्राणाः वत्सराजस्य। ततः प्रत्यागत प्राणामिदानीं प्रेक्ष्यमान कश्चित्पापिष्ठसैन्यः वत्सराजस्य दक्षिणामुखं कृत्वा मसरव्यायामसंक्षोभितान्संक्षिप्य केशान् धृत्वा असिना सवेगं उत्पादयितुकामः आगतवान्। वत्सराजस्य एतादृशीम् अवस्थां दृष्ट्वा हंसकः

---

[121] प्रतिज्ञा. अङ्कः-१

चमकितोऽभवत्।यौगन्धरायणोऽपि हंसकमुखात् महाराजस्य अवस्थां श्रुत्वाविस्मितोऽभवत्।अस्मिन् अंशे ‘परिवर्त्य भर्त्तारम्’ इत्युक्त्या भर्त्तारमालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च ‘मे दक्षिणाभिमुं परिवर्त्य भर्त्तारं समरव्यायमसंक्षेभितान् निरुपचारं संक्षिप्य केशान् पीडयित्वा करेण करवालं प्रहारवेगमुत्पादयितुकाम आधावन्’ इत्यंशे विभावनोद्रेकात् उद्दूपनविभावः। अपि च अंशेऽस्मिन् अवज्ञाभावप्रकाशनात् अनुभावः सूच्यते। किञ्च अस्मिन् अंशे विस्मयेन गर्वभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

### च)<u>अभिषेकनाटकमिति रूपकेऽप्यद्भुतरसस्य प्रयोगवैविध्यं संलक्ष्यते</u>-

अभिषेकनाटकस्य प्रथमाङ्के अद्भुतरसप्रयोगवैचित्र्यं दृश्यते । तद्यथा -

**“वाली - श्रूयतां मत्पराक्रमः ।**

**“तारे! मया खलु परामृतमन्थनेऽपि**

**गत्वा प्रहस्य सुरदानवदैत्यसङ्घान् ।**

**उत्फुल्लनेत्रमुरगेन्द्रमुदग्ररूप -**

**माकृष्यमाणमवलोक्य सुविस्मितास्ते”[122] ॥**

रामलक्ष्मणाभ्यां सुग्रीव: हनुमता सह किष्किन्ध्यां प्रविष्टवान् । किष्किन्ध्यायां सुग्रीवस्य प्रवेशसंवादं श्रुत्वा वाली क्रोधान्वित: जात: । तस्यभार्या तारा महाराजं शान्तयति । परन्तु स

[122]अभि.ना.-अङ्कः-१, श्लोक: -११

न शान्तो नाभवत् । स क्रोधान्वित: सन् स्वस्य महावीरत्वं प्रख्यातवान्। तेनोक्तं - पुरा अमृतमन्थनकाले सुरासुरयो: युद्धंसंघठितम् । तदा सहसा तत्र वाली उपस्थितो बभूव । स उग्ररूपेन उत्फुल्लनेत्राभ्यांसहसा उरगेन्त्रम् आकृष्यमानमवलोक्य सर्वा देवता विस्मिता: जाता:। वानरस्यविचित्रां मूर्तिं दृष्ट्वा सर्वा देवता विस्मिता: । विचित्रवस्तुदर्शनेन मनसि विस्मयोजायते इति मन्यते आलङ्कारिकेन शारदातनयेन । तेनोक्तं - “विचित्रा यस्य भवति चित्तवृत्तिस्तरनतोऽद्भुत:”। अत्र भासेन कृतम् अद्भुतरसप्रयोगवैचित्रंशारदातनयसम्मतम् । अत्र श्लोके ‘तारे ! मया खलु परामृतनृनेऽपि’ इत्युक्त्या वालिमवलम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च, ‘गत्वा प्रहस्य सुरदानवदैत्यसङ्घान् उत्फुल्लनेत्रमुरगेन्द्रमुदग्ररूप’ इत्यंशे विभावनोद्रेकात् उद्दीपनविभावः। अपि च, नेत्रविकाशादत्र अनुभावः सूच्यते। किञ्च, अस्मिन् श्लोके विस्मयेन गर्वभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

अपि च, नाटकस्यास्य द्वितीयाङ्के अद्भुतरसप्रयोगवैचित्र्यं दृश्यतेयत्-

**“[तत: प्रविशति हनूमान् अङ्गुलीयकहस्त:]**

**हनुमान् - (लङ्कां प्रविश्य) अहो रावणभवनस्य विन्यास : ।**

**“कनकरचितचित्रतोरणाढ्या**

**मणिवरविद्रुमशोभितप्रदेशा ।**

**विमलविकृतसञ्चितैर्विमानै-**

**र्वियति महेन्द्रपूरीव भाति लङ्का [123] ॥**

123. अभि.ना-अङ्कः-२, श्लोक: -2

**अहो तु खलु,**

**एतां प्राप्य दशग्रीवो राजलक्ष्मीमनुत्तमाम् ।**

**विमार्गप्रतिपन्नत्वाद् व्यापादयितुमुद्यतः ”[124]॥**

सीतामन्वेष्टुं लङ्कायां रामचन्द्रेण हनुमन्तं प्रेरयति । लङ्काराज्यस्यापूर्वांशोभां दृष्ट्वा हनुमान् विस्मितोऽभवत् । तोरणाः साधारणतया इष्टकेनप्रस्तरखण्डेन निर्मिताः । परन्तु अत्र लङ्कायां तोरणाः कणकनिर्मिताः ।विभिन्नाः प्रदेशाः मूल्यैर्मणिभिर्विनिर्मिताः । लङ्कायांपुस्पकविमानाः पुष्पेण सुसज्जिताः । दृश्यमिदं देवलोक इव प्रतिभाति।लङ्कानगर्या अपूर्वां शोभां दृष्ट्वा हनुमान् चकितोऽभवत् । इयं शोभास्वर्गलोके तु दृश्यते, न सा मर्त्ये सम्भवति । अतः अनेनालौकिकशोभादर्शनेन हनुमतः मनसि विस्मयाभावो जायते । अपि तु, सआश्चर्यान्वितः। प्रभूतलक्ष्मीवाणसत्त्वेऽपि रावणः कथं विमार्गीभवतीतिचिन्तयित्वा हनुमान् चमत्कृतोऽभवत् । अयम्प्रकारश्चमत्कारो विस्मय एव। अयम्प्रकारो विस्मयोऽद्भुतरस एव । अत्र श्लोके ‘अहो रावणभवनस्य विन्यासः’ इत्युक्त्या भवनमालम्ब्य विभावनोद्रेकादालम्बनविभावः। अपि च, ‘कनकरचितचित्रतोरणाढ्या … विमलविकृतसञ्चितैर्धिमानैर्धियति महेन्द्रपूरीव भाति लङ्का’ इत्यंशे विभावनोद्रेकादुद्दीपनविभावः। अपि चात्र श्लोके श्लाघारूपैरनुभावः सूच्यते। किञ्च श्लोकेऽस्मिन् विस्मयेन चिन्ताभावप्रकाशनाद्व्यभिचारिभावः सूच्यते।

पुनश्च दृश्यते नाट्केऽस्मिन् यत् –

---

[124]अभि.ना-अङ्कः-२, श्लोकः -२

**हनुमान् - अहो व्यर्थो मे परिश्रमः । भवतु , एतद्धर्म्याग्रमारुह्यावलोकयामि। (तथा कृत्वा ) अये अयं प्रमदवनराशिः । इयं प्रविश्य परीक्षिक्ष्ये।(प्रविश्यावलोक्य) अहो प्रमदवनसमृद्धिः । इह हि,**

**"कणकरचितविद्रुमेन्द्रनीलै-**

**र्विकृतमहाद्रुमपङ्क्तिचित्रदेशा ।**

**रुचिरतरणगा विभाति शुभ्रा**

**नभसि सुरेन्द्रविहारभूमिकल्पा "[125] ॥**

**अपि च,**

**"चित्रप्रस्रुतहेमधातुरुचिराः शैलाश्च दृष्टा मया**

**नानावारिचरान्डजैर्विरचिता दृष्टा मया दीर्घिकाः ।**

**नित्यं पुष्पफलाढ्यपादपयुता देशाश्च दृष्टा मया**

**सर्वं दृष्टमिदं हि रावणगृहे सीता न दृष्टा मया "[126]॥**

सीतामन्विष्यमाणः हनुमान् लङ्कास्थं प्रमोदवनं प्रविष्टवान् । प्रमोदवनंमहीरुहैः पर्वतैश्च परिपूर्णम् । वृक्षाः साधारणतया पुष्प-फलैश्चपूर्णा भवन्ति । परन्तु इदं प्रमोदवनं कनकेन प्रबालेन च निर्मितम् ।पर्वताश्च शत्रुतुषारावृताः भवन्ति । ते च आकाशस्य गाम्भीर्यमुपहसितवन्तः। जलाशये जलचरा विचरन्ति। लङ्कानगर्याः

[125]अभि.ना-अङ्कः-२, श्लोकः -५

[126]अभि.ना-अङ्कः-२, श्लोकः -६

प्रमोदवनानिसुरेन्द्रविहारभूमिरिव प्रतिभाति । लङ्काराज्यस्य प्रमोदवनमिमामपूर्वां शोभां दृष्ट्वा हनुमान् विस्मितोऽभवत् । अपूर्ववस्तुदर्शनेन चित्तेविस्मयभावो जायते इति मन्यते आलङ्कारिकेण विद्यानाथेन । तेनोक्तं - "अपूर्वार्थदर्शनाच्चित्तविस्तारो विस्मयः"। अत्र लङ्कायाः अपूर्वां शोभांदृष्ट्वा हनुमतः मनसि विस्मयभावो जायते । अतएवात्र नाटकेअद्भुतरसप्रयोगवैचित्र्यं विद्यानाथसम्मतम् ।अत्र श्लोके 'अहो प्रमदवनसमृद्धिः' इत्युक्त्या प्रमादवनमवलम्ब्य विभावनोद्रेकादालम्बनविभावः। अपि च, 'कणकरचितविद्रुमेन्द्रनीलैर्विकृतमहाद्रुमपङ्किचित्रदेशा ।रुचिरतरणगा विभाति शुभ्रा' इत्यंशे विभावनोद्रेकादुद्दीपनविभावः। अपि च प्रेक्षणरूपैरनुभावः सूच्यते। किञ्च श्लोकेऽस्मिन् विस्मयेन चिन्ताभावप्रकाशनाद्व्यभिचारिभावः सूच्यते।

नाटकेऽस्मिन् तृतीयाङ्के अद्भुतरसप्रयोगवैचित्र्यं दृश्यते यत्-

**"शङ्कुकर्णः - अनन्तरीयं बलमाज्ञापयितुमर्हति महाराजः ।**

**रावणः- किमर्थम् ।**

**शङ्कुकर्णः- श्रोतुमर्हति महाराजः । कुमारं वानारमभिगच्छन्तं दृष्ट्वाहाराजेनानाज्ञापिता अप्यनुगताः पञ्चसेनापतयः ।**

**रावणः - ततस्ततः ।**

**शङ्कुकर्णः- ततस्तानभिद्रुतान् दृष्ट्वा किञ्चिद् भीत इव तोरणमाशित्यकाञ्चनपरिघमुद्यम्य निपातितास्तेन हरिणा पञ्च सेनापतयः ।**

**रावणः - ततस्ततः ।**

**शङ्कुकर्णः - ततःकुमारमक्षम्।**

**क्रोधात् संरक्तनेत्रं त्वरिततरऽयं स्यन्दनं वाहयन्तं**
**प्रावृट्कालाभ्रकल्पं परमलघुतरं वाणजालान् वसन्तम्।**
**तान् बाणान् निर्विधून्वन् कपिरपि सहसा तद्रथं लङ्घयित्वा**
**कण्ठे संगृह्य धृष्टं मुदिततरमुखो मुष्टिनानिर्जघान[127]।"**

अर्थात् हनुमान् लङ्कानगर्या अशोकवनं प्रविष्टवान्। तत्र अशोकवनं ध्वंसं जातम्। हनुमतो बन्धनाय रावणोबलान् प्रेरयति । बलान् दृष्ट्वा हनुमान् काञ्चनतीरमुत्थाय सेनापतीन् हन्ति । हनूमतः ईदृशीमलौकिकशक्तिं वार्त्ताञ्च शङ्ककमुखाच्छ्रुत्वा सालङ्केश्वरः रावणः चमत्कृतोऽभवत् । अलौकिकवस्तुदर्शनेन श्रवणेन च मनसिविस्मयभावो जायते इति मन्यते आलङ्कारिकेण जगन्नाथेन । तेनोक्तं यत्- "अलौकिकवस्तुदर्शनादिजन्मा आश्चर्याख्यो विस्मयः"। अतएवात्र नाट्यकारेणकृतमद्भुतरसप्रयोगवैचित्र्यं पण्डितराजजगन्नाथसम्मतम् । अस्मिन् अंशे 'निपातितस्तेन' इत्यंशे कुमारपक्षमालम्ब्य विभावनोद्रेकादालम्बनविभावः। अपि च 'गोधात् संरक्तनेत्रंत्वरिततरऽयं स्यन्दनं वाहयन्तंप्रावृट्कालाभ्रकल्पं परमलघुतरं वाणजालान् वसन्तम्' इत्यंशे विभावनद्रेकात् उद्दीपनविभावः। किञ्च अंशेऽस्मिन् विस्मयेन गर्वभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

नाटकेऽस्मिन् पुनः चतुर्थाङ्के अद्भुतरसप्रयोगवैचित्र्यं दृश्यते यत् –

**वरुणः - (ससम्भ्रम्)**

---

[127]अभि.ना-अङ्कः-३, श्लोकः -७

**“नारायणस्य नवरूपमुपाश्रितस्य**

**कार्यार्थमभ्युपगतस्य कृतापराधः।**

**देवस्य देवरिपुदेहहरात् प्रतूर्णं**

**भीतः शराच्छरणमेनमुपाश्रयामि “[128] ॥**

**(विलोक्य) अये अये भगवान्,**

**“मानुषं रूपमास्थाय चक्रशाङ्खगदाधरः।**

**स्वयं कारणभूतः सन् कार्यार्थी समुपागतः “[129] ॥**

लङ्कायां गमनाय रामचन्द्रःसहसोत्तिष्ठन् दिव्यास्त्रं प्रयोगकर्तुं स समुद्यतः । रामचन्द्रस्य क्रोधान्वितं रूपंदृष्ट्वा वरुणदेवः भीतो विस्मितश्च भवति । भगवान् नारायणः नररूपेण इवस्वयम् अवस्थितः । स्वयं कारणभूतः सन् कार्यसिद्ध्यर्थं स नारायणःसमुपस्थितः । सः रामचन्द्रः दिव्यपुरुष इव अवतीर्णः । दिव्यपुरुषदर्शनेनमनसि विस्मयभावो जायत इति मन्यते आलङ्कारिकेण हेमचन्द्रेण।तेनोक्तं यत्- “दिव्यदर्शनादि विभावो नयनविस्ताराद्यनुभावोहर्षादिव्यभिचारीविस्मयोऽद्भूतः”। अत्र रामचन्द्रस्य दिव्यरूपं दृष्ट्वा वरुणदेवो विस्मितोऽभवत्। अयम्प्रकारो विस्मयोऽद्भुत एव । अतएवात्र भासेन कृतमद्भुतरसप्रयोगवैचित्र्यं हेमचन्द्रसम्मतम् । अस्मिन् श्लोके ‘अये अये भगवान्’ इत्युक्त्या भगवन्तमालम्ब्य विभावनोद्रेकादालम्बनविभावः। अपि च ‘मानुषं रूपमास्थाय चक्रशाङ्गगदाधरः’ इत्यंशे विभावनोद्रेकादुद्दीपनविभावः। अपि च श्लोकेऽस्मिन्

[128] अभि.ना.-अङ्कः-४, श्लोकः -१३

[129] अभि.ना.-अङ्कः-४, श्लोकः -१४

सम्भ्रमरूपैरनुभावः सूच्यते। किञ्च श्लोकेऽस्मिन् विस्मयेन हर्षभावप्रकाशनाद्व्यभिचारिभावः सूच्यते।

पुनश्च दृश्यते यत् -

**“लक्ष्मण:- (विलोक्य) अये को नुखल्वेष:** ?

**“मनिविरचितमौलिश्चारुताम्रायताक्षो**

**नवकुवलयनीलो मत्तमातङ्गलील: ।**

**सलिलनिचयमध्यादुत्थितत्वेष श्रीघ्र**

**मवनतमिव कुर्वं स्तेजसा जीवलोकम् ”**[130] **॥**

महार्णव: जलचराणां निवासस्थानम्, न मानवस्य निवासस्थानम् । परन्तुमहार्णवस्य सलिलमध्यादुत्थित एक: पुरुषान् दृष्ट्वा लक्ष्मण: विस्मितोऽभवत् ।स पुरुष: असाधारण: । साधारणपुरुषो न कदापि सलिलमध्यादुत्थितो भवेत् । योन साधारण: स एवासाधारण: । असाधारण: खलु अलौकिक: । अलौकिकवस्तुविशेषदर्शनेन चित्ते विस्मयभावो जायते इति मन्यते आलङ्कारिकेण जगन्नाथेन । तेनोक्तं यत्- “अलौकिकवस्तुदर्शनादिजन्मा आश्चर्याख्यो विस्मय:”।अयम्प्रकरो विस्मयोऽद्भुत एव । अत्र अलौकिकं पुरुषं वरुणदेवं दृष्ट्वा लक्ष्मणविस्मितोऽभवत्। अतएवात्र कविना कृतमद्भुतरसप्रयोगवैचित्र्यंजगन्नाथसम्मतम्। अत्र श्लोके ‘किनुखल्वेषः’ इत्यंशे वरुणदेवमालम्ब्य विभावनोद्रेकादालम्बनविभावः। अपि च ‘मनिविरचितमोलिश्चारुताम्रायताक्षो नवकुवलयनीलो’ इत्यंशे विभावनोद्रेकादुद्दीपनविभावः।

---

[130]अभि.ना.-अङ्कः-४, श्लोक: -१५

अपि च 'विलोक्य' इत्यंशे नेत्रविकाशरूपैरनुभावः सूच्यते। किञ्च श्लोकेऽस्मिन् विस्मयेन वितर्कभावप्रकाशनाद्व्यभिचारिभावः सूच्यते।

पुनश्च नाटकेऽस्मिन् षष्ठाङ्के दृश्यते यत्-

**"सर्वे - भीमाश्चित्रं भो! सम्प्रमर्दः प्रवृत्तः ।**

**द्वितीयः(विद्याधरः) - अहो रामस्य शोभा ।**

**एता रावणजीमूताद् बाणधारा विनिस्सृताः ।**

**विभान्ति राममासाद्य वारिधारा वृषं यथा [131] ॥**

अत्र श्लोके 'अहो रामस्य शोभा' इत्युक्त्या राममालम्ब्य विभावनोद्रेकादालम्बनविभावः। अपि च 'रामस्य शोभा' इत्यंशे विभावनोद्रेकात् उद्दीपनविभावः। अपि च श्लोकेऽस्मिन् नेत्रविकाशरूपैरनुभावः सूच्यते। किञ्च अत्र श्लोके विस्मयेन हर्षभावप्रकाशनाद्व्यभिचारिभावः सूच्यते।

पुनश्चषष्ठाङ्के दृश्यते यत्-

**"प्रथमः(विद्याधरः) - अहो महत् प्रवृत्तं युद्धम् ।**

**शरवरपरिपीततीव्रबाणं**

**नरवरनैर्ऋतयोः समीक्ष्य युद्धम् ।**

**विरतनिविधशस्त्रपातमेते**

**हरिवरराक्षससैनिकाः स्थितश्चै[132]॥**

---

[131]अभि.ना.-अङ्कः-६, श्लोकः -१०

[132]अभि.ना.-अङ्कः-३, श्लोकः -१३

अत्र श्लोके ‘अहो महत् प्रवृत्तं युद्धम्’ इत्युक्त्या युद्धमावलम्ब्य विभावनोद्रेकादालम्बनविभावः। अपि च, ‘महत् प्रवृत्तं युद्धम्’ इत्यंशे विभावनोद्रेकादुद्दीपनविभावः। अपि च, श्लोकेऽस्मिन् त्रासरूपैरनुभावः सूच्यते। किञ्च, श्लोकेऽस्मिन् विस्मयेन रोमाञ्चभावप्रकाशनाद्व्यभिचारिभावः सूच्यते।

पुनश्च दृश्यते यत् -

**“द्वितीय:(विद्याधर:)- अहो तु खलु ,**

**“चारीभिरेतौ परिवर्तमानौ**

**रथेस्थितौ बाणगणान् वमन्तौ ।**

**स्वरस्मिजालैधरणिं दहन्तौ**

**सूर्याविव द्वौ नभसि भ्रमन्तौ[133]॥”**

ततो विद्याधरा रामरावणयोर्युद्धविशेषदर्शनाय पर्वतस्योपरिउपस्थितवन्त:। प्रतिभयदर्शनीया खल्वियं युद्धभूमि:। उदरीरिव विभातियुद्धभूमि:। वानराणां मुष्टिप्रहारेण भ्रूभङ्गनयनैर्दन्तौष्ठतीवैर्मुखा: राक्षसगणा:,शैला वज्रहता इव समरे पतिता:। अपि तु, निशितविमलखडगा:क्रोधविस्फारिताक्षा विमलविकृतद्रंष्टा नीलजीमूतकल्पा: राक्षसा: वानरान् हन्तुकामा: समुद्यता: । वाणरस्योपरि राक्षसा: शरान् निक्षिपन्ति । युद्धस्यभीषणत्वं दृष्ट्वा सर्वे विद्याधरा: विस्मिता: जाता: । भीषणं युद्धं दृष्ट्वाविद्याधरा: विस्मिता भवन्ति । अतिशयवस्तुदर्शनेन मनसि विस्मयभाव: जायतइति मन्यते नाट्यशास्त्रकारेण भरताचार्येण । तेनोक्तं यत् –“विस्मयोऽतिशयेनार्थदर्शनाच्चित्तविस्मृति:”।अतएवात्रकविना कृत्वाअद्भुतरसप्रयोगवैचित्रमाचार्यभरतसम्मतम् । अत्र श्लोके ‘चाराभिरेतौ’ इत्युक्त्या

---

133 अभि.ना.-अङ्कः-६, श्लोक: -१४

विभावनोद्रेकात् आलम्बनविभावः।अपि च, 'रथेस्थितौ बणगणान् वसन्तौ' इत्यंशे विभावनोद्रेकादुद्दीपनविभावः। अपि च, श्लोकेऽस्मिन् गर्वरूपैरनुभावः सूच्यते। किञ्च अत्र श्लोके विस्मयेन रोमाञ्चभावप्रकाशनाद्व्यभिचारिभावः सूच्यते।

पुनश्च दृश्यते यत् -

**"लक्ष्मण: - (प्रविश्य) प्रसीदत्वार्थ: । आर्य! आश्चर्यमाश्चर्यम् । एषा ह्यार्या,**

**विकशितशतपत्रदामकल्पा**

**ज्वलनमिहाशु विमुक्तजीविताशा ।**

**श्रममिह तव निष्फलं च कृत्वा**

**प्रविशति पद्मवनं यथैव हंसी[134] ॥**

अत्र श्लोके 'एषा ह्यार्या' इत्युक्त्या अर्यामवलम्ब्य विभावनोद्रेकादालम्बनविभावः। अपि च, 'विकशितशतपत्रदामकल्पा ज्वलनमिहाशु विमुक्तजीविताशु श्रममिह तव निष्फलं च कृत्वा' इत्यंशे विभावनोद्रेकादुद्दीपनविभावः। अपि च, अस्मिन् श्लोके वेपथुरूपैरनुभावः। किञ्च अंशेऽस्मिन् विस्मयेन स्तम्भभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

पुनश्च दृश्यते यत् -

**"हनूमान् –(प्रविश्य) जयतु देव: ।**

**एषा कनकमालेव ज्वलनाद् वर्धितप्रभा ।**

---

[134]अभि.ना.-अङ्कः-६, श्लोक: -२४

**पवना पावकं प्राप्य निर्विकारमुपागता [135] ॥**

**रामः-(सविस्मयम्) किमिति किमिति ।**

**लक्ष्मणः- अहो आश्चर्यम् ।**

**सुग्रीवः - (प्रविश्य) जयतु देवः ।**

**कोनुखल्वेष जीवन्तीमादाय जनकात्मजाम् ।**

**प्रणम्यरूपः सम्भूतो ज्वलतो हव्यवाहनात् [136] ॥**

**लक्ष्मणः - अये अयमार्यं पुरस्कृत्येत एवाभिवर्तते भगवान् विभावस्तुः ।"**

अस्मिन् अंशे 'जनकात्मजाम्' इत्युक्त्या जनकतनयामावलम्ब्य विभावनोद्रेकादालम्बनविभावः। अपि च, 'कोनुखल्वेष जीवन्तीमादाय' इत्यंशे विभावनोद्रेकादुद्दीपनविभावः। अपि च, रोमाञ्चभावरूपैरनुभावः सूच्यते। किञ्च अस्मिन् श्लोके विस्मयेन हर्षभावप्रकाशनाद्व्यभिचारिभावः सूच्यते।

**छ)वालचरितमिति रूपकेऽप्यद्भुतरसस्य प्रयोगवैविध्यं संलक्ष्यते -**

तत्र नाटकेऽस्मिन्प्रथमाङ्के अद्भुतरसप्रयोगवैचित्र्यं दृश्यते यत्-

**"[ तथा कृत्वासविस्मयम्]**

---

[135]अभि.ना.-अङ्कः-६, श्लोकः -२५

[136]अभि.ना.-अङ्कः-६, श्लोकः -२६

**हन्त द्विधा छिन्नं जलम् । इतः स्थितम् , इतः प्रधावति । दत्तो मेभगवत्या मार्गः । यावदपक्रामामि । (अवतीर्य) निष्क्रान्तोऽस्मि यमुनायाः । अयेहुंकारशब्द इव श्रूयते । व्यक्तं घोषसमीपे वर्तते मन्दभाग्यः । अत्र चसमीपघोषे मम वयस्यो नन्दगोपः प्रतिवसति । स खलु मया कंसाज्ञया निगलितःकशाभिहतश्च । यावत् प्रविशामि । अथवा रात्रौ वसुदेवः प्रविष्ट इति शङ्कितागोपालका भविष्यन्ति , तस्मादिह न्यग्रोध पादपस्याधस्तात् प्रभातवेलां रजन्याः प्रतिपलेयामि भो भो न्यग्रोधदेवताः! यद्ययं वालो लोकहितार्थं कंसवधार्थं वृष्णिकुले प्रसूतश्चेद्, घोषात् कश्चिदिहागच्छतु । न, न मम वयस्योनन्दगोप एवागच्छतु ।"**[137]

पुरा कंसो नाम एको नृशंसः नरपतिरासीत् । स प्रजाः अत्याचारं करोतिस्म । पापकर्मसु च लिप्तोऽभवत् । स युधि अजेयः नरपतिरासीत् ।देवकीवसुदेवयोः पुत्रेण तस्य मृत्युं भविष्यति सा कथा तेन ज्ञातेति राजज्योतिषीमुखात् । तस्मात् कारणात् स वसुदेवः देवकीञ्च कारागारे अवरुद्धम् अकरोत् । देवकीवसुदेवयोः सन्तानान् हतवान् स । तयोः अष्टमगर्भस्य पुत्रःकृष्णो जायते । तस्य रक्षार्थं वसुदेवः तस्यां निशायां तत्र बालकं गृहीत्वाउपक्रामति । तमसाच्छन्ना निशा दुर्योगपूर्णमासीत् । वसुदेवोऽपि कृष्णं क्रोड़े नीत्वागोकूलनगरं गमनाय यमुना तटे उपस्थितः । इयं यमुना तदा जलपूर्णा आसीत्।यमुनायां सलिले तरङ्गा उत्थिता । यमुना अतिक्रान्तः अत्यन्तं दुष्करम्इति चिन्तयित्वा स भीतोऽभवत् । सहसा यमुनायाः जलं द्विधा छिन्नम् ।नदीमध्येन मार्गो दृश्यते । वसुदेवः तेन मार्गेन गच्छति स्म । यमुनायाःहुङ्कारशब्दः प्रशमितो भवति । वसुदेवः निर्विघ्नेन घोषपल्लीसमीपे उपस्थितः ।यमुनानदीं गमनवेलायाम् अलौकिकं

137. वाच.-अङ्कः-१ (संस्कृतसाहित्यसम्भारः-पृ.१७४)

दृश्यं दृष्ट्वा वसुदेव: विस्मितोऽभवत्।तरङ्गाभिघातां यमुनामवलोक्य वसुदेवः नितरां विस्मितोऽभवत्। द्वेधा छिन्नं यमुनाया जलमत्र आलम्बनविभावः। 'दत्तो मे भगवत्या मार्गः'– इत्यलौकिकी भावना त्वत्र उद्दीपनाविभावः। विस्मितया नेत्रविकाशोऽत्र अनुभावः। अत्र हर्षमिश्रितावेगः व्यभिचारिभावः सूच्यते।

पुनश्च दृश्यते यत् -

**"नन्दगोप:- (कर्णं दत्ता सावधानम्) अम्मो स्वरयोगेन भर्ता वसुदेव इति जानामि। यावदुपसर्पस्यामि । अथवा तत्र मम किं कार्यम् । एतेन कंसस्य रज्ञो वचनंश्रुत्वापराद्धः कशाभिस्ताडयित्वा निगलैर्बद्धोऽस्मि । तन्न गमिष्यामि । अथवाधिक् खलु मे नृशंसभावम् । मम गुणसहस्रं कृतं , दुःखे दुःख्याति , सुखे सुखीभवति । तथापि स्मरामि राजशासनेन कृतमेकबन्धनम् । यावत् उपसर्पस्या ।इयं दारी किं करिष्यामि । भवत्वेवं तावत् करिष्यामि ।प्रभाता रजनी । एषभर्ता वसुदेवो दारकं गृहीत्वा स्थित: । जयतु भर्ता जयतु ।[138]"**

नन्दगोपः सावधानेन मित्रवसुदेवस्य उपस्थितिं चिन्तयन् पथि चलतिस्म। अतपरं सावधानेन कर्णं दत्त्वा कण्ठस्वरवैचित्र्येण वसुदेवस्य उपस्थितिमनुमीय विस्मितोऽभवत्। ततः सपुत्रं वसुदेवं दृष्टा नितरामाल्लादितोऽभवत्। अत्र वसुदेवः आलम्बनविभावः। वसुदेवः तावत् जगतः मङ्गलकामनया कंसवधाय कृष्णस्य जन्म स्यात् इति चिन्तननिवन्धनं ह्यत्र उद्दीपनविभावः। रोमाञ्चोऽत्रानुभावः। हर्षश्च व्यभिचारिभावः।

---

138. वाच. अङ्कः-१, संस्कृतसाहित्यसम्भारः-पृ.१७४ ।

पुनश्च दृश्यते यत् -

**“नन्दगोपः- यद् भर्ताज्ञापयति । आश्चर्यमाश्चर्यं भर्तः ! आश्चर्यम् । पांसून्मार्गयतो धरणीं भित्वा युगप्रमाणा सलिलधारोत्थिता ।**

**नन्दगोपः - आश्चर्यमाश्चर्यं भर्त्तः । आश्चर्यम् । इमे वन्धने पातिते ।”**[139]

वसुदेवः यमुनायामवतीर्ण घोषपल्ल्यामुपस्थितः। एकः पादपस्याधस्तात् वसुदेवो स्थित्वा प्रभातवेलायाम् अपेक्ष्यमाणः । तमसावृते रात्रौ कञ्चित् पुरुषं परिवेदनं दृष्ट्वा वसुदेवः चमत्कृतोऽभवत्।विलापस्य स्वरं श्रुत्वा वसुदेवः नन्दगोप इति आह्वयति।नन्दगोपः तस्य नामश्रवणेन भीतो जातः । परन्तु स स्वरः नन्दगोपः पूर्वतः प्रत्यभिजानाति । अतःकण्ठस्वरं श्रुत्वा स नन्दगोपः अग्रं गत्वा सहसा वासुदेवं दृष्ट्वा विस्मितोऽभवत् ।गभीररात्रौ तत्र वसुदेवः किं करोति इति चिन्तयित्वा नन्दगोपः विस्मितोऽभवत्।

शोधनाय सयावत् यमुनां गच्छति तावत् वसुदेवः नन्दगोप निवारितवान् । वसुदेवेनोक्तंघोषपल्ल्यां पांसुना शौचं करोति । घोषवासात् प्रकृत्या शुचिरेव । पांसुन्मार्गयतो धरणीं भित्वा युगप्रमाणा सलिलधारोत्थिता इति दृष्ट्वा नन्दगोपो विस्मितोऽभवत् । रूक्षभूमौ कथं सलिलधारा सम्भवति इति चिन्तयित्वा सनन्दगोपः विस्मितोऽभवत्।अस्मिन् अंशे ‘सलिलधारोत्थिता’ इत्यंशे सलिलमालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च ‘पांसुन्मार्गतयो धरणीं भित्त्वा’ इत्यंशे विभावनोद्रेकात् उद्दीपनविभावः। अपि च गदगदवचनानुसारैः अनुभावः सूच्यते। किञ्च अंशेऽस्मिन् विस्मयेन हर्षभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

---

[139]. वाच. – अङ्कः-१ (संस्कृतसाहित्यसम्भारः, पृ.-१७६)

पुनश्च नाटकेऽस्मिन् प्रथमाङ्के दृश्यते यत् –

**“नन्दगोपः - भर्तः! अतिदुर्वलौ मे वाहु मन्दरसदृशं वालकं ग्रहीतुं न समर्थौ।**

**नसुदेवः – वायस्य महावलपराक्रमः खलु भवान्।**

**[ततः प्रविशन्ति पञ्चायुधानि गरुडश्च]**

गरुडः- **अहं सुपर्णो गरुडो महाजवः**

**शाङ्गायुधस्यास्य रथो ध्वजश्च ।**

**पुरा हि देवसुरविग्रहेषु**

**वहामि भो विष्णुवलेन विष्णुम्** [140] **॥**

चक्रः **-** **चक्रोऽस्मि कृष्णस्य कराग्रशोभी**

**मध्याह्नसूर्यप्रतिमोग्रतेजाः ।**

**त्रिविक्रमे चामृतमन्थने च**

**मया हता दानवदैत्यसङ्घा** [141]**॥**

शार्ङ्गः- **शार्ङ्गोऽस्मि विष्णुकरलग्नसुवृत्तमध्या**

**स्त्री विग्रहात् पुरुषवीर्यबलातिदर्पा ।**

**यस्यार्थमाहवमुखेषु मयारिसङ्घाः**

**प्रभ्रष्टनागरथवाजिनराः प्रभग्नाः**[142]**॥**

---

[140]वाच.-अङ्क-१, श्लोकः - २१

[141]वाच.-अङ्क-१, श्लोकः - २२

[142]वाच.-अङ्क-१, श्लोकः - २३

कौमोकी- **कौमदकी नाम हरेर्गदाह**

**माज्ञावशात् सर्वरिपून् प्रमभ्य ।**

**मया हतानां युधि दानवानां**

**प्रपीडितं शोणितनिम्नगासु [143] ॥**

शाङ्ग: - **(शाङ्घोऽहमस्मि)**

**क्षीरोदाद् निष्णुना स्वयमुद्धृतः ।**

**मम शब्देन नश्यन्ति युद्धे ते देवशत्रवः[144] ॥**

शत्रु: - **चक्रश्चाङ्गगदशङ्घानन्दका दैत्यमर्दणाः**

**वासुदेवस्य कार्यार्थं प्राप्ताः परिषदा वयम् [145] ॥**

**तस्मादागम्यताम् । वयमपि मनुष्यलोकमवतीर्णस्य भगवतोविष्णोर्बालचरितमनुचरितं गोपालकवेषप्रच्छन्ना घोषमेवावतरिष्यामः ।**

**सर्वे- तथास्तु । (विष्णुमुपस्थिताः)"**

वसुदेवस्य रक्षार्थं गड्डुरेण सह देवता: मर्त्यलोके उपस्थिता: । मर्त्यलोके विष्णो:लीलाचरितस्य दर्शनाय ते गोपालकवेषप्रच्छन्नाः सन्तः घोषपल्ल्याम् अवतरन्ति । वसुदेवः सर्वेषां देवतानाम् आत्मशक्तिं वर्णयिताः । गड्डुर: देवासुरविग्रहेषु

[143]वाच.-अङ्क-१, श्लोक: - २४
[144]वाच.-अङ्क-१, श्लोक: - २५
[145]वाच.-अङ्क-१, श्लोक: - २६

विष्णुं वहति।अमृतमन्थनकाले स दानवदैत्यान् हन्ति स्म । शाङ्ग इति विष्णुकरलग्नमध्या । युधि अवतीर्णः स शत्रूणां गजाश्वरथान् सैन्यांश्च नाशयति । कौमोदकी इति हरेर्गदाप्रसिद्धा । कृष्णस्य निर्देशेन स दानवानां प्रमथितः । शङ्खस्य शब्देन देवशत्रवःपराङ्मुखाः । नन्दकस्य भयेन न कोऽपि संग्रामेषु गच्छति । साधारणमानवशिशूनां रक्षार्थं देवतानाम् आगमनं दृष्ट्वा वसुदेवः नन्दगोपश्च विस्मितौ भवतः । सशिशुः न मानवशिशुः । स एव देवशिशुः । अतः सर्वे विस्मयेन बालकं नमस्कुर्वन्ति। अयम्प्रकारो विस्मय एव अद्भुतः।'भगवतो विष्णोर्बालचरितमनुचित' अस्मिन् अंशे 'भगवतोविष्णोर्बालचरितमनुचितम्' इत्यंशे भगवन्तं विष्णुमवलम्ब्य विभावनोद्रेकात् आलम्बनविभावः। लीलारूपः अत्र उद्दीपनविभावः। अपि च हर्षरूपैः अनुभावः सूच्यते। किञ्च अंशेऽस्मिन् विस्मयेन आवेगभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

नाटकेऽस्मिन् द्वितीयाङ्के दृश्यते यत् -

**"काञ्चुकीयः- श्रूयताम् ।**

**भूतं नभस्तलनिवासि नरेन्द्र! नित्यं**

**कार्यान्तरेण नरलीकमिह प्रपन्नम् ।**

**आकाशदुन्दुभिरवैः समहीप्रकम्पै-**

**स्तस्यैष जन्मनि विशेषकरो विकारः**[146] **॥**

[146]वाच.- अङ्क-२, श्लोकः - ११

राजा- **कस्मिञ्जाते सशैलेन्द्रो कम्पितेयं वसुन्धरा**

**ज्ञायतां कस्य पुत्रोऽयं किं वा जन्मप्रयोजनम्** [147]**॥**

रात्रौ वातोद्भ्रामभूमिकम्पोल्कापाताश्चेति कारणं राजा पृच्छतिराजपुरोहितम्। राजपुरोहितात् राजा ज्ञायते यत् काश्चन देवता नरलोके जायते। तस्य आविर्भावकाले पृथिवी कम्पते । आविर्भावकाले भीषणं लक्षणं दृष्ट्वाराजा विस्मितोऽभवत् । साधारणशिशोः जन्मकाले एतादृशी अलौकिकी घटना नसंघटते । असाधारणो दिव्यपुरुषो यदाजायते तदा एतादृशी अलौकिकी घटनासंघटते । अत्र वसुदेस्य: पुत्र: असाधारण: बालक:। असाधारण: खलुचमत्कार: । अयम्प्रकारो चमत्कार एव विस्मय:। अतएव रात्रौबालकजन्मकाले अलौकिकीं घटनां दृष्ट्वा राजा विस्मितास्ति।अत्र श्लोके 'पुत्रेति' इत्यंशे कस्यापि अज्ञातजनस्य पुत्रस्य जन्म आशङ्क्य नितरामुद्विग्नोऽस्ति राजा कंसः। अत्र खलु अज्ञातपरिचयं पुत्रमावलम्ब्य राज्ञः उद्वेजनात् आलम्बनविभावः। अपि च, 'कस्मिञ्जाते सशैलेन्द्रो कम्पितेयं वसुन्धरा' इत्युक्त्या विभावनोद्रेकात् उद्दीपनविभावः। अपि च, 'ज्ञायतां कस्य पुत्रेति किं वा जन्मप्रयोजनम्' इत्यंशे विरोधरूपैः अनुभावः सूच्यते। किञ्च, श्लोकेऽस्मिन् विस्मयेन वितर्कभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

पुनश्च दृश्यते यत् -

**"राजा- अये, इयं कंसशिला। यावत् साहसमनुष्ठास्यामि अयं हि सप्तमो गर्भो ऋषिशापवलोत्थितः अस्मिन् नाशं गते गर्भे मम शान्तिर्भविष्यति। (ग्रहीत्वा प्रहृत्य)**

---

[147]वाच.- अङ्क-२, श्लोक: - ११

**एकांशः पतितो भूमिरेकांशाद् दिवमुन्नतः।**

**मां निहन्तुमहोद्भूतः करैः शस्त्रसमुज्ज्वलैः [148] ॥"**

अत्र श्लोके 'भूमिरेकांशाद् दिवमुन्नतः' इत्यंशे विभावनोद्रेकात् उद्दीपनविभावः। अपि च, अत्र कात्यायनीमालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च, अत्र नेत्रविकाशरूपैः अनुभावः सूच्यते। किञ्च श्लोकेऽस्मिन् विस्मयेन रोमाञ्चभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

पुनश्चदृश्यते यत् -

**"अये इयमिदानीम् ,**

**तीक्ष्णाग्रहं शूलमालम्व्य रौद्रवेषेण जृम्भते।**

**विनाशकाले सम्प्राते कालरात्रिरिवोत्थिता [149]॥**

**[ततः प्रविशति कात्यायणी सपरिवारा]**

**कात्यायणी–सुम्भं निसुम्भं महिषं च हत्वा**

**कृत्वा सुराणां स्यात् हतशत्रुपक्षान्।**

**अहं प्रसूता वसुदेववंशे**

**कात्यायणी कंसकुलक्षयाय [150] ॥**

**कुण्डोदरः -** **कुन्डोदरोऽहमजितो रणचन्डकर्मा**

---

[148] वाच.-अङ्कः-२, श्लोक: - १८

[149] वाच.-अङ्क-२, श्लोक: - १९

[150] वाच.-अङ्क-२, श्लोक: - २०

**दैव्याः प्रसूतिजनितोग्रमहानिनादः ।**

**शीघ्रं प्रयामि गगनादवाणीं विशालां**

**दृप्तान् जिघांसुरसुराननतिवीर्यदर्पान् [151]॥**

**शूलः -** **शूलोऽस्मि भूतमिह भूमितले प्रपन्नो**

**देव्याः प्रसादजनितोज्ज्वलचारुरेषः ।**

**कंसं निहत्य समरे परिकर्षयामि**

**तं पादपं जलनिधेरिव कार्त्तिकेयः [152] ॥**

**नीलः -** **अहं ही नीलः कलहस्य कर्त्ता**

**संग्रामशूरो नपराङ्मुखश्च ।**

**निहन्मि कंसं युधि दुर्विनीतं**

**क्रौञ्चं यथा शक्तिधरः प्रकृष्टः [153]॥**

मनोजवः - **"मनोजवो मारुत्तुल्यवेगो**

**देव्यास्तु कार्यार्थमिहोपायातः ।**

**करोमि संग्रामशिरःसु दैत्यान्**

**वह्निर्नलानां निलयं यथैव[154]॥**

---

[151]वाच.-अङ्क-२, श्लोकः - २१

[152]वाच.-अङ्क-२, श्लोकः - २२

[153]वाच.-अङ्क-२, श्लोकः - २३

[154]वाच.- अङ्क-२, श्लोकः - २४

**कात्यायणी - कुण्डोदर! शङ्कुकर्ण!महानील ! मनोजव! तदागम्यताम्। भगवतोविष्णोर्वालचरितमनुभवितुं गोपालकवेषप्रच्छन्ना घोषमेवावतरिष्यामः।**

**सर्वे - यदाज्ञापयति भगवती। (निष्क्रान्ता सपरिवारा कात्यायणी)।"**

नन्दगोपस्य कन्यां नीत्वा धात्री प्रतिहारीश्च कंसस्य सभायामुपतिष्ठत:।महाराज: कंस: कन्याया वधं समुद्यत: तां गृहीत्वा प्रहृतवान्। तस्या एकांश: भूमौपतित: अपरांश: दिवि च। शस्त्रसमुज्ज्वलै: सा कन्या कंसं निहन्तुं समुद्धुत:। कन्याया एतादृशं दृश्यं दृष्ट्वा कंस: विस्मितोऽभवत्। कन्याया रक्षायै: सर्वादेवता: समुपस्थिता:। कंसकुलध्वंसाय कत्यायणी वसुदेववंशे प्रसूता।कण्डोदेव: गगनादवणिं विशालानाम् असुराणां जिघांसुः स आविर्भूत:। युधि कंसंहन्तुं नील: आविर्भूत:। यथा अग्नि: वनानि ध्वसंन्ति, तथैव मनोजवसंग्रामेषुदैत्यान् हन्ति। नन्दगोपस्य कन्याया रक्षायै देवताया: आविर्भावं दृष्ट्वा सर्वेचमत्कृता: भवन्ति। शिशुकन्याया: एतादृशीम् अलौकिकीं शक्तिं दृष्ट्वा सर्वेविस्मिता: जाताः। अलौकिकेन वस्तुदर्शनेन मनसि विस्मयभावो जायते।अयम्प्रकार: विस्मय: चमत्कार एव। अयम्प्रकारो चमत्कार: अद्भुत एव। अत्र 'भगवतोविष्णोर्बालचरितमनुभवितुं' इत्यंशे भगवन्तं विष्णुमालम्ब्य विभावनोद्रेकात् लीलारूपैः आलम्बनविभावः। अपि च, अंशेऽस्मिन् रोमाञ्चरूपैः अनुभावः। किञ्च अंशेऽस्मिन् विस्मयेन हर्षभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

पुनश्च नाटकेऽस्मिन् तृतीयाङ्के दृश्यते यत् -

**"वृद्धगोपालकः- अन्येच्चेदमाश्चर्यम्। दशरात्रप्रसूते नन्दगोपपुत्रे पूतना नाम दानवीविषसम्पूरितस्तना नन्दगोप्यारूपं गृहीत्वागता। ततस्तया दारकं गृहीत्वा**

तस्यमुखे स्तनः प्रक्षिप्तः । ततस्तां विज्ञाय सुप्ता पतिता सापि दानवी भूत्वा तत एव मृता।ततो मासमात्रे नन्दगोपपूत्रे शकटो नाम दानवः शकटवेषं गृहीत्वागतः । तमपिज्ञात्वैकपादप्रहारेण चूर्णीकृतः सोऽपि दानवो भूत्वा तत एव मृतः । ततोमासपरिवृत्तो नन्दगोपपुत्र एकस्मिन् गृहे गत्वा क्षीरं पिवति , अन्यस्मिन्गृहेगत्वा दधि भक्षययि, एकस्मिन् गृहे गत्वा नवनीतं गिलति, अन्यस्मिन् गृहे गत्वा पायसं भुङ्क्ते अपरस्मिन् गृहे गत्वा तक्रघटं प्रलोकते। ततो रुष्टाभिर्गोपयुवतिभिर्नन्दगोप्यै उक्तम्। ततो रुष्टयानन्दगोप्या दाम गृहीत्वा तस्य मध्ये बद्ध्वा शेषमूलूखले बद्धम्।ततस्तदप्युलूखलमाघट्टयत् प्रेक्ष्य यमलार्जुनयोर्णाम दनवयोर्निक्षिप्तम्। ततोद्वावेकीभूतौ। तयोरन्तरेण गच्छता नन्दगोपपुत्रेणाघट्टयता समूलविटपं चूर्णीकृतौतावपि दनवौ भूत्वा तत एव मृतौ। ततो गोपजनैरुक्तं महाबलपराक्रमः अद्यप्रभृति भर्त्तृदामोदरो नाम भवतु इति। ततः आधावनप्रधावनमात्रे नन्दगोपपुत्रेप्रलम्बो नाम दानवो नन्दगोपवेषं गृहीत्वागतः। ततः संकर्षणं कण्ठे निक्षिप्यगच्छन्तं तं विज्ञाय भर्ता संकर्षेण तस्य दानवस्य शीर्षे मुष्टिप्रहारः कृतः। तेनमहाप्रहारेणोतक्षिप्तचक्षुः सोऽपि दानवो भूत्वा तत एव मृतः। गोपजनैःपरिवृतस्तालफलानि ग्रहीतुं तालवनं गतः। तत्र तालवने धेनुको नाम दानवोगर्दभवेषं गृहीत्वागतः। ततस्तमपि ज्ञात्वा भर्तृदामोदरेण तस्य वामपदं गृहीत्वतक्षिप्य पतितानि तालफलानि।सोऽपि दानवो भूत्वा तत एव मृतः। ततः केशी नाम दानवः तुरङ्गवेषंगृहीत्वागतः। ततस्त्वमपि ज्ञात्वा भर्तृदामोदरेण तस्य

**मुखे कूपरो दत्तः। ततस्तेनद्विधा पाटिततुरङ्गः। सोऽपि दानवो भूत्वा तत एव मृतः। एतान्यन्यानि चकर्माणि कृतानि भर्तृदामोदरेण।"**[155]

नन्दगोपस्य आलये वसुदेवस्य पुत्रागमे सति वृन्दावने आश्चर्यजनका घटनासंघटिता। बालकस्य दशरात्रप्रसूते स पुतना नाम दानवीं निहतवान्। ततोमासपरिवृत्तो शकटो नाम दैत्यं स बाधां दत्तवान् । बाल्यावस्थायां स द्वौ अर्जुनवृक्षौसमुत्पाटितवान्। द्वौ अर्जुनवृक्षौ प्रकृत्या यमलार्जुनर्योनाम दानवयोः। तौ दानवौचूर्णीकृतेन स बालकः मारितः। तत्र तालवने धनुको नाम गर्दभवेषं दानवं मारितः वसुदेवपुः।ततः केशी नाम तुरगवेषं दानवं स मारितवान्। एतादृशीम् अलौकिकीं शक्तिं दृष्ट्वा बृद्धगोपालको विस्मितः अभवत्। स्वाभाविकतया यो न दृश्यते स एव अलौकिकः। अलौकिकःखलु असाधारणः। असाधारण एव विस्मयः। अस्मिन् अंशे 'नन्दगोपपुत्रे' इत्यंशे नन्दगोपपुत्रमवलम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अस्मिन् गद्यांशे अलौकिकाः विषयाः वृद्धगोपालोकेन वर्णिता सन्ति. एतेषाम् अलौकिकविषयाणां श्रवणमेवात्र उद्दीपनविभावः। अपि च, अंशेऽस्मिन् श्लाघारूपैः अनुभावः सूच्यते। किञ्च अत्र विस्मयेन रोमाञ्चभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

अस्मिन् अङ्के दृश्यते यत्-

**"दामोदरः- (सविस्मयम्) अहो प्रकृत्या रमणीयानां गोपकन्यकानांवेशग्रहणविशेषः।**

**"एताः प्रफुल्लकमलोत्पलवक्रनेत्रा**

**गोपाङ्गनाः कनकचम्पकपुष्पगौराः।**

---

[155]वाच. अङ्कः-२, (संस्कृतसाहित्यसम्भारः-पृ.-१८५)

**नानाविरागवसना मधुरप्रलापाः**

**क्रीडन्ति वन्यकुसुमाकुलकेशहस्ताः"[156]।।**

दामोदरः गोपसुन्दरीणां सौन्दर्यं दृष्ट्वा विस्मितः अभवत्। ता सर्वाक्रीडारता। तासां प्रफुल्लकमलोत्पल्लवयुक्तनेत्रा। ता कनकचम्पकपुष्पमिव गौराः।ता विचित्रवसना। विचित्रवेशधारणमद्भुतरसस्य जनक इति मन्यतेआलङ्कारिकेण शारदातनयेन। तेनोक्तं यत्-

“विचित्राकृतिवेषाश्च विचित्राचारबिभ्रमाः।

अद्भुतालम्बनभावामायालीलाविलासिनः "।।

यद्यपि गोपाङ्गनाः प्रकृत्याः रमणीयाः तथापि वेषग्रहणविशेषात् तेषां सौन्दर्यं नितरं विस्मयकरमिति दामोदरस्य उक्ता। अतो विचित्रवेषं दृष्ट्वा दामोदरः चमत्कृतः अभवत्। अयं प्रकारो चमत्कारोविस्मय एव। अयम्प्रकारो विस्मयः अद्भुत एव। अत्र नाट्यकारेण कृतःअद्भुतरसप्रयोगवैचित्र्यमालङ्ककारिकशारदातनयसम्मतम्।अत्र श्लोके ‘रमणीयाणां गोपकन्यकानां’ इत्यंशे वोध्यते यत् गोपाङ्गनाः अत्र आलम्बनविभावः। तेषां वेषग्रहणविशेषः खलु उद्दीपनविभावः। अपि च श्लोकेऽस्मिन् प्रेक्षणरूपैः अनुभावः सूच्यते। किञ्च, श्लोकेऽस्मिन् विस्मयेन प्रहर्षभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

पुनश्च दृश्यते यत्-

**“अरिष्टर्षभः-(दृष्ट्वा) अहो,**

[156]वाच.-अङ्कः-३,श्लोकः-२

**सारवान् खल्वयं बालो यो मां दृष्ट्वा महाबलम्।**

**उग्ररूपं महानादं नैव भीतो न विस्मितः[157]।।"**

दामोदरस्य वधाय अरिष्टर्षभं वृन्दावनं प्रेरयति रावणः,शत्रुबधार्थं स वृक्षरूपं धारयति। दैत्यस्य हुङ्कारशब्देन वृन्दावनस्य सलिलंकम्पते। काननाश्च प्रकम्पन्ते। परन्तु बालकः दामोदरो न भीतो न विस्मितः।बालकाः स्वाभाविकतया भयङ्करशब्देन भयातुरो जायन्ते। परन्तु अयं बालको दानवस्योग्ररूपं दृष्ट्वा न भीतः अभवत्। बालकस्य एतादृशं साहसं दृष्ट्वाअरिष्टभः विस्मितः अभवत्।अत्र श्लोके 'खल्वयं बालो' इत्यंशे बालमालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च 'नैव भीतो न विस्मितः' इत्यंशे वालस्य प्रकृतिविरुद्धं आचरणं अलौकिकं इति प्रतीतेः विभावनोद्रेकात् उद्दीपनविभावः, अपि च 'अहो दृष्ट्वा' इत्यंशे अनुभावैः सूच्यते। किञ्च श्लोकेऽस्मिन् विस्मयेन गर्वभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

पुनश्च नाटकेऽस्मिन् चतुर्थाङ्के अद्भुतरसप्रयोगवैचित्र्यं दृश्यते यत् -

**"सङ्कर्षणः - पश्यन्तु भवत्यः ।**

**दामोदरोऽयं परिगृह्य नागं**

**विक्षोभ्य तोयं च समूलमस्य ।**

**भोगे स्थितो नीलभुजङ्गमस्य**

[157]वाच.- अङ्कः-३,श्लोकः-७

**मेघे स्थित: शक्रइवावभाति [158] ॥**

**बृद्धगोपालक: - ही ही साधु भर्त: साधु ।**

**[प्रविशति कालियं गृहीत्वा दामोदर:]**

**दामोदर:- एष भो: !**

**"निर्भत्स्य कालियमहं परिविस्फुरन्तं मूर्धाञ्चितैकचरणश्चलवाहुकेतु: ।**

**भोगे विषोल्वणफणस्य महोरगस्य हल्लीसकं सलिलतं रुचिरं वहामि [159] ॥"**

अत्र श्लोके दामदरमवलम्ब्य विभावनोद्रेकात् आलम्बनविभावः। उद्दीपनभावः–अपि च श्लोकेऽस्मिन् रोमाञ्चभावप्रकाशनात् अनुभावः सूच्यते। अपि च, श्लोकेऽस्मिन् विस्मयेन स्तम्भभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

पुनश्च नाटकेऽस्मिन् चतुर्थाङ्के अद्भुतरसप्रयोगवैचित्र्यं दृश्यते यत् -

**"सर्वा- आश्चर्यं भर्त: ! आश्चर्यम् । कालियस्य पञ्च फणानाक्रमन् हल्लीसकंप्रक्रीडति ।"[160]**

भगवत: कृष्णस्य कालियादमनरूपा एका लोकप्रसिद्धाघटना । दामोदर: कालियं गृहीत्वा विषोल्वफनस्योपरि दण्डायमान: ।कालियस्य पञ्चफनास्योपरि दण्डायमान: स दामोदर: हल्लीसं नृत्यं करोति ।इदं नृत्यं दृष्ट्वा सर्वा: सखीजना: आश्चर्या भवन्ति । सर्पः इति

[158]वाच.-अङ्कः-४, श्लोक: - ५

[159]वाच.- अङ्कः-४, श्लोक: - 6

[160] वाच.- अङ्कः-४

विषमः प्राणी ।विषमं प्राणिनाम्आयत्तीकरणं न स्वाभाविकम् । तदुपरि तस्योपरि नृत्यकल्पनमतीतम् । दामोदरस्य अलौकिकप्रभावेन कालियः तस्य अधीनताम् गतः।दामोदरस्य अलौकिकीं शक्तिं दृष्ट्वा सर्वा विस्मिता जाताः । अलौकिकं खलुअसाधारणम् । असाधारण एव विस्मयः । अयम्प्रकारो विस्मय एव अद्भुतः । ह्रदोऽत्र आलम्बनविभावः। अस्य ह्रदस्य अनन्यसाधारणसौन्द्रर्यञ्च उद्दीपनविभावः।

## ।। भवभूतिषु नाटकेष्वद्भुतरसवैचित्र्यम् ।।

### क) उत्तररामचरितमिति रूपकेऽप्यद्भुतरसस्य प्रयोगवैविध्यं संलक्ष्यते ।

यद्यपि 'कारुण्यं भवभूतिरेव तनुते' इत्याभाणकः श्रूयते, तथाप्यद्भुतरसस्य व्यवहारे भवभूतेः नैपुण्यं लक्ष्यते। अत्रोत्तररामचरिते भवभूतेरद्भुतरसव्यवहारः पर्यालोच्यते। दिङ्गात्रमुदाहरणं तावत् –

तत्र प्रथमाङ्के दृश्यते यत् -

**"सीता –अम्महे! दलन्नवनीलोत्पलश्यामलस्निग्धमसृण-शोभमानमांसलदेहसौभाग्येन विस्मय-स्तिमित-तातदृश्यमान-सुन्दरश्रीः अनादरखण्डितशंकरशरासनः शिखण्डमुग्धमुखण्डल आर्यपुत्र आलिखितः।[161]"**

उत्तररामचरितस्य चित्रदर्शनमिति प्रथमाङ्कान्तर्गत्येस्मिन् संलापे चित्रदर्शनरतायाः सीतायाश्चित्रदर्शनात् ह्रदि स्थिता स्मृतिरपि जागरिता। अम्हवह (अहो) इति विस्मयात्मकमव्ययमत्र तस्याः विस्मयविह्वलावस्थायाः सूचकः। सा च जानकी

[161]उ.रा., अङ्कः - १

चित्रपटे चित्रितम् आर्यपुत्रमवलोक्य स्मृतिचारणं करोति। प्रस्फुटितं नीलोत्पलमिव श्यामलं स्निग्धं चासीत् तस्य आर्यपुत्रस्य शोभमानदेहसौन्दर्यम्। तदेव देहसौन्दर्यम् दृष्ट्वा पिता दशरथः स्वयमेव विस्मयस्तिमित्योऽभवत्। अपि चायम् आर्यपुत्रः यदा हरधनुभङ्गे रत आसीत् तदेव चित्रम् चित्रितमिति निरीक्ष्य सर्वं स्मृतिजातमायाति तस्याः मनसि। अस्मिन्नालेख्ये मांसलदेहसौन्दर्यः सीतयाः स्मृतिपथमागत्य तामेव स्मृतिभारातुरा विस्मयविधुरा च करोति। अत्र आलिखितः रामचन्द्रः आलम्बनविभावः। तस्य रामचन्द्रस्य आलिखितः देहसौष्ठवस्तु उद्दीपनविभावः, अत्र हर्षानुभावः। रामचनन्द्रस्य आलिखितदर्शनजन्यः उद्वेगोऽत्र व्यभिचारिभावः। तज्जन्यं हर्षञ्च अनुभावः।

अङ्केऽस्मिन् दृश्यते यत् –

**“सीता – एते खलु तत्कालकृतगोदानमङ्गलाश्चत्वारो भ्रातरो विवाहदीक्षिता यूयम्। अहो जानामि तस्मिन्नेव प्रदेशे तस्मिन्नेव काले वर्तते”[162] इति ।**

गर्भावस्थायां स्त्रीणां योऽभिलाषो भवति सोऽवश्यमचिरात् सम्पादयितव्यमिति सामाजिकः उपचारः। आसन्नप्रसवायाः सीतायाः अभिलाषं सम्पादयितुं यदेव प्रयोजनं तदेवावश्यमेव कर्तव्यं रामचन्द्रेनादिष्टम्। सीतायाः इच्छानुसारतो रामचन्द्रेणतज्जजीवनचरितस्यैकं चित्रफलकं निर्मितम्। चित्रफलकमालोक्य सीता विस्मितास्ति। अस्मिन्नालेख्ये चित्रकरेण रामचन्द्रस्य चरितमपूर्वमालिखितम्। अपूर्ववस्तुदर्शनात् सीताया मनसि विस्मयो जायते। राजसभायां चत्वारः भ्रातरः समुपस्थिताः

[162]उ.रा, अङ्कः - १

तस्मिन् समये। काहिनीमिमांविचिन्त्य सा तस्मिन् काले वर्तते इति तया चिन्तितम्। एतेन सीतायाः मनसि विस्मयभावः सञ्जातः। अत्र 'अम्महे' इति शौरसेन्यादिभाषायां विस्मयसूचकमव्ययम्, संस्कृते तु "अम्महे' इत्यस्य 'अहो' शब्देनानुवादः कृतः।

रामादयश्चत्वारो भ्रातारोऽत्र आलम्बनविभावाः। तेषां स्मरनेन सीतायाः मनसि पूर्वस्मृतिजागरणजन्यः विषदोऽत्र अनुभावः। रामादधनां चतुणां भ्रातॄणां विवाहदीक्षानुष्ठानस्य स्मरणं खलु उद्दीपनविभावः।

उत्तररामचरितमिति नाटकस्य द्वितीयेऽङ्के अद्भुतरसप्रयोगवैचित्र्यं दृश्यते यत् –

**"आत्रेयी – तस्य भगवतः केनापि देवताविशेषेण सर्वप्रकाराद्भूतं स्तन्यत्यागमात्रके वयसि वर्तमानं दारकद्वयमुपनीतम्। तत् खलु न केवलमृषीणामपितुसचराचराणां भूतानामान्तरानि तत्त्वान्युपस्नेहयति।**

**वनदेवता – अपि तयो र्नामसंविज्ञानमस्ति ?**

**आत्रेयी – तयैव किल देवताया तयोः कुशलवाविति नामनी प्रभावश्चाख्यातः।**

**वनदेवता – कीदृशः प्रभावः ?**

**आत्रेयी – तयोः किल सरहस्यानि जृम्भकास्त्राण्याजन्मसिद्धानीति।**

**वनदेवता – अहो न भोश्चित्रमेतत्।**

**आत्रेयी – तौ च भगवता वाल्मीकिना धात्रीकर्म वस्तुतः परिगृह्य पोषितौ परिरक्षितौ च, वृत्तचौडकर्मणोश्च तयोस्त्रयीवर्जिमितरा विद्याः सावधानेन परिनिष्ठापिताः**

**समनन्तरं च गर्भैकादशे वर्षे क्षात्रेण कल्पोनेपनीय तौ त्रयीविद्यामध्यापितौ। न ह्येताभ्यामति-प्रदीप्तप्रज्ञाभ्यामस्मदादेः महाध्ययनयोगोऽस्ति। यतः –**

**'वितरति गुरुः प्राज्ञे विद्यां यथैव तथा जडे**

**न खलु तयोकर्ज्ञाने शक्तिं करोत्यपहन्ति वा।**

**भवति च पुनर्भूयान् भेदः फलं प्रति तद् यथा**

**प्रभा भवति शुचिविम्बोद्ग्राहे मणिर्न मृदां चयः।।[163]"**

अत्र वालकद्वयम् आलम्बनविभावः शिशोः हृदयार्द्रीकरणं दर्शणं खलु उद्दीपनविभावः। स्तनत्यागमात्रके वयसि दारकद्वयस्य अलौकिकमाहात्म्यजन्यः विस्मयः खल्वत्र व्यभिचारिभावः।

अङ्केऽस्मिन् दृश्यते यत् –

**"आत्रेयी – अपरश्च।**

**वनदेवता – अथापरः कः?**

**आत्रेयी – अथ स ब्रह्मर्षिरेकदा माध्यन्दिनसवनाय नदीं तमसामनुप्रपन्नः। तत्र युग्मचारिणोः क्रौञ्चयोरेकं व्याधेन विध्यमानं ददर्श। आकस्मिकप्रत्यवभासां च देवीं वाचमनुष्टुभेनच्छन्दसा परिणतामभ्युदैरयत् –**

**'मा निषाद ! प्रतिष्ठां त्वमगमः शाश्वतीः समाः।**

**यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम्'।।[164]**

---

[163]उ.रा., अङ्कः – २, श्लोकः - ४

[164]तत्रैव (अङ्कः – २, श्लोकः – ५)

**वनदेवता - चित्रमाम्नायादन्योऽयं नूतनच्छन्दसामवतारः"।**

महर्षेर्वाल्मीकेः शिष्यासीदात्रेयी। सा वेदाध्ययनार्थं वाल्मीकिपार्श्वात् इह दण्डकारण्ये अगस्त्यमुनिसमीपम् आगतवती। आत्रेयीमुखात् लवकुशयोश्च महावीरत्वसूचिकां गाथांवनदेवी श्रुतवती। तयोः किल सरहस्यानि जम्भृकास्त्राणि आजन्मसिद्धानीति वार्त्तामिमां श्रुत्वा वनदेवी विस्मितासीत्। तयोक्तम् - 'अहो न भोश्चित्रमेतत्'। अत्रैव अहोनुभीरित्येकमेव विस्मयविशेषद्योतकमव्ययम्। अपि च, आत्रेयी उक्तवती यत्तत्र भवान् वाल्मीकिर्धात्रीकर्म परिगृह्य तौ वालकौ पोषितवान् परिरक्षितवान् च। ताभयां त्रयीविद्यां ददाति महर्षिः। अतः परं ब्रह्मर्षिरेकदा माध्यन्दिनसवने तमसानदीमनुपपन्नः। तत्र भवान् युग्मचारिणोः क्रौञ्चयोरेकं व्याधेन विध्यमानं ददर्श व्यथितोऽभूत् । अनुष्टभा छन्दसोकः श्लोकः उच्चारितस्तेन - 'मा निषाद ! प्रतिष्ठाम्'। श्लोकमिमं श्रुत्वा वनदेवी आश्चर्यान्विताभूत्। आम्नादन्येषां नूतनछन्दसामार्विभावः इति तयोक्तम्। अत्र 'चित्रम्' इति शब्दः आश्चर्यार्थद्योतकः।अस्मिन् अंशविशेषे 'स ब्रह्मषिरेकदा' इत्यंशे वाल्मीकिमवलम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च 'देवीं वाचमनुष्ठभेनच्छन्दसा' इत्युक्ता विभावनोद्रेकात् उद्दीपनविभावः। अपि च 'अथापरः कः ?' इत्युक्त्या अनुभावः। किञ्च 'चित्रमास्नायादन्योऽयं नूतनच्छन्दसामवतारः' इत्युक्त्या विस्मयेन हर्षभावप्रकाशात् व्यभिचारिभावः सूच्यते।

अङ्केऽस्मिन् पुनश्च दृश्यते यत् –

**"रामः – तथापि पूर्वसुहृदो भूमिभागान् पश्यामि। (निरूप्य)**

**अहो अनवस्थितेते भूमिसन्निवेशः। तथा हि –**

**पुरा यत्र स्रोतः पुलिनमधुना तत्र सरितां**

**विपर्यासं यतो घनविरलभावः क्षितिरुहाम् ।**

**बहोर्दृष्टं कालादपरमिव मन्ये वनमिदं**

**निवेशः शैलानां तदिदमिति बुद्धिं द्रढयति"।।**[165]

रामचन्द्रः पञ्चवटीवनं प्रविष्टवान्। पूर्वं सुहृद्रूपः भूमिभागान् दृष्ट्वा रामचन्द्रः विस्मितोऽभवत्। 'अहो' इति शब्दः आश्चर्यार्थद्योतकः। भूमिसन्निवेशादस्य स्थानस्यावस्था पूर्वतो वैषम्यं प्राप्तम्। पुरा यत्र सरितां स्रोतः आसीत् अधुना तत्र पुलिनं दृश्यते। अत्र क्षितिरुहा घनविरलत्वभावाः प्राप्ताः। बहुकालात्परमिदं वनमपरवनमिव दृश्यते इति मन्यते रामचन्दः। भूमिवैषम्यं दृष्ट्वा रामस्य मनसि विस्मयभावो जायत इति कृत्वाद्भुतरसः।अत्र श्लोके 'भूमिभागान्' इत्युक्त्वा भूमिभागमवलम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च 'अनवस्थिता भूमिसन्निवेशः' इत्यंशे विभावनोद्रेकात् उद्दीपनविभावः। स्मृतिवैधुर्य्यजन्यं निरूपणमात्र अनुभावः। किञ्च अस्मिन् अंशे आवेगभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

पुनश्च तृतीयाङ्के दृश्यते यत् –

**"मुरला – (सविस्मयम्)**

**ईदृशानां विपाकोऽपि जायते परमाद्भूतः**[166]**?**

---

[165]उ.रा., (अङ्कः – २, श्लोकः – २७)

[166]उ.रा., पवनाद्भूतः इति पाठान्तरम्

**यत्रोपकरणीभावमायात्येवंविधो जनः"।।**[167]

सीतासहवासचिह्नानि काननानि दृष्ट्वा रामो मुर्च्छितोऽभवत्। तथा च तस्य मुर्च्छाभङ्गायागस्त्यपत्न्या लोपामुद्राया गोदावरीं प्रति निर्देशवचनं तमसामुखात् श्रुत्वा मुरला विस्मितास्ति। सीतारामयोः महत्यां विपदि दशाविपर्यये विस्मयावहो विषयः संघटितः। तयोः रक्षार्थं पृथ्वीगङ्गे स्वयमेव साहाय्यं कुरुतः। चिरादाराधनया ययोर्दर्शनं क्वचित् सौभाग्यात् घटते क्वचिद्वा न, ते पृथ्वीगङ्गे अत्र साहाय्यदानाभ्याम् अवतीर्णौ इति चिन्तयित्वा मुरला परमाद्भुता।अत्र श्लोके 'ईदृशानां' इत्युक्त्या पृथ्वीगङ्गामवलम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च 'विपाकोऽपि' इत्यंशे विभावनोद्रेकात् उद्दीपनविभावः। अपि च 'सविस्मयम्'इत्यंशे अनुभावः। किञ्च 'यत्र विपाकः' इत्युक्त्या विस्मयेन चिन्ताभावप्रकाशनात् व्यभिचारिभावः सूच्यते। एवमविधजनः (गङ्गापृथ्वी सदृशः जनः) अत्र आलम्बनविभावः। सीतारामतुल्यमहाश्चर्यचरितानां जनानां दशाविपर्यासश्रवणमत्र उद्दीपनाविभावः। चिरादाराधनया ययोः दर्शणं क्वचित् सौभाग्यात् संघटते क्वचिद्वा नेति ते पृथ्वीगङ्गे अत्र साहाय्यकारिनौ इति विरर्कावसरोऽत्र व्यभिचारिभावः।

पुनश्च दृश्यते –

**"(नेपथ्ये)**

**विमानराज ! अत्रैव स्थीयताम्।**

167. उ. रा. अङ्कः – ३. श्लोकः – ३

**सीता – (समाश्वस्य ससाध्वसोत्कम्पोल्लासम्) अहो जलभृतमेघस्तनित गम्भीरमांसला कृतोनु एषा भरती निर्घोष भ्रियमाण कर्णविवरां मामपि मन्दभागिनीं झटिति उच्छवासयति"।**

आश्रमस्थानं खलु सुखस्थानम्। तत्रैव परमस्नेहेन सर्वे कथयन्ति। उच्चैः कोऽपि न कथयति। एकदा रामचन्द्रः कस्यचित् शूद्रस्य दण्डविधानार्थं पञ्चवटीम् आगतवान्। तत्र सारथये पुष्पकाय आदिशति रामचन्द्रः - 'अत्र इव स्थीयताम्'। इदं वाक्यं जलभूतमेघस्तनितगम्भीरशब्द इव श्रूयते। इमे शब्दाः तपोवने सहसा न श्रूयते रामचन्द्रस्य इदं भुतगम्भीरपूर्णं वाक्यं सहसा श्रुत्वा सीता स्वयमेव विस्मयान्विता जाता। अयम्प्रकारो चमत्कारो विस्मयः। अयम्प्रकारो विस्मयोऽद्भुतरस एव।अस्मिन् अंशे नेपथ्ये स्थितस्य रामचन्द्रस्य आनुमानिका स्थितिरत्र आलम्बनविभावः। तस्य जनस्य जलभृतमेघस्तनितगम्भीरमांसला भारती अत्र उद्दीपनविभावः कुतः सा भारती आगतेति प्रश्नसूचकः वितर्कोऽत्र व्यभिचारिभावः। सीतायाः उच्छवासोऽत्र अनुभावः।

अङ्केऽमिन् पुनश्च दृश्यते यत् –

**"तमसा – अहो ! संविधानकम्**

**एको रसः करुण एव निमित्तभेदाभिन्नःपृथक् पृथगिवाश्रयते विवर्त्तान्।**

**आवर्त्तवुदतरङ्गमयान् विकारानम्भो यथा सलिलमेव <u>तु तत् समग्रम्</u>*"।।**[168]

[168]उ.रा., (अङ्कः – ३, श्लोकः – ४७)

* हि तु समस्तम् इति पाठान्तरम्

+ निर्ग्राह्य इति पाठान्तरम्

#सम्मोह इति भिन्नपाठः

अस्मिन् चराचरे शोकोऽस्ति। स्वल्पमपि सुखस्थानमिति। इदमेव विधातुः विचित्रविधानम्। सीता-रामयोः परस्परविच्छेदे रामचन्द्रस्य दर्शनाकाङ्खायाः सीतायाः नयनं भर्त्तरि रामे एकान्ततो निहितम्। मर्मपीडाकरैरपि आयासैः दृष्टेराकर्षणं न समाप्तिं भजते। सीतायाश्चक्षुस्तावत् अश्रूभाराक्रान्तम् इति दृष्ट्वा तमसा विस्मितास्ति। तया चिन्तितं यथा एकमेव जलम् केनचित् पदार्थेन वेगरोधे सति धारयति। तथा एक एव स्थायिभावः शोकः परस्परवियोगे विषादरूपेण, मूर्च्छान्तरस्पर्शे हर्षरूपेण, स्मृतिरूपेण स्तम्भरूपेण, धृतिरूपेण च परिणमते। एक एव करुणः रसः अवस्थाभेदात् रतिहासशोकनिर्वेदादिरूपेण प्रतीयते, परमार्थतस्तु स एक एव रसः। अत्र सीता आलम्बनविभावः। तस्या शोकश्चात्र उद्दीपनविभावः। तमसायाः आवेगोऽत्र व्यभिचारिभावः।

चतुर्थाङ्के पुनः अद्भूतरसस्य प्रयोगवैचित्र्यं दृश्यते यत् –

**'कौशल्या – सुलभसौख्यं तावत् वालत्वं भवति।**

**अहो ! एतेषां मध्ये कः एष रामभद्रलक्ष्मीपरिशोभितैः सावष्टम्भमुग्धललितैरङ्गैः अस्माकमपि लोचनानि शीतलयति।"**[169]

कौशल्या क्रीडारतानां वटूनां कलाहलः श्रूयते। एतेषां वटूनां मध्ये रामभद्रलक्ष्मीपरिशोभितैः सावष्टम्भमुग्धललितैः एको वालकः कौशल्या दृष्टवती इति कृत्वा क एषः बालकः इति चिन्तयित्वा सा विस्मिताभूत्।अस्मिन् अंशे 'कः एषः' इत्यंशे लवमवलम्ब्य विभावनोद्रेकत् आलम्बनविभावः। अपि च 'रामभद्रलक्ष्मीपरिशोभितैः' इत्युक्त्या विभावनोद्रेकात् उद्दीपनविभावः। एवञ्च

---

[169]. उ. रा. अङ्कः-४

'लोचनानि शीतलयति' इत्यंशे अनुभावः। किञ्च 'एतेषां मध्ये कः एष' इत्यंशे विस्मयेन वितर्कप्रकाशनात् व्यभिचारिभावः सूच्यते।

**अङ्केऽस्मिन् पुनश्च दृश्यते यत् –**

**"जनकः – (चिरं निर्वण्य) भो ! किमप्येतत्।**

**महिम्नामेतस्मिन् विनयशिशुतामौग्ध्यमसृणो**

**विदग्धैर्निर्ग्राह्यो+ न पुनरविदग्धैरतिशयः ।**

**मनो मे सम्मोदः# स्थिरमपि हरस्येष बलवान्**

**अयोधातुं यद्वत् परिलघुरयस्कान्तशकलः"।।**[170]

अपरिचितलवस्य दर्शनेनैव तस्य माहात्म्यं चित्ताकर्षकत्वमनुभूय च जनको विस्मितोऽभवत् । तेनोक्तं भो एतत् किमपि। अत्र 'किमपि' इति शब्दः आश्चर्यार्थद्योतकमव्ययम् । लवस्य शिशुसुलभं सारल्यं नम्रस्वभावः उत्कर्षश्च केवलम् अनुभवनिपुनैः जनकादिभिरेव बोद्धव्यानि, न तु अनिपुनैः, लौहाकर्षकायस्कान्तखण्डो यथा लौहम् आकर्षति तथैव लवदर्शनजनितानन्दः योगाभ्यासेन स्थिरमपि जनकचित्तमाकर्षतीति।अत्र श्लोके 'महिम्नामेतस्मिन्' इत्युक्त्या 'तस्मिन्' इति पदमवलम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च 'महिम्नामेतस्मिन् विनयशिशुनामौग्ध्यमसृणो' इत्यंशे विभावनोद्रेकात् उद्दीपनविभावः। एवञ्च 'चिरं निर्वण्य' इत्यंशे प्रेक्षणरूपेण अनुभावः दृश्यते। किञ्च 'अयोधातुं यद्वत् परिलघुरयस्काण्डशकल' इत्यंशे तत्त्वोपदेशेन मतिरिति व्यभिचारिभावः सूच्यते।

---

[170]उ.रा., (अङ्कः – ४, श्लोकः – २१)

पुनश्च अङ्केऽस्मिन् दृश्यते –

**“वटवः – पश्यतु हि कुमारस्तदाश्चर्यम्।**

**लवः – दृष्टमवगतं च। नूनमाश्वमेधिकोऽयमश्वः**

**इत्यत्रापि लवादिमुनिकुमारा अश्वमेधजज्ञस्याश्वं दृष्ट्वा सर्वे विस्मिता भवन्ति।”**

पञ्चमाङ्के अद्भूतरसस्य प्रयोगवैचित्र्यं दृश्यते यत् –

**“चन्द्रकेतुः – आर्य सुमन्त्र! पश्य पश्य**

**किरति कलित किञ्चित्कोपरज्यन्मुखश्रीरविरतगुणगुञ्जत्कोटिना कार्मुकेण ।**

**समरशिरसि चञ्चत्पञ्चचूडश्चमूनामुपरि शरतुषारं कोऽप्ययं वीरपोतः ।।[171]**

**आश्चर्यमाश्चर्यम्।**

**मुनिजनशिशुरेकः सर्वतः सैन्यकायेनव इव रघुवंशस्याप्रसिद्धः प्ररोहः।**

**दलितकरिकपोलग्रन्थिटङ्कारघोरम्ज्वलितशरसहस्रःकौतुकम् मे करोति”।।[172]**

वाल्मीक्याश्रमपदे सुमन्त्रेन सारथिना सह रथेन चन्द्रकेतुः प्रविष्टवान्। तस्मिन्नाश्रमपदे तत्रभवान् चन्द्रकेतुः मुनिबालकस्य लवस्य वाणनिक्षेपनैपुण्यमवलोक्य विस्मयविमुग्धोऽभवत्। लवस्य वाणवर्षणनैपुण्यं दृष्ट्वा लक्ष्मणात्मजश्चन्द्रकेतुः सारथिं सुमन्त्रमुदिश्य वर्णयति यत् लोके अख्यातोऽपि रघुवंशस्य नवीनाङ्कर इव एकाकी

---

[171]उ.रा.(अङ्कः – ५, श्लोकः – २)

[172]तत्रैव, (अङ्कः – ५, श्लोकः – ३)

मुनिबालकः धनुष्टंकारेण सकलसैन्येषु वाणवर्षणेन च अद्वितीयवीररूपेण समरे आत्मानं प्रकाशितवानिति। मुनिबालकस्यैतादृशं महावीरत्वं दृष्ट्वा चन्द्रकेतुः स्वयं विस्मितोऽभवदिति हेतोरद्भुतरसः।अस्मिन् अंशे 'किञ्चित् कोपरज्यन्मुखश्री' इत्यंशे लवस्य मुखमालम्ब्य विभावनोद्रेकात् उद्दीपनविभावः। अस्मिन् अंशे लवमवलम्ब्य विभावनोद्रेकात् आलम्ब्यनविभावः। अपि च 'पश्य पश्य' इत्युक्त्या हर्ष इति अनुभावः। किञ्च 'कोऽप्ययं वीरपोतः' इत्यंशे सन्देहवशात् विस्मयेन वितर्कभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

अङ्केऽस्मिन् पुनश्च दृश्यते –

**"चन्द्रकेतुः – (सविस्मयलज्जासंभ्रमम्) हन्त धिक् ! प्रतिनिवृत्तानि सर्वतः सैन्यानि मम"**[173]

संग्रामे सकलसैन्यैरेकाकी मुनिबालकः परिवेष्ठित इत्यवलोक्य लज्जितवान् कुमारश्चन्द्रकेतुः। संग्रामे चन्द्रकेतोः सैन्यानि सर्वतः प्रतिनिवृत्तानि। संग्रामे एकाकिनः मुनिबालकस्य शक्रसैन्यविध्वंसिरूपमालोक्य चन्द्रकेतुः विस्मितो भवति।अस्मिन् अंशे 'सर्वतः सेन्यानि' इत्युक्त्या मुनिवालकमवलम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च 'प्रतिनिवित्तानि' इत्यंशे विभावनोद्रेकात् उद्दीपनविभावः। एवञ्च 'हन्त धिक्' इत्यंशे अनुभावः दृश्यते। किञ्च 'संभ्रमम्' इत्युक्त्या सम्भ्रमरूपेण अद्भूतरसस्य व्यभिचारिभाव सूच्यते।

पुनश्च दृश्यते यत् –

173. उ. रा. अङ्कः--५

**"लवः – (सहर्षसंभ्रमं परावृत्य) अहो महानुभावस्य प्रसन्नकर्कशा वीरवचनप्रयुक्तिविकर्तनकुलकुमारस्य। तत् किमेभिः एनमेव तावत् संभावयामि।"**[174]

आत्मसैन्यविनाशात् लवं निवारयितुं केवलं चन्द्रकेतुना सह युद्धं करोतीति चन्द्रकेतुः वदति। एनां महानुभववार्त्तां श्रूत्वा लवो विस्मितोऽभवत्। तदस्य कुमारस्यैभिः सन्यैः किं प्रयोजनमिति चिन्तितवान् लवः। अस्मिन् अंशे 'कुलकुमारस्य' इत्यंशे कुमारमवलम्ब्य इत्यर्थः चन्द्रकेतुमवलम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च 'महानुभावस्य प्रसन्नकर्कशा वीरवचनप्रयुक्ति' इत्युक्त्या विभावनोद्रेकात् उद्दीपनविभावः। एवञ्च 'सहर्षः' इत्यंशे हर्षरूपेण अनुभावः प्रकाशयति। किञ्च 'सहर्षसंभ्रमं' इत्यंशे सम्भ्रमरूपेण अद्भूतरसस्य व्यभिचारभावः विस्मयेन सूच्यते।

पुनश्च दृश्यते यत् –

**"चन्द्रकेतुः – आर्य ! दृश्यतां द्रष्टव्यमेतत्**

**दर्पेण कौतुकवता मयि वद्धलक्ष्यःपश्चादवलैरनुसृतोऽयमुदीर्णधन्वा ।**

**द्वेधा समुद्धतमरुत्तरलस्य धत्तेमेघस्य माघवतचापधरस्य लक्ष्मीम्।।**[175]

**सुमन्त्रः – कुमार एवैनं द्रष्टुमपि जानाति। वयन्तु केवलं परवन्तो विस्मयेन। "**

चन्द्रकेतुः सुमन्त्रमुद्दिश्य लवस्यापूर्वं रणकौशलं शोभां वर्णयति। पूर्वदिगुत्थितवायुना पश्चिमायां दिशि एकवारं चलितः द्वितीयवारञ्च पश्चिमदिगुत्थितवायुना पूर्वस्यां दिशि

---

[174] उ. रा. अङ्कः--

[175] उ.रा., (अङ्कः – ५, श्लोकः – ११)

चलितः इन्द्रधनुर्धारी मेघो यादृशीं शोभां धत्ते नवजलधरश्यामशरीरेऽयं बालकवीरः लवोऽपि सन्मुखवर्त्तिनं चन्द्रकेतुम् एकवारं धनुरुत्तोलयन् पुनः पृष्टदेशादाक्रमणकारिणः सैनिकान् प्रति धनुरुत्तोलयन् पश्यति। तादृशीं शोभां चन्द्रकेतुमुखाच्छ्रुत्वा सुमन्त्रो विस्मितोऽभवदिति अद्भुतरसः। अत्र लवः आलम्बनविभावः। अपि च युधि एकतः लवस्य दृष्टिः अपरतश्च वायुणां चञ्चलीकृतस्य मेघस्य शोभादर्शनमेव उद्दीपनविभावः। अपि चात्र चन्द्रकेतोः गदगदभावः अनुभावः। तस्य मनसि सञ्चात वितर्कश्च व्यभिचारिभावः।

अङ्केऽस्मिन् अन्यत्र अद्भुतरसप्रयोगवैचित्र्यं दृश्यते यत् –

**"चन्द्रकेतुः – अत्र कः सन्देहः।**

**व्यतिकर इह भीमस्तामसो वैद्युतश्चप्रणिहितमपि चक्षुर्ग्रस्तमुक्तं हिनस्ति ।**

**अथ लिखितमिवैतत् सैन्यमस्पन्दमास्तेनियतममितवीर्यं जृम्भते जृम्भकास्त्रम्।।**[176]"

अत्र श्लोके 'जम्भकास्त्रम्' इत्युक्त्वा जम्भकास्त्रमालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च 'नियत्ममितवार्यं जम्भते' इत्यंशे विभावनोद्रेकात्उद्दीपनविभाव। एवञ्च 'लिखितमिवैतत्' इत्यंशे जडतारूपेण अनुभावः प्रकाशयति। किञ्च श्लोकेऽस्मिन् विस्मयेन स्तम्भभावप्रकाशनात् व्यभिचारिभाव् सूच्यते।

पुनश्च दृश्यते यत् –

**"आश्चर्यमाश्चर्यम्।**

**पातालोदरकुञ्चपुञ्जिततमः श्यामैर्नभो जृम्भकै-**

---

[176]उ.रा (अङ्कः – ५, श्लोकः – १३)

**रक्तप्तस्फुरदारकूटकपिल ज्योतिर्ज्वलद्दीप्तिभिः ।**

**कल्पाक्षेपकठोरभैरवमरुद्व्यस्तैरवाकीर्यते**

**मौलन्-मेघतडित्कडारकुहरैर्विन्ध्याद्रिकूटैरिव"।।[177]"**

संग्रामे लवेन प्रयुक्तानां जृम्भकास्त्राणां प्रभावं वर्णितवान् चन्द्रकेतुः। भीषणालोकान्धकारयोः समरायेन जृम्भकास्त्रं दृष्टिशक्तिं पीडयति। चित्रार्पितमेव सर्वं सैन्यमवश्यं निष्पन्दं च जातमिति दृष्ट्वा चन्द्रकेतुना चिन्तितं यन्नूनं लवेन जृम्भकास्त्रं प्रयुक्तमिति। लवप्रयुक्तानां जृम्भकास्त्राणां प्रभावं दृष्ट्वा चन्द्रकेतुः विस्मितोऽभवत्। तैः शस्त्रैः पातालस्य गर्भे यल्लतादिभिराच्छादितं स्थानमिति तत्र यानि तमांसि वर्तन्ते तानीव श्यमवर्णानि धारयन्ति। घोरमसिवर्णानि पितलसदृशपीतप्रभाप्रदीप्तानि विन्ध्यपर्वतशृङ्गानीव जृम्भकास्त्राणि प्रलयपवनवेगेन द्रुतं गगनम् आच्छादयन्ति।अत्र श्लोके 'श्यामैर्नभोजृम्भकै' इत्यंशे जृम्भकाशस्त्रमालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च तामसः वैद्युतश्च भयङ्करः समवायोऽत्र उद्दीपनविभावः। अपि च श्लोकेऽस्मिन् नेत्रविकाशरूपेण अनुभावः प्रकाशयति। किञ्च 'कल्पाक्षेपकठोरभैरवमरुद्व्यस्तैरवाकीर्यतमौलन्मेघतडित्कडारकुहरैर्विन्ध्याद्रिकूटेरिव' इत्यंशे विस्मयेन वेपथुभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

षष्ठाङ्के अद्भूतरसस्य प्रभावः दृश्यते यत् –

**"(ततः प्रविशति विमानेनोज्ज्वलेन विद्याधरमिथुनम्)**

[177]तत्रैव (अङ्कः – ५, श्लोकः – १४)

**विद्याधरः – अहो ! खल्वनयोर्विकर्तनकुलकुमारयोरकास्तकलहप्रचण्डयो-रुद्द्योतितक्षत्र-लक्ष्मीकयो-रद्भुतोद्भ्रान्त-देवासुराणि विक्रान्तचवितानि। तथा हि प्रिये पश्य पश्य**

**झणज्झणितकङ्कणक्वणितकिङ्कनीकं धनु**

**ध्र्वनद्गुरुगुणाटनीकृतकरालकोलाहलम् ।**

**वितत्य किरतोः शरानविरतस्फुरच्चूडयो-**

**र्विचित्रमभिवर्धते भुवनभीममायोधनम्"।।[178]**

**विजृम्भितं च दिव्यस्य मङ्गलाय द्वयोरपि ।**

**स्तनयित्नोरिवामन्द्रं दुर्न्दुभेर्दुन्दुमायितम्"।।[179]**

**"तत् प्रवर्त्यतामनयोः प्रवीरयोरनवरतमविरलललितविकचकनक-कमलकमनीय-सन्ततिरमरतरुतरुणमणि-मुकुलनिकरमकरन्दसुन्दरः पुष्पनिपातः।**

**विद्याधरी – तत् किमिति पुनरकाण्डविस्फुरिततडिच्छटाकडारमिव अम्वरं झटिति संवृत्तम्।**

**विद्याधरः – तत् किन्नु खल्वद्य –**

**त्वष्टृयन्त्रभ्रमिभ्रान्तमार्तण्डज्योतिरुज्ज्वलः ।**

**पुटभेदो ललाटस्थनीललोहितचक्षुषः ।।[180]**

---

[178]उ.रा., (अङ्कः – ६, श्लोकः –१)

[179]तत्रैव(अङ्कः – ६, श्कोकः –२)

[180]तत्रैव, (अङ्कः – ६, श्लोकः - ३)

**(विचिन्त्य) आम् ज्ञातम्। जातक्षोभेन चन्द्रकेतुना प्रयुक्तमस्त्रमाग्नेयम्। यस्यायमग्निच्छटासम्पातः।"**

अस्मिन् अंशे 'खल्वनयोर्विकर्तनकुलकुमारयोः' इत्यंशेलवकुशावलम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च 'अकान्तकलहप्रचण्डयोः' इत्युक्त्या अकस्तात् स्फुरितविद्युत्छटया पिङ्गलवर्णस्य अम्वरस्य दर्शणमत्र उद्दीपनविभावः विभावनोद्रेकात् उद्दीपनविभाव। एवञ्च अंशेऽस्मिन् रोमाञ्चोऽत्र अनुभावः। किञ्च 'विचित्रमभिवर्धते भुवनभीममायोधनम्' इत्यंशे विस्मयेन वितर्कभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

अङ्केऽस्मिन् पुनश्च दृश्यते यत् –

**"सम्प्रति हि –**

**अवदग्धकर्वुरितकेतुचामरैःरूपयातमेव हि विमानमण्डलैः।**

**दधति ध्वजां शुकपटाश्चलेष्विमाःक्षणकुङ्कुमच्छुरणविभ्रमं शिखाः ।।**[181]

**आश्चर्यम्। प्रवृत्त एवायमुच्चण्डवज्रखण्डावस्फोटपटुः उत्सर्पिस्फुलिङ्ग गुरुरुत्तालतुमुललेलिहान-ज्वालासम्भारभैरवी भगवानुषर्वुधः। प्रचण्डश्चास्य सर्वतः सन्तापः। तत् प्रियासङ्गेनाच्छाद्य दुरमपसरामि" इति।**

युद्धक्षेत्रं विद्याधरो विमानेन प्रविष्टवान्। तत्र भवान् अकाण्डकलहप्रचण्डयोः उत्द्योतितक्षत्रलक्ष्मणयोः सूर्यवंशीयकुमारयोः विक्रान्तचरितानि दृष्टवान्। अनयोः कुमारयोः लवचन्द्रकेतोः रणकौशलं दृष्ट्या विद्याधरः विस्मितोऽभवत्। सहसा गगने

[181]उ.रा. (अङ्कः – ६, श्लोकः – ४)

तडिच्छटा कपिशवर्णतां प्राप्तवतीति दृष्ट्या विद्याधरो विस्मितास्ति। चन्द्रकेतोः प्रयुक्तस्य आग्नेयास्त्रस्य चाक्चिक्यतया व्याप्तं नभोमण्डलं तस्य प्रचण्डतेजस्तु सवितृसमानं समुज्ज्वलम्। विश्वकर्मणा शाणयन्त्रेण चिद्रमानस्य सूर्यस्य तेजोवद्दीप्यमानं जगत् संहारिणो रुद्रस्य तृतीयनयनप्रकाशः इति विद्याधरेणोक्तम्। चन्द्रकेतोः प्रयुक्तस्याग्नेयास्त्रस्य प्रभावं ध्वजाग्रस्ता पताका कुङ्कुमाराञ्जितेव शोभते। अस्य उषर्वुधस्य सर्वतः प्रचण्डः सन्तापः। तत् प्रियासङ्गेन दूरमपसारति विद्याधरः।अस्मिन् अंशे 'ज्वालास्मभारभैरवी भगवानुषर्वुधः' इत्युक्त्या भगवानुषर्वधुमालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। जलधरैः अस्तीर्णं नभस्तलमत्र उद्दीपनविभावः। अपि च 'प्रचण्डश्चस्य सर्वतः सन्तापः' इत्यंशे नेत्रविकाशरूपेण अनुभावः प्रकाशयति। किञ्च अस्मिन् अंशे आवेगभावप्रकाशेनविस्मयेन अद्भूतरसस्य व्यभिचारिभावः सूच्यते।

अङ्केऽस्मिन् पुनश्च दृश्यते यत् –

**"लवः – (स्वागतम्) अहो पुण्यानुभावदर्शनोऽयं महापुरुषः।**

**आश्वासस्नेहभक्तीनामेकमालम्वनं महत् ।**

**प्रकृष्टस्येव धर्मस्य प्रसादो मूर्त्तिसंचरः"।।[182]**

**"आश्चर्यम् – विरोधो विश्रान्तः प्रसरति रसो निर्वृतिघन-**

**स्तदौद्धत्यं क्वापि वज्रति विनयः प्रह्वयति माम् ।**

**झटित्यस्मिन् दृष्टे किमिव परवानस्मि यदि वा**

[182]उ.रा., (अङ्कः – ६, श्लोकः – १०)

**महार्घस्तीर्थानामिव हि महतां कोऽप्यातिशयः"।।[183]**

महापुरुषो रामचन्द्रः सान्त्वनास्नेहभक्तीनामद्वितीयः आधारभूतरूपो धर्माचरणेन जायमानश्चित्तप्रसादमूर्तिमाश्रित्य स आर्विभूतः। रामस्य महान् प्रभावो मनसालवेनानुभूतः इति रामं दृष्ट्वा विगलितमस्यात्माभिमानम्। जातं तच्चितमानन्दाप्लुतम्। दूरीभूतश्च विवादो लवस्य मनसि। रामं प्रति श्रद्धाशीलत्वात्तीर्थमाहात्म्यतुल्यं राममहिमानमिति सम्यगनुभूतवान् लवः। रामचन्द्रदर्शनसंजातमेतादृशं प्रभावं दृष्ट्वा लवस्य मनसि स्वयमपि विस्मयोऽजायत।अत्र श्लोके 'अयं महापुरुषः' इत्युक्त्या महापुरुषः इत्यर्थः रामचन्द्रमालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च 'पुण्यानुभावदर्शनः' इत्यंशे आश्वासस्नेहभक्तीनां आलम्वनविभावः। प्रतिभातस्य श्रीरामचन्द्रस्य पुण्यानुबावदर्शनमत्र उद्दीपनविभावः। एवञ्च 'प्रसरति रसो निर्वृतिघन' इत्यंशे हर्षजन्यस्तम्भात्र लवस्य चित्ते अनुभावः प्रकाशितः। किञ्च 'महार्घस्तीर्थानामिव हि महतां कोऽप्यतिशयः' इत्यंशे विस्मयेन हर्षभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

पुनश्च दृश्यते यत् –

**"कुशः – (निर्वण्य)**

**अहो प्रसादिकं रूपमनुभावश्च पावनः।**

**स्थाने रामायणकविर्देवीं वाचं व्यवीवृतत्"।।[184]**

---

[183]तत्रैव(अङ्कः – ६, श्लोकः – ११)

[184]उ.रा. (अङ्कः – ६, श्लोकः – २०)

आकारानुभावगाम्भीर्यसंभाव्यमानविविधलोकोत्तरसुचरिताशयो महापुरुषो रामचन्द्रः। रामचन्द्रसदृशस्य महापुरुषस्य चरितमवलम्ब्य विरचितं रामायणमहाकाव्यं सर्वथैव सङ्गतम्। रामचन्द्रस्यालौकिकरूपं प्रभावञ्च निरीक्ष्य कुशो विस्मितोऽभवत्। योऽलौकिकः सोऽद्भुतः। आलंकारिकेण जगन्नाथेनोक्तम् - 'अलौकिकवस्तुदर्नादिजन्मा आश्चर्याख्यो विस्मयः'। अत्र भवभूतिकृतः अद्भुतरसप्रयोगः जगन्नाथसम्मतः।अत्र श्लोके 'रामायणकविः' इत्यंशे रामचन्द्रमवलम्ब्य विभावनोद्रेकात् आलम्ब्वनविभावः। अपि च कुशां प्रति लवेन रामचन्द्रकस्य अलौकिकचरित्रस्य वर्णनमत्र उद्दीपनविभावः। अपि च 'निर्वण्य' इत्युक्त्या नेत्रविकाशादिभिः प्रेक्षणमत्र अनुभावः। किञ्च 'प्रसादिकं रूपमनुभावश्च पावर्णः' इत्यंशे विस्मयेण आवेगभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

सप्तमाङ्के अद्भूतरसस्य प्रयोगवैचित्र्यं दृश्यते यत् –

**"लक्ष्मणः – (विलोक्य)**

**मन्थादिव क्षुभ्यति गाङ्गमम्भोव्याप्तं च देवर्षिभिरन्तरिक्षम् ।**

**आश्चर्यमार्या सह देवताभ्यांगङ्गामहीभ्यां सलिलदुदेति"।।**[185]

मन्थनदण्डेन क्षुभ्यति गङ्गायाम् अम्भः। देवर्षिभिश्च परिव्याप्तमन्तरिक्षम्। आश्चर्यदर्शनाय देवा ऋषयश्च गगनतले समाप्ताः। आर्या सीता गङ्गामहीभ्यां देवताभ्यां सह सलिलाद् उदेतीति आलोक्य लक्ष्मणः स्वयमपि विस्मितोऽभवत्। अयम्प्रकारो

[185]उ.रा.(अङ्कः – ७, श्लोकः – १६)

विस्मयोऽद्भुतरस एव।अत्र श्लोके ‘आर्या’ इत्यंशे आर्या इत्यर्थः सीतामवलम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च महर्षिणा वाल्मीकिना आश्चर्यं परित्रञ्च अनुज्ञातमत्र उद्दीपनविभावः। अपि च ‘विलोक्य’ इत्यंशे नेत्रविकाशादिभिः विलोकनमत्र अनुभावः। किञ्च ‘व्यप्तं च देवर्षिभिरन्तरिक्षम्’ इत्यंशे विस्मयेन आवेगोऽत्र व्यभिचारिभावः सूच्यते।

अङ्केऽस्मिन् पुनश्च दृश्यते यत् –

**“लक्ष्मणः – अहो आश्चर्यमाश्चर्यम्। आर्य पश्य पश्य। (विलोक्य)कष्टमद्यापि नेच्छसित्यार्यः”।**

रामचन्द्रः सीताविच्छेदे संज्ञाहीनः। दीर्घक्षणं यावत् स संज्ञाहीनो रामचन्द्रः न संज्ञां प्राप्तः अद्यापि इति दृष्ट्वा लक्ष्मणः आश्चर्यान्वितः।अस्मिन् अंशे ‘आर्यः’ इत्युक्त्या रामचन्द्रमालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च ‘कष्टमद्यापि नेच्छसीत्यार्थः’ इत्यंशे विभावनोद्रेकात् उद्दीपनविभावः। एवञ्च ‘पश्य पश्य विलोक्य’ इत्यंशे नेत्रविकाशात्अनुभावः। अस्मिन् अंशे आवेगभावप्रकाशनात् विस्मयेन व्यभिचारिभावः सूच्यते।

ख) **<u>महावीरचरितमिति रूपकेऽप्यद्भुतरसस्य प्रयोगवैविध्यं संलक्ष्यते।</u>**

यद्यपि ‘कारुण्यं भवभूतिरेव तनुते’ इत्याभाणकः श्रूयते, तथाप्यद्भुतरसस्य व्यवहारे भवभूतेः नैपुण्यं लक्ष्यते। अत्र महावीरचरिते भवभूतेरद्भुतरसव्यवहारः पर्यालोच्यते। दिङ्मात्रमुदाहरणं तावत् –

तत्र प्रथमाङ्के दृश्यते यत् -

नाटकेऽस्मिन् प्रथमाङ्के अद्भुतरसप्रयोगवैचित्र्यं दृश्यते यत् –

**जय जय जगत्पते ! रामचन्द्र ! जय ।**

**[सर्वे साद्भुतमवलोकयन्ति]**

**सीता - (सविस्मयानुरागं निर्वण्य । अपवार्य च। ) शरीरनिर्माणसदृशोऽस्यानुभावः।**

महर्षिविश्वामित्रस्य आश्रमेयज्ञानुष्ठानस्य दर्शनाय जनकस्य भ्रात्रा कुशध्वजेन सह सीता उर्मिमाला च मिथिलात्आगते । विश्वामित्रेण सह तत्र रामलक्ष्मणौ च भ्रातरौ उपस्थितौ। रामलक्ष्मणयो:सौम्यदर्शनं दृष्ट्वा कुशध्वज: विमुग्धोऽभवत् । कुशध्वज: कन्याभ्यां सहविश्वामित्रस्य आलापं कारयति । कुशध्वजेनोक्तं लाङ्गलेन भूमिकर्षणावसरे इयंतनया सीता समुद्धता अपराश्च द्वितीया उर्मिमाला जनकात्मजा।सीतोर्मिमालयो:अलौकिकं जन्मवृत्तान्तं श्रुत्वा लक्ष्मण: चमकितोऽभवत् । अलौकिकवस्तुदर्शनेनमनसि विस्मयभावो जायते इति मन्यते आलङ्कारिकेन जगन्नाथेन । तेनोक्तं यत् –"अलौकिकवस्तुदर्शनादिजन्मा आश्चर्याख्यो विस्मय:"। अयम्प्रकारो विस्मयोऽद्भुतएव । अत्र लक्ष्मणस्य चित्ते अद्भुतरसो द्योतयति । शरीरनिर्म्मार्णसरिसोसे अनुभाव:[186] ।

आलम्वनविभावः – सीता अत्र आलम्वनविभावः

उद्दीपनविभावः – सीतायाः जन्मनः अलौकिकवृत्तान्तमत्र उद्दीपनविभावः।

---

[186] D.R- "शरीरनिर्माणसदृश्योत्स्यानुभाव:" Edn-T.R.Ratnam Aiyar.

अनुभावः – नेत्रविकाशः ।

व्यभिचारिभावः - आवेगोऽत्र व्यभिचारिभावः।

पुनश्च दृश्यते अङ्केऽस्मिन् यत् -

**कण्ये - आश्चर्यमाश्चर्यम् । प्रियं न: प्रियं न: ।**

यो हरधनुं भुञ्जयिष्यति तेन सह सीताया: परिणयो भविष्यति इति राजाजनक: प्रतिज्ञाबद्ध: अभवत् । विश्वामित्रस्य आश्रमे ताटकावधात् परं रामचन्द्रायदिव्यास्त्रसमूहा: प्रयच्छति विश्वामित्र: । कुशध्वज: तस्य मनस्कामनां विश्वामित्राय ज्ञापयति यत् रामेण सह किम्प्रकारेण सीताया: परिणयो भविष्यति ।विश्वामित्रेणोक्तं जनकस्य सीतापरिणयविषये एतादृशी मनस्कामना आसीत् ।शम्भोर्वरादनुध्यानमात्रोपस्थित: रामचन्द्रस्य पुरत: तद्धनु: । शुण्डार: कलभेनयद्वदचले स्थापित: तद्वद् रामचन्द्र: बाहुयुगलं धनुकस्यापि सन्निहित: । धनुषः:ज्यारोपेण भग्नं जातं च तद्धनु: । रामचन्द्रस्य अलौकिकीं शक्तीं दृष्ट्वा राजाकुशध्वज:विस्मितोऽभवत् । अत्र लक्ष्मणेनोक्तं “ दोर्दण्डाञ्चित ........”श्लोकोऽयम्आलङ्कारिकेन धनञ्जयेन अद्भुतरसप्रसङ्गेण उदाहरणं दीयते।

आलम्वनविभावः – रामचन्द्रमवलम्ब्य विभावनोद्रेकात् आलम्बनविभावः।

उद्दीपनविभावः – हरधनुभङ्गदर्शनमत्र उद्दीपनविभावः।

अनुभावः - साधुवादोऽत्र अनुभावः

व्यभिचारिभावः - हर्षोऽत्र व्यभिचारिभावः।

पुनश्च दृश्यते यत् -

**लक्ष्मणः - अहो प्रसादः ।**

**“झटित्युन्मीलितप्रज्ञमप्रतर्क्य च शक्तिभिः ।**

**ज्योतिर्मयामिवात्मनं मन्ये विद्याप्रकाशनात् "[187] ॥**

**कन्ये - अहो! देवता मन्त्रयन्ते । आस्चर्यमाश्चर्यम्।**

**राजा - [ साद्भुतम् ] भग्नञ्च तत् ।**

अत्र श्लोके ‘विद्याप्रकाशनात्’ इत्युक्त्या विद्यामालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च ‘झटित्युन्मीलितप्रज्ञमप्रर्तक्य च शक्तिभिः’ इत्यंशे विभावनोद्रेकात् उद्दीपनविभावः। अपि च ‘अहो प्रसादः’ इत्यंशे साधुवादप्रकाशनात् अनुभावः सूच्यते। किञ्च श्लोकेऽस्मिन् विस्मयेन रोमाञ्चभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

पुनश्च दृश्यते यत् -

**“राक्षसः - [ स्वगतम् ] अहो दुरात्मनो रामहतकस्य सर्वङ्कषः प्रभावः ।”**

**लक्ष्मणः -** **दोर्दण्डाञ्चितचन्द्रशेखरधनुर्दण्डावभङ्गोँद्यत-**
**ष्टंकारध्वनिरार्थयवालचरित प्रस्तावनाभिण्डिमः।**
**द्राक्पर्यस्तकपालसंपुटमिलद्ब्रह्माण्डोदर-**
**भ्राम्यत्पिण्डितचण्डिमा कथमहो नाद्यपि विश्राम्यति।।[188]**

[187]महा.च.-,(अङ्कः -१,श्लोकः-४८)
[188]महा. च. – अङ्कः-१, श्लोकः-५४

ऋषिविश्वामित्रस्य आश्रमे एका राक्षसी प्रविष्टवती । तस्या कण्ठेअन्त्रप्रोतबृहत्कपालनलकत्रूरक्वण्यकङ्कण: । भीमदर्शणां राक्षसीं दृष्ट्वा सर्वे भीता:जाता: । सा राक्षसी सुकेतोर्दुहिता भार्या सुन्दासुरस्य च । मारीचजननी ताटको नामराक्षसी । विश्वामित्र: राक्षसीवधार्थं रामचन्द्रमादिष्टवान् । विश्वामित्रस्य आदेशवार्तांश्रुत्वा सीता चकिता जाता । सा चिन्तयति यत् ब्रह्मर्षिबालकोऽयं केन प्रकारेण ताटकां हन्तुं शक्यते इति चिन्तयित्वा सा विस्मिता जाता । परन्तु सहसा ताटकपतनंदृष्ट्वा कण्ये विस्मिते जाते । हन्मर्मभेदित: पवदुत्कटकङ्कपुत्रसंवेग:तत् क्षणकृतस्फुटदङ्गभङ्गा । नासाकुटीरकुहरद्वयतुलानिर्यदुद्बु- दध्वनसृक्प्रसरा मृतैवराक्षसी । राजपुत्र: रामचन्द्र: राक्षसीं प्रहरतिस्म । राजपुत्रस्य असाधारणंलक्ष्यभेदं दृष्ट्वा सीता उर्मिमाला च विस्मिते जाते । यो न: साधारण: स एवअसाधारण: । असाधारण: खलु विस्मय: । अयम्प्रकारो विस्मयोऽद्भुत एव ।अस्मिन् अंशे 'रामहतकस्य' इत्युक्त्या राममावलम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च 'सर्वङ्कषः प्रभावः' इत्यंशे विभावनोद्रेकात् उद्दीपनविभावः। एवञ्च 'स्वगतम्' इत्युक्त्या अनुभावः सूच्यते। किञ्च अंशेऽस्मिन् विस्मयेन गर्वभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

नाटकेऽस्मिन् द्वितीयाङ्के अद्भुतरसप्रयोगवैचित्र्यं दृश्यते यत् -

**"जामदग्न्य - [ स्वगतम् ] आश्चर्यमाश्चर्यम् । अन्य एवायं प्रकार: । किमपि चैतदसंविज्ञातनिबन्धनं माहात्म्यं सौजन्यं चोत्साहसंरम्भगम्भीरश्च पौरुषावष्टम्भ: ।**

**(प्रकाशम्) राम ! दशरथे स एवायमाचार्यपादानां प्रियः परशुः ।"[189]**

रामचन्द्रेण सह क्षणिकसाक्षात्कारेण परशुरामस्य क्रोधःअपगतः । परशुरामः शान्तोऽभवत् । परशुरामस्य स्वर्गमर्त्त्यौयोः वीर्यगाथाप्रसारं दृष्ट्वा रामचन्द्रः आश्चर्याअन्वितोऽभवत् । परशुरामस्य गुरुः पिनाकी इति सर्वजनप्रसिद्धः । तस्य परशुरामस्य अनिर्वचनीयो शौर्यः आसीत् । ब्रह्मतेजः तस्मिन् वर्तते स आश्रयभूतः । परशुरामस्य अलौकिकं महिमानं दृष्ट्वा रामचन्द्रः चमकितोऽभूत् । अपि च परशुरामस्य सौजन्यपुर्णं अन्तःकरणं दृष्ट्वा जामदग्न्योऽपि विस्मितोऽभवत् । रामचन्द्रस्य असाधारणं चारित्रिकवैशिष्ट्यं दृष्ट्वा जामदग्न्यः विस्मितोऽभवत् । असाधारणः खलु चमत्कारः । विस्मयः एव अद्भुतः । रामचन्द्रस्य विनयपूर्णम् अन्तःकरणं स्थूलबुद्ध्याः न ज्ञायते अपि तु सूक्ष्मरूपेण ज्ञायते । रामचन्द्रस्य अप्राकृतस्य चरितातिशयस्य भावैरत्याद्भूतै दृष्ट्वा जामदग्न्यो विस्मितोऽभवत् ।अस्मिन् अंशे रामचन्द्रमवलम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च 'अन्य एवायं प्रकारः। किमपि चैतदसंविज्ञातनिबन्धनं माहात्म्यं सौजन्यं चोत्साहसंरभ्यगम्भीरश्च पौरुषावष्टम्भः' इत्यंशे विभावनोद्रेकात् उद्दीपनविभावः। अपि च अंशेऽस्मिन् हर्षभावप्रकाशनात् अनुभावः सूच्यते। किञ्च अंशेऽस्मिन् 'अन्य एवायं प्रकारः । किमपि चैतदसंविज्ञातनिबन्धनं माहात्म्यं सौजन्यं चोत्साहसंरम्भगम्भीरश्चपौरुषावष्टम्भः' इत्युक्त्या गर्वभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

पुनश्च अङ्केऽस्मिन् दृश्यते यत् -

---

189 . महा. च. अङ्कः-२

**"जामदग्न्य: - (स्वगतम्) अहो! स्वगुणपरगुणोत्कर्षपरिणामग्राहि सौजन्यपूतमन्तः करणमस्य राजन्यपोतस्य । पारमार्थिकविनयदुर्विभाव्योतनिपुणबुद्धिग्राह्यो महान ऽङ्कार: ।**

**"अप्राकृतस्य चरितातिशयस्य भावै:**

**रत्युद्भुतैर्मम हृतस्य तथाप्यनास्था ।**

**कोऽप्येष वीरशिशुकाकृतिरप्रमेय**

**सामर्थ्यसारसमुदायमय: पदार्थ: [190]॥**

**आश्चर्यम्-**

**"सम्भाव्यसप्तभुवनाभयदानपुण्य-**

**सम्भारमस्य वपुरत्र हि विस्फुरन्ति ।**

**लक्ष्मीश्च सात्त्विकगुणोज्ज्वलितञ्च तेजो**

**धर्मश्च मानविजयौ च पराक्रमश्च "[191] ॥**

हरधनुः भङ्गनाय रामचन्द्रं हन्तुम् ऐच्छन् परशुरम: मिथिलाया: राजान्तपुर प्रविष्टवान्। रामचन्द्रस्य दुरात्मन: क्षत्रियरनात्मज्ञतां दृष्ट्वा परशुराम: विस्मितोऽभवत् । यत् धनु: पूर्वे केनापि न भग्नम् अद्य तत् धनु: रामचन्द्रेण भङ्ग्यते इति दृष्ट्वा परशुरामो क्रुद्धोऽभवत्। क्रोधान्वित: सन् स परशुराम: कुठारहस्तेन रामचन्द्रं निकषा उपस्थित: । धैर्येण

---

[190]महा.च.-,(अङ्कः २,श्लोक:-३९)

[191]महा.च,(अङ्कः -२,श्लोक:-४0)

ससम्मानं रामचन्द्रः परशुरामस्य कुठारम् उपहसति इति दृष्ट्वा परशुरामः विस्मितोऽभवत् । मृत्युमुखे उपस्थित्यापि रामचन्द्रस्य निर्भीकं रूपं दृष्ट्वा सीता सजलनेत्रेण विस्मितास्ति। रामचन्द्रस्य मनसि एकं अद्भुतं माहात्म्यं सौजन्यञ्च दृष्ट्वा जामदग्न्यो चमत्कृतोऽभवत् । अयम्प्रकारो चमत्कारो विस्मय एव।अत्र श्लोके 'सौजन्यपूतमन्तःकरणमस्य राजन्यपोतस्य' इत्यंशे रामचन्द्रवलम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च 'कोऽप्येष वीरशिशुकाकृतिरप्रमेय महात्मासारसमुदायमयः पदार्थ' अपि च 'लक्ष्मीश्च सात्तिकगुणोज्ज्वलितश्च तेक्तो धर्मश्च मानविजयै च पराक्रमश्च' इत्युक्त्या विभावनोद्रेकात् उद्दीपनविभावः। अपि च श्लोकेऽस्मिन् गदगदवचनभावात् अनुभावः सूच्यते। किञ्च अस्मिन् श्लोके विस्मयेन हर्षभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

नाटकेऽस्मिन् पुनश्च पञ्चमाङ्के अद्भुतरसप्रयोगवैचित्र्यं दृश्यते यत् -

**"सम्पातिः - आश्चर्यमाश्चर्यम् । अथवा नाश्चर्यमेतद् दाशरथौ । महत् पुनरपावृतं वैरद्वारमिति मन्यमानः सम्प्रमुग्धोऽस्मि । तद्वत्स जटायो ! नास्मिन्नवसरे सीतारामलक्ष्मणास्त्वया क्षणमपि मोक्तव्याः।**

**स्वसुः सोदर्यायाः कथमिव निकारं दशमुख-**

**स्तथा भूयोभूयः स्वजनविनिपातं च सहते।**

**मदान्धो मयावी प्रभुरमितवीर्योऽन्तिकचरः**

**सपत्नः कष्टं नो निपुनः मनुपाल्यां हि शिशवः।।**[192]

**अहमपि समुद्रे कृताह्निकरः शिवतातिमनुसंधास्यामि।**

**(इति निष्क्रान्तः) ”**

कावेरीनद्या: तटदेशे मलयपर्वतस्य सान्ददेशे गिरिराज इव तिष्ठति विहग: सम्पाति: । असाधारण: भ्रातृस्नेह: तस्य । अवष्टभ्यासौ जटायोः उपरि ततपक्ष: शिशुरिति स्वपक्ष्याभ्यां प्लोषादविकलमरक्षत् करुणया । तस्य असाधारणां भातृप्रीतिं दृष्ट्वा जटायु: विस्मितोऽभवत्। रामचन्द्र: अगस्तस्योपदेशेन चित्रकूटपर्वतात् पञ्चवटीम् आगत्य प्रतिवसति। तत्र रामचन्द्रं निकषा  रतिकामा सूर्पनखा उपस्थिता। सूर्पनखाया: निर्लज्जतां दृष्ट्वा सम्पातिः विस्मितोऽभवत्। सूर्पनखाया: विचित्रवृत्तिं दृष्ट्वा सम्पाति चमकितोऽभवत् । विचित्रवस्तुदर्शनेन मनसि विस्मयभावः जायते इति मन्यते आलङ्कारिकेण शारदातनयेन । तेनोक्तं यत् - " विचित्रा यस्य भवति चित्तवृत्तिस्ततोऽद्भुत: " । अस्मिन् अंशे 'नाश्चर्यमेतद् दाशरथौ' इत्युक्त्या दाशरथमालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च 'अथवा नाश्चर्यमेतद्' इत्यंशे विभावनोद्रेकात् उद्दीपनविभावः। अत्र अवलोकनरूपैः अनुभावः सूच्यते। किञ्च अंशेऽस्मिन् 'मन्यमानः सम्प्रमुग्धोऽस्मि' इत्यंशे विस्मयेन चिन्ताभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

पुनश्च अङ्केऽस्मिन् दृश्यते यत् -

[192]महा. च. अङ्कः-५, श्लोकः-१४

**"लक्ष्मण: - आर्य ! पश्य पश्य-**

**सौहित्यात्पृथव: क्वथन्ति रुधिरोत्सेकाश्चमत्कारिण-**

**ष्टङ्कारोत्कटमुच्चरन्ति नलकास्त्वङ्गांसविस्रंसनात् ।**

**उत्सर्पन्त्यथ मेदसां विलयनादुद्बुद्बुदा वीचय-**

**श्चित्रं श्चित्रमुदेति कोऽप्ययमितो दिव्य: श्मशानानलात् "[193] ॥**

दण्डकारण्ये श्रमणा इति एका चण्डालतापसी समुपस्थिता । सा विभीषणस्य पत्रमिदं नीत्वा रामं निकषा आगतवती । सहसा सा दनुः नाम्ना एकेन कबन्धकेन आक्रान्ता । श्रमणाया: आर्तचित्कारं श्रुत्वा लक्ष्मण: श्रमणां रक्षितवान् । श्रमणा रामलक्ष्मणञ्च नीत्वा ऋष्यमूकपर्वते उपस्थिताः । तत्र सुग्रीवविभीषणहनूमत्प्रभृतिभि: सह रामचन्द्रस्य मित्रताभवत् । पथि राक्षसकबन्धकस्य चितां दृष्ट्वा लक्ष्मणो विस्मितोऽभवत् । कबन्धकस्य रुधिवोत्सेकाश्चमत्कारिण: ष्टङ्कारोत्कटमुच्चरन्ति नलकास्त्वङ्गांसमिस्रंसना । उत्सर्पन्त्यथ मेदसां विलयनादुद्बुद्बुदा वीचयश्चित्रं श्चित्रमुदेति कोऽप्ययमिति दिव्य: श्मशानानलात् । दिव्यपुरुषदर्शनेन मनसि विस्मयभावो जायते इति मन्यते आलङ्कारिकेण हेमचन्द्रेन । अयम्प्रकारो विस्मयो अद्भुत एव । अत्र दिव्यपुरुष: श्रिय: पुत्र दनुरिति । इन्द्रस्याभिशापेन स राक्षस: अभवत् ।अत्र श्लोके ‘कोऽप्ययमिति दिव्यः’ इत्यंशे दनु इति दिव्यपुरुषमालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च ‘कोऽप्ययमिति दिव्यः श्मशानानलात्’ इत्यंशे विभावनोद्रेकात् उद्दीपनविभावः। एवञ्च ‘पश्य पश्य’ इत्युक्त्या प्रेक्षणरूपैः अनुभावः

[193]महा.च.-,(अङ्कः -५,श्लोक:-३३)

दोत्यते। किञ्च 'कोऽप्ययमिति' इत्यंशे वितर्कभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

पुनश्च दृश्यते यत् -

**"श्रमणा - आश्चर्यमाश्चर्यम् !**

**यत्संक्रन्दनन्दन: कपिवृषा निर्मथ्य दोःस्तम्भयो-**

**र्वापारेण निरास्थदस्तिगिरिवद्देवद्विषो दुन्दुभे: ।**

**तत्काङ्कालमकालपाण्डुरधनप्रस्थार्धि रुन्धन्नभ:**

**पादाङ्गुष्ठविवर्तनादयमितो निर्विन्ध्यमाविध्यति"[194] ॥**

राक्षस: कबन्ध: रामचन्द्रस्य कृपया शापमुक्तोऽभवत् । तस्य प्रकृत्या एव नाम दनुःइति । इन्द्रस्य अस्त्रघातेन स कबन्धकस्य रूपं धारयति । रामचन्द्रस्य आदेशेन स दनु: आत्मरूपपरिग्रहाय स्वर्गलोकं गच्छति स्म । इत्यवसरे श्रमणा रावणेन सह वाल्या मित्रतायाः काहिणीं रामचन्द्राय ज्ञापयति । तत: दशानन: नुन्मुत्थाय नताय नाथिवतते सख्यं प्रार्थयते । तदाकर्ण्य लक्ष्मण: रावणं दुरात्मन; पौलस्त्यकुलपांसन: इति उक्तवान् । रामचन्द्र एकदा शुभ्रो गिरिसमीपे उपस्थित: ।अयं नगर: रामचन्द्रस्य मार्गस्य प्रतिबन्धकरूपेण अवस्थित: । तदा रामचन्द्र: पादाङ्गुष्ठेन पर्वतं क्षिपति। रामचन्द्रस्य इमाम् अलौकिकीं दैहिकशक्तिं दृष्ट्वा श्रमणा विस्मिता जाता । अलौकिकवस्तुदर्शनेन मनसि विस्मयभावो जायते । अयम्प्रकारो विस्मयोऽद्भुत एव । वास्तविकतया नगरोऽयं वाल्या: यशोराशिरूपेण विराजते ।अत्र श्लोके

---

[194]महा.च.,(अङ्कः -५,श्लोक:-३९)

'यत्संक्रन्दनन्दनः' इत्यंशे संक्रन्दनन्दनमालम्ब्य विभावनोद्रेकाद् आलम्बनविभावः। अपि च 'कपिषा निर्मथ्य दोरस्तम्भयो ... निर्विन्ध्यमाविध्यति' इत्यंशे विभावनोद्रेकात् उद्दीपनविभावः। अपि च 'आश्चर्यमाश्चर्यम्' अत्यंशे नेत्रविकाशरूपैः अनुभावः सूच्यते। किञ्च श्लोकेऽस्मिन् विस्मयेन गर्वभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

पुनश्च नाटकेऽस्मिन् षष्ठाङ्के अद्भुतरसप्रयोगवैचित्र्यं दृश्यते यत् -

**"प्रहस्तः – अहो ! मनुष्यपोतस्य तावदत्युर्जस्वलं चरितम्।तहाहि –**

**भीमं गोष्पदवद्धिलङ्घ्य परितः कल्लोलमालाकुलं**
**पाथोनाथमुपेत्य मन्थरतरं लङ्कानिवद्धेक्षणः।**
**स्कन्धावारमसौ निवेश्य विषमे सौवलमूर्ध्नि स्वयं**
**कैश्चिद्वानरपुंगवैः परिवृतोऽध्यास्ते पुरः प्राङ्गणम्॥"(६।१७)**

अत्र श्लोके 'मनुष्यपोतस्य' इत्युक्त्या मनुष्यपोतमालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च 'तावदत्युर्जस्वलं चरितम्' इत्यंशे विभावनोद्रेकात् उद्दीपनविभावः। एवञ्च श्लोकेऽस्मिन् नेत्रविकाशरूपैः अनुभावः सूच्यते। किञ्च अस्मिन् श्लोके विस्मयेन रोमाञ्चभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

पुनश्च अङ्केऽस्मिन् दृश्यते यत् -

**"चित्ररथः - (समस्ततोऽवलोक्य) अहो कथमेते वणौकसोऽपि महति सपत्नसंगरे स्वाभिधानषोगमेव ख्यापयन्तः पञ्चषाः केवलं रामभद्रपादमूलमासेवन्ते।**

**तथा हि -**

**सुग्रीवः स्यन्दनस्याग्रे सोभङ्गदः पृष्ठतः पुनः।**

**पञ्चषा जाम्मवाम्भावी लङ्काधीशोऽपि पार्श्वयोः "[195] ॥**

अङ्गदः रामचन्द्रस्य दूतरूपेण लङ्कां प्रविष्टवान् । सीतापरित्यागवार्तां दूतमुखात् श्रुत्वा दशाननः क्रोधान्वितोऽभवत् । तदा स दशाननः रामचन्द्रेण सह संग्रामेषु अवतीर्णः । भीषणं युद्धम् आरब्धम् । भीषणाकृतयः वानराः राक्षसानां घ्नन्ति स्म । सहस्राः राक्षसाः संग्रामे अवतीर्णाः । ते घोरशब्देन संग्रामे अवतीर्णाः । यदिदमधित्यकातः सुवेलाद्रेरकाङः एव प्रवलकिलिकिलाकोलाहलमुखरितहरिमुखं वलीमुखचक्रमक्रममेवोच्चलिताः वानराः । रक्षोभिर्विपिनौकसां परिवृढैश्चारादपास्त्रक्रमं मुष्टीमुष्टि कचाकचि प्रहरणप्रक्षेपमूयतात्मभिः । वानरवीराणां महद्वाहुदण्डः । राक्षसपतेःप्रेष्याः संग्रामसीमन्यनुजशतवृतो मेघनादोऽपि पाश्वे वामेऽन्यत्र प्रवीरेष्वतिविषमसदोद्वोधितः कुम्भकर्णः । एवमभियोगाद्धूरं द्विषन्तमभिवीक्ष्यापि निष्प्रकम्प एव रामभद्रः । आक्रम्यैकैकमेते रजनिचरभटाः कोटिशः शस्त्रवर्षैः भास्वद्वंशप्ररोहं विदधति परितः योधने यौगपद्याः । अपि च युद्धभूमा विन्धाते शत्रुशस्त्रप्रविदलनफलस्पष्टवाणाभियोगौ। रामलक्ष्मणौ संग्रामे प्रभावावकलितमहिमप्रभावौ । युद्धेवानाराणांचरित्रंदृष्ट्वाचित्ररथःविस्मितः जातः।वानराः

रामचन्द्रंरक्षायसर्वदाएवस्वकीयप्राणोत्सर्गकरणेतत्पराःआसन्।वानराणाम्आसाधारणमिदंप्रभुभक्तिंदृष्ट्वाचित्ररथश्चमत्कृतोऽभवत्।असाधारणवस्तुदर्शनमेवचित्तेविस्मयकारणम्।विस्मयोऽयम्अद्भुतः ।लक्ष्मणेनवाणवज्रेणराक्षसाःमर्मविद्धा सन्त आहतावस्थायाम्इतस्ततः धावनेनपर्वतमिवपतन्ति।कुम्भकर्णेन सह रामचन्द्रस्य युद्धं

---

[195]महा.च.-,(अङ्कः -६,श्लोकः-३८)

दृष्ट्वा चित्ररथ: विस्मितोऽभवत् । रघुपते: शरजालेन कुम्भकर्ण: विद्धः। पितु: एतादृशीम् अवस्थां दृष्ट्वा कुम्भकर्णस्य पुत्र: मूर्तिधरपर्वतराजमिव क्रुद्ध: सन् अकस्मात् आगतवान् । कुम्भकर्णेन सह रामचन्द्रस्य युद्धकाले सहसा सुग्रीवं दृष्ट्वा चित्ररथो विस्मितोऽभवत् । वानराणां स्वभाव एव एतादृशः (मध्ये आगमनम्) इति चिन्तयित्वा सुग्रीव उपहासञ्चकार । सुग्रीव: कुम्भकर्णं भूमौ निक्षिप्य क्रोधवशात् प्रहारञ्च अकार्षीत् । सुग्रीवस्य एतादृशम् असाधारणं बलं दृष्ट्वा चित्ररथ: चमत्कृतोऽभवत् । यत् साधारणं नास्ति तत् असाधारणम् । असाधारणमेव अलौकिकम्। अलौकिकदर्शनमेव चित्ते विस्मयाकारेण परिणमते । अत्र सुग्रीवस्य अलौकिकबलं दृष्ट्वा चित्ररथस्य मनसि विस्मय आविर्बभूव । विस्मयोऽयम् अद्भुत: । अत्र श्लोके 'वनौकसोऽपि' इत्यंशे विभावनोद्रेकात् आलम्बनविभावः। अपि च 'महति समत्नसंगरे ... रामभद्रपादमूलमासेवन्ते' इत्युक्त्या विभावनोद्रेकात् उद्दीपनविभावः। अपि च 'समस्ततोऽवलोक्य' इत्यंशे अनुभावः सूच्यते। किञ्च श्लोकेऽस्मिन् विस्मयेन गर्वभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

पुनश्च अङ्केऽस्मिन् दृश्यते यत् -

**"चित्ररथ: - देवराज ! वहुभिरेकस्याभियोगेऽपि शुभोदर्कतेत्येतदवहुव्यक्तिनिष्ठम् ।**

**[ सचमत्कारम् ] इतोऽवधत्तां देवराज: ।**

**रक्षोनाथे सरभसमितो निर्गते विग्रहेच्छु:**

**क्षुभ्यत्युच्चै रघुपतिश्चरै: कीलित: कुम्भकर्ण: ।**

**किम्भोत्प्येतां पितुरुपनतां वीक्ष्यावस्थां वपुष्मान्**

**गर्वः किं वा निपतति जवाज्जङ्गमः क्ष्माधरेन्द्रः [196] ॥**

**(साद्भुतम्) अहो छिद्रसन्धारिता मर्कटजातेः । यतः -**

**"उद्दिश्याराद्दशरथकुलाङ्कूरमाद्यं पतन्तं।**

**सद्यः कुम्भं मृधभुवि कपिः कोऽपि मध्ये रुरोध ॥**

**(सविशेषं निर्वण्य) कथं सुग्रीव एव । (सविचिकेत्सम्)**

**दौःस्तम्भाभ्यां सरभसमथापीड्य विक्षिप्य भूमौ**

**क्रान्त्वाप्येनं प्रतिघविवशो माषपेषं पिपेष "[197] ॥**

राक्षसानां सम्मुखविपदः मन्त्रीमाल्यवाणः प्रत्यक्षीकरोति । रावणस्य चक्रान्तं सर्वं व्यर्थं कृत्वा सवेगं लङ्कां प्रति रामचन्द्रः धावति । सुग्रीवेन सह रामचन्द्रस्य मित्रता राक्षसानां पक्षतः विपदजनकः । एकदा हनुमान् लङ्कां प्रविश्य शिलाखण्डेन वृक्षेण राक्षसान् घातयति। दण्डकारण्यात् जम्वुदीपात् राक्षसाः विताडिताः । रावणः प्रासादात् अशोकवनं पश्यति । शत्रोरागमनवार्तां महिषी मन्दोदरी रावणाय ज्ञापयति । तदाकर्ण्य रावणेन उपहसितम् । स्वल्पकालेन सेनापतिरपि प्रहस्तः रामस्यागमनवार्तां रावणाय ज्ञापयति । रामचन्द्रस्य शक्तिं दृष्ट्वा प्रहस्तः विस्मितोऽभवत् । भीमं परितः कल्लोलमालाकुलम् अर्णवं गोष्पद इव उपेत्य रामचन्द्रः लङ्कां प्रविष्टः । स्वयं परिवृतोऽध्यास्ते लङ्कापरप्राङ्गनं सौवलः । साधारणानां कृते महार्णवस्य अवतरणं न सम्भवति । असाधारणानां कृते तु सम्भवति । रामचन्द्रः असाधारणः पुरुषः । असाधारणवस्तुदर्शनेन चित्ते चमत्कारभावो जायते । अयम्प्रकारो

[196] महा.च.-,(अङ्कः ६,श्लोकः-४४)

[197] महा.च.-,(अङ्कः -६,श्लोकः-४५)

चमत्कारो विस्मय एव।अत्र श्लोके ‘कुम्भकर्णः’ इत्युक्त्या कुम्भकर्णमालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च ‘रक्षोनाथो … कीलितः’ इत्यंशे विभावनोद्रेकात् उद्दीपनविभावः। एवञ्च अस्मिन् श्लोके चेलाङ्गुलभ्रमनादिभिः अनुभावः सूच्यते। किञ्च ‘कथं सुग्रीव एव’ इत्यंशे सन्देहभावप्रकाशनात् वितर्करूपव्यभिचारिभावः सूच्यते।

नाटकेऽस्मिन् सप्तमाङ्के दृश्यते यत् -

**“लङ्का - अम्मो ! कथं भगवत: पशुपतेरपि मित्रं निधानाधिपति: स्वयमेवमुपचरति रामभद्रम् ।**

**अलका - अयि ! किमत्राश्चर्यम् ?**

**"इदं हि तत्त्वं परमार्थभाजामयं हि साक्षात्पुरुष: पुराण: ।**

**त्रिधा विभिन्ना प्रकृति: किलौषा त्रातुं भुवि स्वेन सतोऽवतीर्णा "[198] ॥**

राम-रावणयो: संग्रामे रावण: पराजितो सन् पञ्चभूतं प्राप्नोति । दशाननस्य मृत्युसंवादे लङ्कायां शोकावस्था दृश्यते । दशाननस्य भगिनी अलका सान्त्वनार्थं लङ्कायाम् आविर्भूता । तया उक्तं यत् रामचन्द्र: न दशाननस्य शत्रुरभवत् । स हि परमार्थभाजनं साक्षात् पुराणपुरुष: । आत्मन: कर्मफलेन दशाननस्य इयमवस्था । अपि च सा उक्ता वैमात्रेयस्य पौलस्तस्य आदेशेन गन्धर्वराजाच्चित्ररथादमुं वृत्तान्तमुपलभते । विभीषणस्य च लङ्काभिषेकसाक्षात्कारस्य दर्शनाय रावणापहतविमानराजस्य पुष्पकस्य च रामभद्रोपस्थानोपदेशाय द्रष्टुं सा आगतवती । रावणस्य वैमात्रेयस्य अनुजस्य रामचन्द्रं प्रति

---

[198]महा.च.-,(अङ्कः -७,श्लोक:-२)

स्नेहदृष्टिं दृष्ट्वा लङ्कावासिन: विस्मिता सन्ति। कुवेरस्य विचित्रचरित्रदर्शनेन सा चमत्कृता। विचित्रवस्तुदर्शनेन चित्ते अद्भुतरस: जायते ।अत्र श्लोके 'मित्रं निधानाधिपतिः' इत्यंशे निधानाधिपतिमालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च 'स्वयमेवमुपचरति रामभजद्रम्' इत्यंशे विभावनोद्रेकात् उद्दीपनविभावः। अपि च श्लोकेऽस्मिन् साधुवादरूपैः अनुभावः सूच्यते। किञ्च अस्मिन् श्लोके विस्मयेन हर्षभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

पुनश्च दृश्यते यत् -

**"सीता - (साद्भुतम्) आर्यपुत्र ! एते पुन: कतमा ? दुरतोऽनिर्धारितदक्षिणोद्देशो अविस्तीर्यमाणश्यामलत्वपरिसरा दृश्यन्ते ।"**

लङ्कानगरात् प्रत्यागमनसमये प्रकृत्या विचित्रां शोभां दृष्ट्वा सीता विस्मितास्ति । विचित्रशोभादर्शनेन चित्ते विस्मयभावो जायते । अस्माद् विस्मयाद् अद्भुतरसो जायते एव।अस्मिन् अंशे 'आर्यपुत्र' इत्युक्त्या मार्यपुत्रमालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च 'दूरतोऽनिर्धा ... दृश्यन्ते' इत्यंशे विभावनोद्रेकात् उद्दीपनविभावः। अपि च अंशेऽस्मिन् प्रेक्षणरूपः अनुभावः सूच्यते। किञ्च 'एते पुनः कतमा ?' इत्यंशे सन्देहभावप्रकाशनात् वितर्करूपो व्यभिचारिभावः सूच्यते।

पुनश्च दृश्यते यत् -

**"राम: - [ निरूप्य सविस्मयम् ]**

**य: पूर्वेषां न: कुलस्य प्रतिष्ठा देव: साक्षादेष धाम्नां निधानम् ।**

**एय्या: सार: कोऽपि मूर्तो विवस्वान् प्रत्यासन्न: पुष्पकारोहणेन [199] ॥**

**सीता - (उच्चैर्निरूप्य) अहो ! कथं दिनेऽपि तारकाचक्रमिवैतद् दृश्यते ।”**

पुष्पकरथमारुह्य रामचन्द्र: सीतया लक्ष्मणेन च सह अयोध्यां प्रत्यागतवान् । प्रत्यागमनकाले ते प्रकृत्या अपूर्वां शोभाम् अपश्यन् । ते सर्वे पूर्वकथाम् अस्मरन् । केन प्रकारेण सीता अपहरति स्म । केन प्रकारेण रामचन्द्र: तस्य अनुसन्धानं करोति स्म । इमां घटनां ते स्मरन्ति स्म । सहसा राक्षसनामश्रवणमात्रेण सीता भीता जाता । लक्ष्मणस्य धनुष्टङ्कारेण राक्षसा: अभिधानमात्रमवशिष्यते इति आश्वस्तो भवति स्म।सहसा विमानराजस्य गति: अन्यादृशी। । सम्मुखे विवस्वानस्य विचित्रां शोभां दृष्ट्वा रामचन्द्र: चमत्कृतोऽभवत् । विचित्रवस्तुदर्शनेन मनसि विस्मयभावो जायते। अयम्प्रकारो विस्मयोऽद्भुतरसस्य स्थायिभाव: । दिवसे तारकाचक्रस्य अपूर्वां शोभां दृष्ट्वा सीता विस्मिता जाता । अपूर्ववस्तुदर्शनेन मनसि विस्मयभावो जायते ।अत्र श्लोके ‘मूर्तो विवस्वान्’ इत्यंशे अरुणमालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च, ‘यः पूर्वेषां नः कुलस्य प्रतिष्ठा देवः साक्षादेष धाम्ना निधानम्’ इत्युक्त्या विभावनोद्रेकात् उद्दीपनविभावः। अपि च ‘निरूप्य सविस्मयम्’ इत्यंशे अनुभावः सूच्यते। किञ्च श्लोकेऽस्मिन् विस्मयेन हर्षभावप्रकाशनाद्व्यभिचारिभावः सूच्यते।

पुनश्च दृश्यते यत् -

**“राम: - (परितो विलोक्य । ससम्भ्राद्भुतम्) कथमेकपद एव सर्वमहो चक्षुगोचर: ? परिच्छेद्या च सर्गस्थिति: ।”**

---

[199]महा.च,(अङ्कः ७,श्लोक:-२१)

अस्मिन् अंशे ‘परिच्छेद्या च स्वर्गस्थितिः’ इत्यंशे विभावनोद्रेकात् आलम्बनविभावः। अपि च ‘परितो विलोक्य’ इत्यंशे अनुभावः सूच्यते। किञ्च ‘कथमेकपद एव सर्वमहो चक्षुगोचरः ?’ इत्यंशे विस्मयेन सन्देहभावप्रकाशनात् वितर्करूपो व्यभिचारिभावः सूच्यते।

पुनश्च दृश्यते यत् -

**“सीता: - अहो ! इदं किमप्यदृष्टपूर्वमन्यादृशमेव दृश्यते न मानुषो नापि पशु:।”**

अस्मिन् अंशे ‘न मानुषो नापि पशुः’ इत्यंशे विभावनोद्रेकाद् आलम्बनविभावः। अपि च अंशेऽस्मिन् नेत्रविकाशरूपैः अनुभावः सूच्यते। किञ्च ‘इदं किमप्यदृष्टपूर्वमन्यादृशमेव दृश्यते’ इत्यंशे सन्देहभावप्रकाशनात् वितर्करूपो व्यभिचारिभावः सूच्यते।

पुनश्च दृश्यते यत् –

**“लक्ष्मणः – आर्य ! कथमेते भुवां परिसराः संस्तुतपूर्वाण्यविषयग्राहित्वंन क्षमन्तेचक्षुषः।”**

कैलासपतिना कुवेरेण सह रामचन्द्र: लक्ष्मणेन सह साक्षात्कारोऽभवत् । यावत् फणीन्द्रशिरसि क्षितिचक्रमेतद् तावत् प्रशस्तचरितैरूपगीयताम् इमे पूतचरित्रा: । हिमालयस्य सानुदेशे कर्पूरखण्डोज्ज्वला: भूखण्डं दृष्ट्वा लक्ष्मण: विस्मितोऽभवत् । तत्र भुर्जवल्कलभृतोपरिहितो गौरीगुरवो विराजन्ते। तत्त्वलोकनिरस्तमोहतमसामध्यात्मविद्याजुषां ब्रह्मविदां निसर्गमधुरां सौमं तेज: जागर्ति । अस्याः पृथिव्याः विचित्रां शोभां दृष्ट्वा लक्ष्मण: चमत्कृतोऽभवत्। विचित्रवस्तुदर्शनेन मनसि विस्मयभावो जायते । अयम्प्रकारो विस्मय अद्भुत एव ।अस्मिन् अंशे ‘कथमेते भुवां’ इत्यंशे भुवमालम्ब्य विभावनोद्रेकात्

आलम्बनविभावः। अपि च 'परिसराः संस्तुतपूर्वाण्यविषयग्राहितुं न क्षमन्ते चाक्षुषोः' इत्यंशे विभावनोद्रेकात् उद्दीपनविभावः। किञ्च अंशेऽस्मिन् विस्मयेन हर्षभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

पुनश्च दृश्यते यत् -

**"रामः - अहो महात्मानोऽपि वात्सल्यपरतन्त्राः । यन्महिम्ना तपः स्वाध्याययोर्लवशो विभक्ते समये तत्राप्यागमनमनुरुध्यन्ते । अथवा युक्तमेवैतत् । यतः करुणापारतन्त्रेण मृदुस्वभावास्ते तपोवनरुरुषु तरुषु च किं मनुष्येषु । विशेषस्तु**

**"राज्ञां मार्तण्डवंश्यानां गृहे नौ जन्म केवलम् ।**

**शास्त्रास्त्रज्ञानमुख्यस्तु संस्कारोऽस्मान्महात्मनः "[200] ॥**

अत्र श्लोके विश्वामित्रमालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च 'अहो महात्मानोऽपि वात्सल्यपरतन्त्रा' इत्यंशे विभावनोद्रेकात् उद्दीपनविभावः। अपि च अंशेऽस्मिन् साधुवादरूपः अनुभावः सूच्यते। किञ्च अंशेऽस्मिन् विस्मयेन हर्षभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

पुनश्च दृश्यते यत् -

**"विभीषणः - (विलोक्य) किमिदकाण्ड एव नीहारजालैरिव क्षमारजोभिराच्छाद्यन्ते ककुभः ।**

**(सर्वे सविस्मयं पश्यन्ति)"**

---

[200]महा.च,(अङ्कः ७,श्लोकः-२९)

अस्मिन् अंशे 'नीहारजालैरिव' इत्यंशे नीहारजालमालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च 'क्षमारगोभिराच्छाद्यन्ते ककुभः' इत्यंशे विभावनोद्रेकात् उद्दीपनविभावः। अपि च 'विलोक्य' इत्यंशे अनुभावः सूच्यते। किञ्च 'किमिदकाण्ड एव' इत्यंशे सन्देहभावप्रकाशनात् वितर्करूपो व्यभिचारिभावः सूच्यते।

पुनश्च दृश्यते यत् -

**"सर्वाः - अहो राक्षसानां दुष्टताभियोगो य इहस्थितमवलाजनमपि वाधते ।**

**वसिष्ठः - हुं मङ्गलसमयेऽलमलं यत्किञ्चित्दुःखैः का पुनरद्यापि राक्षसाभियोगवार्ता ।**

**रामः - (वसिष्ठं विलोक्य सोल्लासम्) स एष भगवान्मैत्रावरुणिः ।**

**"यद्दर्शनात् किमप्येवं द्रवीभवति मे मनः ।**

**राकासुधाकारलोकादिन्दुकान्तोपले यया "[201] ॥**

अत्र श्लोके वशिष्ठमालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च 'राकासुधाकारलोकादिन्दुकाण्डोपले यया' इत्यंशे विभावनोद्रेकात् उद्दीपनविभावः। अपि च 'वशिष्ठं विलोक्य सोल्लासम्' इत्यंशे हर्षरूपानुभावः सूच्यते। किञ्च श्लोकेऽस्मिन् विस्मयेन हर्षभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

पुनश्च दृश्यते यत् -

**"विश्वामित्रः - (दिव्यर्षिगणमुद्दिश्य) निर्वत्यतां रामभद्रस्याभिषेकः ।**

---

[201]महा.च.-,(अङ्कः ७,श्लोकः-३४)

**(मुनयो यथोचितमाचरन्ति)"**

**(नेपथ्ये दुन्दुभिध्वनि :)**

**(सर्वे सविस्मयं पुष्पवृष्टिं रूपयन्ति)"**

परिशेषे वक्तव्यं यद्भवभूतिनाद्भुतरसमुपरि तुलनात्मकं गवेषणं विहितमिति। कालिदासवद्भवभूतिरपि अद्भुतरसप्रयोगविधावद्वितीयः। अस्मिन् अंशे 'रामभद्रस्याभिषेक' इत्युक्त्या रामस्य अभिषेकोऽसवमालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अत्र अभिषेककार्यं दृष्ट्वा विश्वामित्रस्य मनसि उद्दीपनभावः जायते। अपि च 'दुन्दुभिध्वनिः' इत्यंशे घोषरूपः अनुभावः सूच्यते। किञ्च अंशेऽस्मिन् विस्मयेन हर्षभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

# अर्वाचीनेषु कतिपयेषु दृश्यकाव्येषु अद्भुतरसस्य स्थानान्वेषणम्

## ➢ किं नाम आधुनिकसंस्कृतसाहित्यम्

‘अधुना भव’ इति विग्रहेऽधुनापदात् ठञ्प्रत्यये निष्पन्नोऽयमाधुनिकशब्दः। ‘अधुना यदस्ती’त्यधुनापदस्यार्थः। नन्वत्र ‘अधुना’ इत्युक्ते कस्य समयस्य बोधः?सप्तचत्वारिंशदुत्तरोनविंशतितमे खृष्टाब्दे यद्ध्यधुनापदवाच्यं, न तु द्विसहस्रतमे खृष्टाब्दे तद्बोध्यम् अधुनापदेन। साम्प्रतम्, अद्यतनम्, इदानीम् चेत्यादिशब्दाः आधुनिकतायाः पर्यायवाचकाः। अत्रेदमवश्यं प्रसङ्गसङ्गत्या वक्तव्यं यदर्वाचीनैरप्यालङ्कारिकैः साम्प्रतिकरचनाधारां दर्शं दर्शं काव्येन साकं नूत्नाङ्गिकेन कविभेदनिरूपणमप्यकारि।समग्रेऽपि भारतवर्षे नैकानि श्रव्यकाव्यानि प्रणीतान्यभवन्। समेषां तेषां नामग्राहमुल्लेखोऽप्यत्रासम्भवपरः प्रबन्धसन्दर्भस्यास्याकारवैपुल्यभिया।अर्वाचीन्मिति व्यापकतया समसामयिकमिति मन्यते । अतएवः गवेषकस्य गवेषणाकर्मणः समसामयिके काले विरचितानि नाट्यकर्माणि अर्वाचीनानी इति समीक्षणं कर्तव्यम् । अतएव सुविशालेषु संस्कृतनाट्यकर्मसु विंशत्यैकविंशख्रीष्टाब्दे विरचितानि नाट्यकर्माण्यत्र ग्रहणीयानि सन्ति ।

मानवमनीषाया विकाशशीलायां सहस्रदिग्गामिन्यां संस्कृतधारायां महनीयस्यास्य भारतवर्षस्य प्रदेशान्तराणामिव वङ्गभूमेरपि दानं गौरवावहम्। वङ्गीयकवीनां लेखनीतो निर्गतानि निर्गच्छन्ति चमहाकाव्य-दृश्यकाव्यादिप्राचीनसाहित्यधाराम् अतिरिच्य कोषकाव्य-संस्तवकाव्य(Sonnet)- मुक्तककाव्य-उपकथा-चरितकथाद्यवान्तरभेदैः शतशो रुचिराणि रूपाणि, प्रतीक-नभ-पथैकाङ्कात्मकरूपकाणि च दृष्ट्वा, श्रुत्वा, पठित्वा वा भृशं ह्लादयन्ति सहृदयहृदयानि। विंशैकविंशशताब्द्योः संस्कृतवाङ्मयस्याभ्रंलिहाग्रे भव्ये

राजप्रासादेराराज्यमानाः कवयस्तावत् पञ्चाननतर्करत्न-हरिदाससिद्धान्तवागीश-विश्वेश्वरविद्याभूषण-कालीपदतर्काचार्य-वीरेन्द्रकुमारभट्टाचार्य-श्रीजीवन्यायतीर्थ-सिद्धेश्वचट्टोपाध्याय-नित्यानन्दस्मृतितीर्थादयः । तेषां रूपकेषु मूलरसैः सह अङ्गरसाः स्थानं लभन्ते । साधारणतया श्रीजीव-सिद्धेश्व-नित्यानन्दानां रूपकेषु क्वचित् क्वचित् अद्भुतरसस्य प्रयोगवैविध्यं लक्ष्यते । तेषु समुल्लेखयोग्यानां कतिपयानां नाट्यकर्मणानि विमर्शोऽत्र कर्तव्यः । तानि यथा –

## ➢ **वङ्गप्रदेशे आधुनिकसंस्कृतरूपकाणि**

साम्प्रतिके काले भारतवर्षस्य प्रदेशेषु इव वङ्गप्रदेशे दृश्यकाव्यरचना विचित्रमार्गावगाहिनी। समापतितम् अर्वाचीनदृश्यकाव्यधारायां समयोचितं वैलक्षण्यमाधिक्येन। चिराभ्यस्तमार्गं विहायापि युगप्रयोजनमूलकसमाजसमस्याश्रितानि रूपकाणि विरचितानि विलोक्यन्तेऽत्र। इदमप्यपरं परिगणनीयं वैभिन्न्यमाधुनिकसंस्कृतनाट्यकर्मणः।

वङ्गप्रदेशस्य दृश्यकाव्यरचना विचित्रमार्गावगाहिनी विलोक्यते। दृश्यकाव्यधारायां बहवः प्रसिद्धाः नाट्यकारा विलसन्ति-

### **(क) पञ्चाननतर्करत्नः(१९४०-१८६६)**

- अमरमङ्गलम्(१९३७)(नाटकम्)
- कलङ्कमोचनम् (नाटकम्)
- कौमुदीसुधाकरः १८८८,(प्रकरणम्)

## (ख) हरिदाससिद्धान्तवागीशः (१९६१-१८७६)

- कंसवधम्(नाटकम्, अप्रकाशितम्)
- जानकीविक्रमम् ( नाटकम्, अप्रकाशितम्)
- मिवारप्रतापम्[202] (अङ्कषट्कमैतिहासिकं नाटकम्)
- वङ्गीयप्रतापम्[203](अष्टाङ्कात्मकम् ऐतिहासिकं नाटकम्)
- शिवाजीचरितम्[204](दशाङ्कात्मकं महानाटकम्)

## (ग) कालिपदतर्काचार्यः (१९७२-१८८८)

- नलदमयन्तीयम् (नाटकम्)
- प्रशान्तरत्नाकरम्(नाटकम्)
- माणवकगौरवम्(नाटकम्)
- स्यमन्तकोद्धारव्यायोगः[205](व्यायोगः)

[202]संस्कृतसाहित्यपरिषत्, कोलकाता, १३५४ वङ्गाब्दः

[203]तत्रैव, १३५२वङ्गाब्दः

[204]तत्रैव, १३६१वङ्गाब्दः

[205]प्रणवपारिजातः(प्रथमवर्षः)

## (घ) श्रीजीवन्यायतीर्थः (१९९२-१८९३)

- कुमारसम्भवम्(कुमारसम्भवस्य नाट्यरूपम्)
- कैलासनाथविजयम्(व्यायोगः)
- गिरिधरसंवर्धनम्(व्यायोगः)
- चण्डताण्डवम्[206](प्रहसनम्)
- चिपिटकचर्वणम्[207](प्रहसनम्)
- चौरचातुरीयम् (प्रहसनम्)
- दरिद्रदुर्दैवम्[208](प्रहसनम्)
- नागनिस्तारम्(नाटोटकम्)
- निगमानन्दचरितम्(अङ्कषट्कयुतं नाटकम्)
- पुरुषपुंगवः(भाणः)
- पुरुषरमणीयम् (प्रहसनम्)
- भट्टसंकटम् (पञ्चाङ्कविशिष्टं प्रहसनम्)
- महाकविकालिदासम्[209](पञ्चाङ्कविशिष्टं नाटकम्)
- माधुरीसुन्द-रम्[210] (प्रकरणम्अङ्कदशकम्)

---

206 संस्कृतप्रतिभा, १९६१

207 रूपकचक्रम्, १९७२

208 संस्कृतसाहित्यपरिषत्, कोलकाता, १९६८

209 तत्रैव

210 प्रणवपारिजातः(विंशतिवर्षः)

- रघुवंशम् (रघुवंशस्य नाट्यरूपम्)
- रागविरागम्[211](प्रहसनम्)
- राम(प्रहसनम्) दातव्यचिकित्सालयम्-नाम-
- वनभोजनम् (प्रहसनम्)
- विधि(भाणः)विपर्यायम्-
- विवाहविडम्वनम्-[212](प्रहसनम्)
- विवेकानन्दचरितम् (पञ्चाङ्कोपेतं नाटकम्)
- शतवार्षिकम्[213] (प्रहसनम्)
- श्रीकृष्णकौतुकम्(नाटकम्)
- श्रीशङ्कराचार्यवैभवम(नाटकम्)
- साम्यसागरकल्लोलम् (अङ्कद्वयात्मकं नाटकम्)
- सिन्धुसौवीरसंग्रामम् (अङ्कात्मकं नाटकम्)
- स्वातन्त्र्यसन्धिक्षणम् (नाटकम्)

[211]रूपकचक्रम्, १९७२
[212]संस्कृतप्रतिभा, १९६१
[213]रूपकचक्रम्, १९७२

**(ङ) विश्वेरविद्याभूषणः (१९०३)**

- उत्तरकुरुक्षेत्रम्    (पञ्चाङ्कविशिष्टं नाटकम्)
- उमातपस्विनी  (नाटकम्)
- ओङ्कारनाथमङ्गलम् (नाटकम्)
- काशीकौशलेयम् (नाटकम्)
- चाणक्यविजयम्  ( नाटकम्)
- दस्युरत्नाकरम्    ( नाटकम्)
- द्वारावती (नाटकम्)
- प्रबुद्धहिमालयम्(सप्ताङ्कोपेतं नाटकम्)
- भारतमेलनम्  (  नाटकम्)
- मातृपूजनम् (नाटकम्)
- वाल्मीकिसंवर्द्धनम्   (दशाङ्कविशिष्टं नाटकम्)
- विष्णुमाया  ( नाटकम्)
- शाश्वतभारतम्   (  नाटकम्)

## (च) यतीन्द्रविमलचौधुरी  (१९६४-१९०९)

- अमरमीरम्(नाटकम्)
- आनन्दराधम्(नाटकम्)
- औथेलो (नाटकम्)
- देशबन्धुदेशप्रियम्(नाटकम्)
- धृतिसीतम् (नाटकम्)
- निष्किञ्चनयशोधरम्(नाटकम्)
- प्रीतिविष्णुप्रियः(नाटकम्)
- भक्तिविष्णुप्रियम् (नाटकम्)
- भारतजनकम्(नाटकम्)
- भारतभास्करम् (नाटकम्)
- भारतराजेन्द्रम्(नाटकम्)
- भारतलक्ष्मीनाटकम् (नाटकम्)
- भारत(नाटकम्)विवेकम्
- भारतहृदयारविन्दम् (नाटकम्)
- भास्करोदयम्(नाटकम्)
- भुवनभास्करम् (नाटकम्)

- महाप्रभुहरिदासम् (नाटकम्)
- महिममयभारतम्(नाटकम्)
- मिलनतीर्थभाकतम्(नाटकम्)
- मुक्तिशारदम् (नाटकम्)
- रक्षकश्रीगोरक्षकम्(नाटकम्)
- विमलयतीन्द्रम्(नाटकम्)
- विश्वविवेकम्(नाटकम्)
- शक्तिशारदम्(नाटकम्)
- सुभाषसुभाषम्(नाटकम्)
- स्वप्नरघुवंशम् (नाटकम्)

**(छ) सिद्धेश्वरचट्टोपाध्यायः (१९१३-१९१८)**

- अथ किम् (संस्कृतसाहित्यपरिषत् ,कोलकाता ,१९७४)
- धरित्रीपतिनिर्वाचनम् (१९७९)
- ननाविताडनम् (१९७४)
- स्वर्गीयहसनम् (१९७७)

**(ज) विरेन्द्रकुमारभट्टाचार्यः (१९८२-१९१७)**

- नाटकानि-

**क)** कविकालिदासम्  ([214]कालिदासजीवनाधारितम् सप्ताङ्कविशिष्ठ)

**ख**)सिद्धार्थचरितम्[215](अष्टाङ्कं नाटकं बुद्धजीवनाश्रितम् नाटकम्)

**ग** ) शरणार्थिसंवादः[216]

**घ)**शार्दूलशकटम्[217](पञ्चाङ्कविशिष्टं नाटकम्)

- प्रहसनम्-

वेष्टनव्यायोगः(एकाङ्कप्रहसनम्)

- गीतिनाट्यम्-

(ञ्चाङ्कैः त्रिंशद्दृश्यैश्च विभक्तं नाट्यम्श्रीगीतिगौराङ्गम्प)

शूर्पणखाभिसारम्

**(झ)  नित्यानन्दस्मृतितीर्थः (२००८-१९२३)**

- आत्मनिवेदनम्
- कंसवधम्

[214]संस्कृतसाहित्यपरिषत्, कोलकाता, १९६९
[215]तत्रैव, १९७०
[216]तत्रैव, १९७२
[217]तत्रैव, १९६९

- कर्णजीवनम्
- कालिदासः
- गङ्गामाहात्म्यकीर्त्तनम्
- गुप्तधनम्
- घटोत्कचवधम्
- तपोबलम्
- तपोवैभवम्
- तैलङ्गवन्दनम्
- परीक्षितपरिरक्षणम्-
- पुत्रयज्ञम्
- प्रह्लादविनोदनं
- मेघदूतम्
- रक्तबीजवधम्
- विरवामाचरणम्
- शिवप्रसादनञ्चेत्यादीनि।
- सिद्धसीतारामम्
- सुमतिलाभम्

एतानि रूपकाण्यतिरिच्य शतशः रूपकानि विद्यन्ते, यानि अद्यापि प्रकाशलोकं न गतानि। एतानि वङ्गीयरूपकाणि अस्माभिः विषयानुसारं विभजयितुमलम्। कानिचिद्रूपकाणि ऐतिहासिकवृत्तोपेतानि - ‘चाणक्यविजयम्,‘मिवारप्रतापम्’, ‘अमरमङ्गलम्’, ‘भारतलक्ष्मीनाटकम्’,‘भारतराजेन्द्रम्’,‘अमरवीरवृत्तान्तम्’। कानिचन तावत् युगावतारसाधकजीवनाश्रयाणि - ‘सिद्धान्तचरितम्’ ,‘भारतहृदयारविन्दम्’ ,‘भास्करोदयम्’ , ‘युगजीवनम्’,‘गणदेवतानाटकम्’,‘विवेकानन्दचरितम्’ चेति । अपराणि खलु समकालिकसमस्याश्रयाणि -‘अथ किम्’ ,‘चण्डताण्डवम्’ ,‘वेष्टनव्यायोगः’ ,‘दरिद्रदुर्दैवम्’ , ‘पुरुषपुङ्गवः’,‘जननी’चेति।इतराणि रूपकाणि उपनिषत्पुराणवृत्तोपजीव्यानि - ‘नचिकेतश्चरित्रम्’,‘महायसी गार्गी’,‘माणवकगौरवम्’,‘धर्मराज्यम्’। विंशशताब्द्यामस्यां विरचितरूपकाणां केषुचित् नाट्यशात्रीया नियमाः परिपालिताः दृश्यन्ते। परं बहूषु रूपकेषु प्राचीननाट्यधाराणामुल्लङ्घनं दृष्टिमाकर्षति। पूर्वोक्तेषु केषुचिद् रूपकेषु ‘मिवारप्रतापम्’, ‘भारतलक्ष्मीः’, ‘भारतहृदयारविन्दम्’, ‘अथ किम्’ इति रङ्गमञ्चे साफल्येन अभिनीतान्यजायन्त।

## क) श्रीजीवन्यायतीर्थस्य रूपकेषु अद्भुतरसप्रयोगवैचित्र्यम्

आदौ एव श्रीजीवन्यायतीर्थस्य परिचयविषये सामान्येन ज्ञातव्यम्। श्रीजीवन्यायतीर्थस्य पिता पञ्चाननतर्करत्नः। श्रीजीवः वङ्गदेशस्य चव्विशपरगनामण्डलस्य भट्टपल्लीनगर्यां 1894 ख्रीष्टाब्दे जनिं लेभे । भट्टपल्ली आसीत् एकदा विदुषां खनिरिति । तेन कलिकाताविश्वविद्यालये पञ्चविंशतिवर्षाधिककालम् अधीतम्। तस्य रचनासु प्रहसनानि उल्लेखयोग्यानि आसन् । तत्र महाकविकालिदासं नाम नाटकं सर्वातिशायि वर्तते ।

श्रीजीवस्य दृश्यकाव्यानि श्रव्यकाव्यापेक्षया रमणीयानि सन्ति। भारतवर्षस्य पल्लीचित्रं, दारिद्रं, समाजस्य बलनानि स्वबलनानि, स्वाधीनतां, नवजागरणस्यावाहनं, कार्पण्यं, काश्मीतसमस्यादिसर्वं तस्य लेखनी परिप्रकाशयति। सरससंवादाः, मधुरालापाः, लोकोक्तयः, मानविकमूल्यबोधाः, जातीयप्रगतिपरा चेतना, राष्ट्रियभावना च तस्य नाटकेषु विलसन्ति। स्वाधीनचिन्ता यथा-

“मज्जामि सिन्धौ विहरामि शैले व्योम्नस्तले सोमसुधां पिबामि।
धावामि भूयो विचरामि भूमौ नृत्यामि गायामि यथाभिलाषम्”॥

साम्यवादिनो लक्षणं यथा- “अतो वम्साधकाः शिवमेव ब्रह्मपरं भावयन्तः प्राचीनाः प्रति जीवं शिवरूपं पश्यन्तः साम्यविदिनो भवन्ति।” यन्त्रविज्ञानस्य नियन्त्रणविहीनं विध्वंसकरं रूपमपि नाट्यकारस्य समक्षमासीत्। यथा-

“क्रियते चेन्न यन्त्रीयविज्ञानस्य नियन्त्रणम्।
शतवर्षान्तरे पृथ्वी नूनं ध्वस्ता भविष्यति”॥

- तत्र **‘पुरुषपुङ्गवाख्ये’** रूपके अद्भुतरसप्रयोगवैचित्र्यं दृग्गोचरीभवति । दिङ्मात्रम् उदाहरणं तावत् -

**“भो भोस्तरुणः सावधानं शृणुत !**
**का नीतिः ? परलोकभीतिरहितं या साहसं दीपयेत् ।**
**को धर्मो ? निजशर्मगेतुरपरे मर्मन्तुदापि क्रिया।**
**का पूजा ? झठराग्नितर्पणमथो का साधुता मैखिकी**
**स्निग्धा वाक् तदनुच्छलेन कठिना गुप्ताहिर्वज्ञसि**
**गुरुजनवशत्वं नाम दासत्वं, देवपूजनं कुजनचेष्टितं,**

**प्रातिव्यत्यश्च चित्तसङ्कोचनम्।**

**(आकाशे बद्धलक्ष्यः) हं हो ? किं व्रुत ? भोः पण्डित ?”**

श्रीजीवन्यायतीर्थस्य पुरुषपुङ्गवनामके भाणजातीये रूपके प्रथमाङ्के राजपथे वागवीरस्य प्रवेशात् प्रसङ्गानुसारं मन्ये अद्भूतरसः परिस्फुरितः। स च वाक्वीरः सदा नारीकल्यानका इति दृश्यते। तदनुसारं नारीजन्नोनयनसम्पर्कितानां धर्म पूज्या नीति प्रभृतीनां विषयानां किं नाम स्वरूपमिति विषये तस्य मनसि संशयरूपविस्मयस्योद्रेकात् अत्र स्थायिभावः। तरुणीनां मर्मान्तिकोऽपीडनासहायाद्यवस्थारूपविभावनोद्रेकात् आलम्बनविभावः। समाजस्थानां तरुणीनां करुणावस्थारूपाविभावनोद्रेकात् उद्दीपनविभावः। एते वागवीरस्य मनसि करुणा जायते,यदर्थं तेन स्वस्य वास्तविकचित्रम् आच्छाद्य नारीनां कल्याणार्थं कुम्भीरश्रुविसर्जनं करोति इति कृत्वा अनुभावः। सागरनन्दीमते वितर्क-आवेग-जडता-हर्षादयो व्यभिचारिभावाः। तत्र सन्देहाद्वितर्कस्य जन्म। प्रश्न-विचार-भ्रूक्षेप-मस्तकसञ्चालनादिना व्यभिचारिभावः अभिनेयो भवति। तर्हि अत्र नारीजनानां वर्तमानस्वरूपात् उन्नयनं कथं सम्भवति इति विषये वाग्वीरस्य मनसि प्रश्नः जागर्ति। तथा हि स्वमस्तकसञ्चालनादिरूपम् अभिनयं करोति मध्ये मध्ये। अतः विभावानुव्यभिचारिसंयोगात् अद्भुतरसनिष्पत्तिः।

- पुन‘**श्चण्डताण्डव’मिति**रूपके अद्भुतरसप्रयोगो दृश्यते। तद्यथा

**“पा. पु. – अयि स्वबलानभिज्ञे !**

**हिंसां विना जगति दण्डधरः प्रचण्ड**
**राजा क्षमेत जनवक्षणकर्म कर्त्तुम्।**
**किं जन्तवो जठरपूर्त्तिपरा भवेयुः**

**देवाश्च दानवगणाश्च मिथो जयेयुः॥**

**तदविलम्बमेहि**

**ततः प्रविशति नैवद्यादुपूजोपरकरणहस्तः परिचारकः पुरुषः ।**

**पा. पु - अहो मूढता !**

**हिंसा वीरैरूपास्या स्वबलविरहितेस्त्वादृशैस्तुपहास्या**
**लोभक्रोधौ जिगीषेर्मनसि कुरुत उत्साहभारं न भीरोः।**
**धर्मात् क्लीव्यञ्च पापात् कठिनतमकृतौ जायते हि प्रवृत्ति**
**स्तेषामुच्छेदनञ्चेदहह ! विनिहतं विश्वतो विश्वभद्रम्॥**
**तद् विश्वकल्याणं हिंसादिना साधनीयं न यज्ञेन"।**

अस्मिन् श्लोके स्थायिभावस्तावत् विस्मयः। साधारणतया स्वाभाविकनियमस्य यत्र व्यतिक्रमो दृश्यते तत्रैव विस्मयः जायते। अत्र जगति हिंसां विहाय राजा प्रजानां संरक्षणं कर्त्तुं नालम्। प्राणिनोऽपि हिंसां विना उदरपुर्त्तिं कर्त्तुं पारयन्ति न वेति संशयः विस्मयो वेति जायते इति कृत्वा व्यङ्गप्रभावात् अद्भुतरसः। अत्र राजानमवलम्ब्य विभावनाया उद्रेकात् आलम्बनविभावः। अपि च, हिंसायाः कथनोत्तरेण पापपुण्यौ स्वशक्तिविशये अनभिज्ञतां ज्ञापयितुं राष्ट्रव्यवस्थारूपविभावनोद्रेकात् उद्दीपनविभावः। स्वशक्तिसम्पर्कितसंश्रयोद्रेकात् अनुभावः। इत्थम् स्थायिभावेन सह विभाव-अनुभाव-व्यभिचारिभावानां संयोगात् अद्भुतरसोत्पत्तिः भवति।

- **<u>'शतवार्षिकम्'</u>** इति रूपके अद्भुतरसस्यव्यवहारो दृश्यते। अस्मिन् प्रहसने

विज्ञानस्यवरदानमभिशापश्च युगनिरूपितौ। रकेटानेन ब्रह्मलोकागतेन वैज्ञानिकेन मर्त्यमणिना भीतभीता मङ्गलवुधशुक्रचन्द्रादयो न संवदन्ते। अन्ततो ब्रह्मणो माध्यस्थेन समाधानं भवति यन्त्रेषु नियन्त्राय यन्त्रयुगस्य मानवं नाट्यकार उपदिशति-

“क्रियते चेन्न यन्त्रीयविज्ञानस्य नियन्त्रणम्।

शतवर्षान्तरे पृथ्वी नूनं ध्वस्ता भविष्यति”॥

**“[ततः प्रविशति ब्रह्मलोकसम्मुखस्थः स्वर्गद्वारी रखेटयन्त्रेण सह मर्त्यमणिश्च।]**

**मर्त्यमणिः। अहो!**

**प्रचण्ड-सन्-सन् स्वनरुपधारिणा स्वधुपलक्षप्रखरेण नोदितः।**

**रखेटयन्त्रेण नभो विलङ्घयन्नहं सुदरं नवदेशमागगम्॥**

**किमहं मृतो जीवितो वा ? (हस्तनारी परीक्ष्य) हुँ हुम् अधुनापि प्राणस्यन्दनमनुभूयते। (हृदि हस्तं दत्त्वा) अहो! सन्तिमे प्राणाः; तर्हि जीवामि ! भवतु पश्यमा कोऽयंलोको भवेत् ? (आघ्राय) परितः स्फुरति घ्राणतर्पणं कमलसौरभम्। अपूर्वसुखानुभावेन च व्योमलङ्घनश्रमो मे विलीयते। अहो विचित्रमिदं धाम!**

**स्वर्गद्वारी (उपसृत्य)। कस्त्वं भोः! कुत आगतोऽसि ?**

**(स्वगतम्) निमेषैः खट्खटायेते दृशौ शुक्तिपुटाविव।**

**उद्धटं यन्त्रमङ्गेऽस्य लम्बते काष्ठनिष्ठुरे॥**

**कोऽयं पुरुषः? (प्रकाशम्) अरे कथय कस्त्वम् ?**

**सत्यम्। (निरूप्य स्वागतम्)**

**पुरुषकृतेरप्यस्य न निमेषोऽस्ति नेत्रयोः।**

**अपार्थिववशुष्केऽपि न शुष्कः सरसद्युतिः॥**

**अहो निमेषहीनोऽयं कथं निद्राति ? (प्रकाशम्) भो अपूर्वदर्शन ! कोऽयं देशः ?**

**स्वर्ग – भो रसिक ! यानयोगेन समागतोऽसि ? न जानासि ते गन्तव्यदेशम् ? चतुरचूड़ामणे ! परिचयञ्चेन्न ददासि, तथापि कथय किमिदं लम्बते तव गात्रात्।**

**मर्त्यम् – यदिदं लम्बते, तद् यदि तव पश्चाद् योजयेयं तर्हि त्वामपि लोकान्तरं प्रेषयितुं प्रभवेयम्।**

**खधुपकोटिप्रकटोग्रवेगं रखेटयन्त्रं पटुशिल्पतन्त्रम्।**

**लोकेषु भीमेन्दुबुधाभिधेषु भ्रान्त्यै बुधानामपि यानमग्रमम्॥**

**स्वद्वारी – किं वदसि ? 'रखेटयन्त्रमि'ति अश्रुतपूर्वोऽयं विकटः शब्दः। तदुच्यतामेतच्छब्दार्थो देवभाषया ।"**

नाट्यकृतः श्रीजीवस्य '**शतवार्षिकमिति**' रूपके अद्भुतरसप्रयोगविधिः सुतरामेव परिलक्ष्यते। अत्र स्थालीपुलाकन्यायेन उत बिन्दौ सिन्धुदर्शनमिव एकमेवोदाहरणम् उद्धत्य श्रीजीवस्य अद्भुतरसप्रयोगदाक्ष्यं प्रमाणयितुम् इष्यते। तत्र प्रथमाङ्के दृश्यते ब्रह्मलोकसम्मुखस्थस्वर्गद्वारपालकेन सह मर्त्यमणेः सरखेटयन्त्रं प्रवेशः। तत्र मर्त्यमणिस्वर्गद्वारपलकयोर्मध्ये कथोपकथनं प्रचलति। मर्त्यमणिः कथयति यत् रखेटयन्त्रस्य साहाय्येन आकाशमतिक्रम्य स नूतनदेशम् आगतः। किन्तु जीवितो मृतो वेति स चिन्तयन्नस्ति। हस्तनाड़ीं परीक्ष्य तस्य हृदि प्राणाः सन्तीति निश्चीयते तेन । अर्थात् संशयात्मको वितर्कः पुनः पुनः तन्मनसि समुदेति। पुनश्च तत्र चतुर्दिक्षु पद्मगन्धम् आघ्राय अपूर्वञ्च सुखम् अनुभूय दीर्घपथभ्रमणजनितः श्रमः लघूभवति तस्य। अर्थात् विचित्रमिदं धाम। स्वर्गद्वारदेशे समुपस्थितं पालकं दृष्ट्वा चिन्तितमनसा प्रश्नायते मर्त्यमणिः यत् कुतः त्वमागतः, कस्त्वम् इति।

वस्तुतः, स्थायिभावेन सह विभावानुभावव्यभिचारिभावसंयोगात् रसनिष्पत्तिर्भवतीति कृत्वात्रापि नूतनदेशागमनात् विचित्रस्थानदर्शनात्मको विस्मयरूपः स्थायिभावः, रखेटयन्त्र-

नूतनधाम-सुमिष्टपद्मगन्धाद्यलौकिकवस्तुरूपः आलम्बनविभावः, एतेषां वस्तूनाम् अलौकिकमहत्त्वकथनात्मकः उद्दीपनविभावः, नूतमधामागमनकारणात् मर्त्त्यमणेः शरीरे रोमाञ्च-नेत्रविकाशादिरूपा विचित्राभिव्यक्तिर्नाम अनुभावः, तथा च शरीरे प्राणाः सन्ति, स्वर्गद्वारपालकविषये प्रश्नाश्चेति विषयाः व्यभिचारभावान् अभिव्यञ्जन्तीति कृत्वा व्यभिचारिभावः। अतः, विस्मयरूपस्थायिभावेन समं विभाव-अनुभाव-सञ्चारिभावानां समन्वयात् अद्भुतरससृष्टिः।

- श्रीजीवस्य **'क्षुतक्षेमीय'मिति** प्रहसने अपि अद्भुतरसप्रयोगक्षेत्राणि संलक्ष्यन्ते।

अस्य प्रहसनस्य प्रस्तावनायां सूत्रधारेण ज्ञाप्यते क्षुधाज्वालाप्रशमनाय अस्य प्रहसनस्य विरचनमिति। धनिनो गृहे निमन्त्रितस्य दरिद्रस्य भोजनव्यवस्थापि प्रहसनं मन्यते नाट्यकारेण श्रीजीवन्यायतीर्थेन- 'ही ही भोः पश्यतु इतः काष्ठासनश्रेणीम् इतश्चषकपूर्णम् उष्णपानीयम् इतस्ताम्बुलानि इतष्च धूमवर्तिका।' सत्यां वदति दरिद्रः - 'अहो स्वतन्त्रराष्ट्रस्य धनिना साद्यव्यवस्था।' श्रेष्ठिनः रङ्गनाथस्य गृहमागतः चित्रगुप्तः पश्यति कुत्रापि पिपिलिकाप्रवेशाय अवकाशो नास्ति, कुतः पुनः तस्य। परन्तु ज्योतिषिकः स निधिसन्धानं जानाति इति श्रुत्वा तस्य अपूर्वसत्कारो भवति। स चातुर्येण दरिद्रसेवामुपदिशति श्रेष्ठिने।(रूपकचतुष्टयम्, पृ.२२)

तत्र दिङ्मात्रमुदाहरणमत्र प्रस्तूयते

**"गृहः – भाग्याद् भवद्दर्शनं प्राप्तोऽस्मि। तत्र निधिरूपेण यद् वर्त्तते मदीये गृहे – तद् वार्त्तया भीतोऽस्मि। श्रुयते निधिलाभो भवति प्रायो हीनायुष्काणाम्। कथ्यतां मदीयमायुष्परिमाणम् भोगादृश्टञ्च कीदृशम् ?**

**अपि च** –

**गृहः – भवांश्चित्रगुप्तः ? मानुषवेषेण सञ्चरति ? कथय कथमवसरो भवति भवतः?किं यमलोकः साम्प्रतं रुद्धो वर्तते।”**

प्रस्तावनात् परं चित्रगुप्त-गृहस्वामिनोः मध्ये कथोपकथनं प्राचलत्। चित्रगुप्तस्य सान्निध्यं प्राप्य प्रीतः गृहस्वामी गुप्तधनप्राप्तिविषये आयुः-भोगकालादिप्रसङ्गे च प्रश्नान् पृच्छति चित्रगुप्तम्। किन्तु तावत्कालं स न विजानाति कोऽयं जनः अथवा अयञ्च चित्रगुप्त इत्यपि न सम्यक्तया वेत्ति गृहस्वामी। परं चित्रगुप्तः स्पष्टतयोक्तवान् यत् यक्षपुरवास्तव्यः स यमस्य दासवृत्तिं कुर्वन्नासीत्। तच्छ्रुत्वा गृहस्वामी सन्दिग्धो भूत्वा पुनः पृच्छति यत् भवान् चित्रगुप्तश्चेत् कथं मनुष्यवेशम् परिधाय भ्रमति सर्वदा, कथं वा यक्षपुरवास्तव्यवत् वेशम् न परिदधातीति । यमलोकद्वारं कथं वा पिहितमासीदिति गृहस्वामिनः मनसि बहवः प्रश्नाः संशयात्मिकाः समागताः। ते च प्रश्नाः स्वामिना पृष्टाः चित्रगुप्तं निकषा ।

इत्थं कथोपकथनादेव अवगम्यते यत् गृहस्वामिनः मनसि चित्रगुप्तस्य परिचयं विज्ञाय विस्मयभावो जातः इति कृत्वा स्थायिभावः, गृहस्वामिनः परिप्रेक्षे चित्रगुप्तः आलम्बनविभावः, यक्षपुरस्य विचित्रस्थानमाहात्म्यात् उद्दीपनविभावः, चित्रगुप्तस्य परिचयं प्राप्य गृहस्वामिनः मनसि विचित्रानुभूतिस्तथा रोमाञ्चभावो जायते इति कृत्वा अनुभावः। अन्ततोगत्वा गृहस्वामिनः भूयो भूयः चित्रगुप्तं प्रति विचित्रप्रश्नकथनात् संशय-वितर्क-जडतादिरूपो व्यभिचारिभावः। परिशेषे गृहस्वामी तदीयगृहस्थगुप्तधन-परमायुःकालविज्ञापनादिविषये चित्रगुप्तस्य स्पष्टतया ज्ञानमस्तीति विज्ञाय विभेति इति कृत्वा

स्वरभेद-नेत्रविकाशादिरूपः अनुभावो दृश्यते । अतः, विस्मयरूपस्थायिभावेन सह विभावानुभाव-व्यभिचारिभावसंयोगादद्भुतरसनिष्पत्तिर्जायते।

## ख) सिद्धेश्वरचट्टोपाध्यायस्य रूपकेषु अद्भुतरसस्य प्रयोगः

डा. सिद्धेश्वरचट्टोपाध्याय वाङ्लादेशस्य जशोरे १९१८ इशवीयसंवत्सरे फरवरीमासस्य सप्तविंशतिदिनाङ्के जातः। तस्य पिता शरच्चन्द्रचट्टोपाध्यायः संस्कृतज्ञः पण्डितस्तथा पुरोहित आसीत्। माता प्रमदासुन्दरीदेवी। प्रारम्भिकविद्यालयजीवने एव स स्वाधीनतासङ्ग्रामयोद्धृभिः संयुक्त इति एकाधिकवारं काराबद्धोऽभवत्। तदा पुनः पितृवियोगाद् रुक्षवास्तवतां प्रत्यक्षीकृत्य श्रीचट्टोपाध्यायो यात्रादलेषु सखीभूमिकायामभिनीय स्वाहारमुपार्जयत्। तदनु 'उभारसियर'भावेन आयामे गौरीपुरे सारमेयारपदे नियुक्तः। तदा प्रमथेशवडुयावर्यस्य पत्न्या यमुनावडुया व्यक्तिगतसचिवरूपेण नियुक्तः अभवत्, ताञ्च संस्कृतमपाठयत्। सर्वकारीयसंस्कृतमहाविद्यालये पठित्वा राजशाहीटोलतः काव्यतीर्थोपाधिं प्राप्य तदनु १९४९ ईशवियसंवत्सरे कलिकाताविश्वविद्यालयाद् एम. ए. उपाधिमधिगतवान्। १९५१-१९६० पर्यन्तं विविधमहाविद्यालयेषु अंशकालिकाध्यापकरूपेण पठयन् १९६० संवत्सरे वर्धमानविश्वविद्यालये नियुक्तः। विविधशास्त्रविचक्षणो नाट्यशास्त्रे रङ्गकलायां च निपुणः स बहुदिनानि यावद् वर्धमानविश्वविद्यालयस्य संस्कृतविभागाध्यक्षरूपेण तदनु सर्वकारीसंस्कृतमहाविद्यालये स्नातकोत्तरशोधविभागे अध्यापकरूपेण १९९० यावते कार्यमकरोत्। संस्कृसाहित्यपरिषदः सचिवरूपेणापि स सुख्यातिं प्राप्तवान्। तस्य नाटकानि सम्पादितपुस्तकानि च प्रसिद्ध्यन्ति। गौरीनाथशास्त्रिणः तत्त्वावधाने सागरनन्दिनो

नाटकलक्षणरत्नकोशस्योपिरि गवेषणां कृत्वा सम्पादनमकरोत्। १९९३ संवत्सरे तस्य स्वर्गवासः अभवन्। तेन सम्पादनता ग्रन्थाः, धरित्रीपतिनिर्वाचनम्, अथकिम्, ननाविताडनम्, स्वर्गीयहसनम्, इति अत्याधुनिकभावसंवलितानि चत्वारि नाटकानि च तस्य गौरवं चिरं वर्धयिष्यन्ति। तत्र सिद्धेश्वरस्य रूपकद्वितये अद्भुतरसस्य प्रयोगो नेत्रातिथिम् आगतः। तद्यथा

- **धरित्रीपतिनिर्वाचनम्**-इति आधुनिकी व्यङ्गनाटिका १९६७ ईशवीयसंवत्सरे

रचिता १९६९ संवत्सरे अभिनीता १९७१ संवत्सरे प्रकाशिता च वर्तते। भवपान्थशालायां तदारभ्य भगवतः पुत्र्या धरित्र्याः पतिनिर्वाचनं प्रचलति विश्वकर्मणः साहाय्येन। परन्तु समस्यानां सीमा नास्ति। समस्यानामानन्त्यं सार्वकालिकत्वं च निरूप्य कविः शास्वतकीर्तिः स्थापयति। अत्र भगवन्तं विश्वकर्माणं च विहाय अन्ये षट् पुरुषाः कथं धरित्रीं प्राप्तुं परस्परं युद्ध्यन्ति इति सम्यग् वर्णितमस्ति। शस्त्रसङ्कुलैः मनुष्यैः निरन्तरं पीड्यमानां धरित्रीं तान् दैवहतकान् नरान् च भाग्यमेव रक्षेदिति सूत्रधारो मङ्गलं कामयते-

**“कृपयावतु वो भाग्यं नरवुद्धेरगोचरम्।**
**नास्यन्यद् बलमद्यत्वे जगति शस्त्रसङ्कुले॥**
**राष्ट्राख्ययाने समधिष्ठिता या हिंसाभिधेया कलिकालदेवी।**
**समुद्धरत्वस्त्रशतं दधाना मनुष्यपिष्टां धरणीमिमां सा”॥**

प्रतिपलं हरणमारणप्रतारणविजृम्भिते जगतितले अपघातयुद्धादिविभीषिका घोरभाषणाः सन्ति इति जल-वायु-शब्दप्रदूषणादात्माने रक्षितं वा अपघातभयाद्वा कार्पासरुद्धकर्णः सूत्रधारो वा भगवान् वा कमपि न शृणुतः। अत्र आन्तर्जातिकसमस्याः प्रत्यग्रीवकरोति नाट्यकारः सूत्रधारस्य प्रस्तावनायमिव-

“प्रत्यहं संवादपत्रिकायां दृश्यते कति रणधुरन्धरा राष्ट्रनायका धरणीनिमिमां मनुष्यरहितां कर्तुं व्यवसिताः। अद्भूतमारणयन्त्राविष्करणे प्रतिस्पधो तेषामस्माकं हृत्कम्पं जनयतितराम्। ... इदानीमप्यभुक्तस्य मे अपघातमरणभयान्नयनसम्मुखे सर्षपपुष्पाणि विकसन्ति, कर्णयोर्मध्ये च झिल्लीरवः समुत्पद्यते। ... ” (पृ. २-३)॥

“न खलु श्रुयते किञ्चिदपघातभयान्मया।
कार्पासरुद्धकर्णेन स्वयं भगवता यथा”॥ (तत्रैव)

अग्रे विश्वकर्मणः शब्देषु युद्धस्य भीषणता भयवहता असारता च स्फुटीभवन्ति। सभायोजनप्रयोजनं भगवतो वचनेन स्पष्टीभवति- “अहर्निशं प्रतिदन्द्विनामास्फालनं दृष्ट्वा श्रुत्वा श्रुत्वा च तेषां तर्जनवचनानि मस्तिष्कवैकल्यमनुभवामि ... यथा तथा वा भवतु, अनुष्ठीयतां सभा, निर्वाचयतु धरित्री स्वभर्तारम् ...। ... ये तावदद्य सभायामत्र आगमिष्यन्ति तेषामेकैकस्य ऋणपरिमाणमत्र लिखितमास्ते। प्रविष्टमात्रमेव पत्रमिदमेकैकं प्रदश्यार्थसंग्रहः करणीयः ...॥” पृ. ७॥

कन्यानां कन्यापितॄणां वैवश्यञ्च विशदीभवति कन्यापित्रोः वार्तालापेनधरित्री-योग्यम्? एषां सर्व एव दृष्टिपथमागता मे गात्रदाहमुत्पादयन्ति।

भगवान्- कथं तर्हि त्वयैवैते न निरस्ताः? कथं वा स्पष्टाक्षरं नोच्यते त्वया स्वमनोगतम्।

धरित्री- को मे स्पष्टवचनं श्रोतुमिच्छति? अङ्गप्रत्यङ्गादिकं मे खण्डशः कर्तयित्वा खादितुमच्छन्ति मूढधियः। वञ्चयित्वान्यान् केचिन्मां वाङ्नैपुण्येन केचिद्वा बलेन स्वायत्तीकर्तुमिच्छन्ति (पृ. ८)

अनन्तरं धरित्र्याः प्रेमिणः स्वस्वयुद्धास्त्रं गृहीत्वा क्रमश आगच्छन्ति विचित्रनामानो विविधयन्त्रधारिणो विविधपरिघानेन च।

भगवत आदेशेन विश्वकर्मणे सर्वे ऋणप्रत्यर्पणं कृत्वा आलोचनायां भागं वहन्ति। धरित्री सर्वेषां परिचर्यां कर्तुमिच्छति। परन्तु वैयत्तिककरूपेण तां छलेन बलेन वा स्वायत्तीकर्तुमिच्छन्ति सर्वे।

ततः प्रारभ्यते केशाकेशि दण्डादण्डि च। अन्ततः सर्वे आहता भवन्ति। अक्षतं दृश्यमानं वरण्डलम्बुकं प्रहर्त्तुं सज्जो भवति विश्वकर्मा।

इत्थ्यं सिद्धेश्वरस्य धरित्रीपतिनिर्वाचनम् इति रूपके चरित्राणां मिथः कथोपकथनेन विस्मयाख्यस्थायिभावस्योद्रेकात्, UNO इति आन्तर्जातिकसंस्थायाः अलौकिककार्याणां तथा चालौकिकवस्तूनां गुणमाहात्म्यप्रकाशनादिरूपादालम्बनोद्दीपनभावप्रकाशाच्च नेत्रविकाशादि-स्वरभेदरूपानुभावात्तथा भगवतो हर्षावेगादीव्यभिचारिभावात् अद्भुतरसो जायते ।

- **अथकिम्** – अभिनवनाट्यकारेणानेन विरचितं द्वितीयं रूपकं १९७२ ईशवीये संवत्सरे अभिनीतं १९७४ संवत्सरे च प्रकाशितं परिहासाश्रयि रूपकमित्यभिहितम्। सर्वत्र नावीन्यमानेतुं बद्धपरिकरः स नान्दीतो भरतवाक्यं यावन्नवनववस्तु विषयीकरोति। कालानुसारं नवनाट्यदेवं नमस्कृत्य नेपथ्ये नान्दीं कुर्वति सूत्रधारे यवनिकापसृता।

नाट्यकारः सूत्रधारमुखेनैव समाजगता विसङ्गतीः समुद्धरति- “परमद्यत्वे सर्वं जातमसंस्कृतम्, - देहे चित्ते, समाजे संस्कृतस्य गन्धोऽपि नास्ति। अभिनयश्च भवति सर्वत्रैव-मार्गे, हट्टे, घट्टे, परिवारे, विद्यालये, विधानसमायामपि।।” तदनु सूत्रधारः ‘क’ पात्रेण विपरिणमते। अत्र सर्वेषां पात्राणामेवं नामानिपुरुषपात्राणि- क, ख, ग, घ, ङ, च, नारीपात्रे-

आ, ऊ इति। नाट्यकारस्य पात्राणि मानवानां विभिन्नश्रेणीनां प्रतीकमात्राणि सन्ति। अत्र 'क' इति पात्रनिशेषो मध्यवित्तशिक्षितसमाजस्य प्रातिनिध्यं करोति, यां तथाकथितराजनीतौ आग्रह एव नास्ति। निम्नमध्यवित्तपरिवारेण कष्टेन कृतस्य तैललवणसङ्ग्रहस्य प्रातिनिध्यं करोति खः। साम्प्रतिके आर्थनीतिके च परिवेशे विविधराजनीतिकदलानां प्रातिनिध्यं कुर्वन्ति ग-घ-ङ-च-प्रभृतयः।

आ इत्येषा क-अत्यस्योपरि पतित्वा तमेवमाक्रोशति, आङ्ग्लगालिभिः। अग्रे तेन (अवकरेण) एव निखिलं भुवनं पूर्णं मनुते। "सर्वत्र तदेव वस्तु शोभतेतराम्,- गृहे, हट्टे, घट्टे, विद्यालये, विश्वविद्यालये, लोकसभायां, विधानसभायां सर्वत्रैव॥" ख-इत्यस्य वचोभिर्नाट्यकारो दैनन्दिनजीवनस्य तैललवणसमस्यां समग्रयति।

गृहे मुखमनुद्घाट्य मृतवत् तिष्ठति, मृते घोषिते तस्मिन्, आनन्देन नृत्यति- "अपि च गृहे मे कण्ठस्वरो न स्फुरति। अतः पथि मनोगतं प्रकाशयामि। नायं मार्गः कस्यापि पितुरधिकारे, यथेच्छमहम् (क्रमेणोच्चैः स्वरेण) अत्र प्रलपामि, तदेव कथयामि यदेवायाति मे जिह्वामूले, उच्चैः कथयामि, तारस्वरेण- ... अहो मृतोऽहम्, कीदृश आनन्दः- मृतोऽहम्॥" (पृ. ५) ग-घौ पुनः परिवर्तनकारिण आगमनं प्रतीक्षमाणावेव निर्वाचन-भोट-सङ्घ-पार्टीत्यादीनामोलनं कुरुतः।

अनन्तरं ङः समागत्यापि वदति कश्चन आगच्छन्नस्ति, तेन सर्वं परिवर्तितं भविष्यति- "नूतनः संघः, नवीना संस्था, सर्वं नवीनम्। घूणक्षतानां प्राचीनानां भवतु विनाशः। समागच्छतु नवीनः कालः।पुरातनपथयात्रिकं कमपि अध्यापकं नूतनपथगन्त्री तत्पत्नी आकर्षति। ग- मतेन देशस्य दुर्गतिरेव नियतिः।अध्यापको वदति, क-आगमिष्यतीति न जानाति कोऽपि। सर्वे केवलं वदन्ति नवीनः, नवीन इति। नवीनस्य पक्षधराया आ-इत्यस्या वचनादपि कथङ्कारः

स इति स्पष्टं नास्ति।तदा रचिताया उपसमितेः सहस्यत्वेन सर्वे आत्मानं प्रस्तुवन्ति। एकेन अपरस्य नाम प्रस्तूयते, अन्येन तत् समर्थ्यते इति प्राचीना रीतिरप्यत्र निरस्ता। सर्वे अत्र वक्तारः, श्रोतुमत्र कोऽपि नास्ति।

सभापतिरध्यापकः 'च' भाषणरूपेण भारतस्य इतिहासं वदति। तदा जना असन्तुष्टा इति काव्यानि, ततः माहेश्वरसूत्राणि श्रावयति। तदा भाषणदानार्थं सर्वेऽपि दण्डायमाना भवन्ति, अग्रेसर्तुं सर्वे इच्छन्ति। सर्वेऽपि अग्रेसरन्ति, वृत्ताकारेण परिभ्रमन्ति। किमस्य फलमिति अध्यापके पृष्टे सति उत्तरं भवति- रूपकमभिनीयते। नेयं भारतीया नाट्यरीतिरिति अध्यापकः प्रतिवदति। भरतस्य नाट्यं न रोचते चेन्नूत्नं स्वीकरणीयमिति समाधानम्। तदा मया किं करणीयं भरतवाक्यमुच्चारयामि वा इत्यस्य उत्तररूपेण 'क' वदति- अथ किम् इति नाट्यशीर्षकम्। तदा केवलमात्मनो मङ्गलं कामायमानः अध्यापको भरतवाक्यमुच्चारयति-

"कालस्य गतिमालोच्य साम्प्रतं प्रार्थयामहे।
अस्तु मे मङ्गलं नित्यं भवतामस्तु वा न वा"॥ (पृ. २४)

अवमत्र नाट्यकारेण साम्प्रतिके राजनीतिकप्रेक्षापटे प्रदर्शितं यन् नवीनमतस्य नूतनदलस्य मतादर्शस्य वा ग्रहणेन देशस्य अभ्युन्नतिर्न भवति। समस्यानां समाधानं नास्ति चेत् किं तेन दलेन मतेन मतादर्शेन वा।

तत्र आ-खचरित्रयोः कथोपकथनावसरे दृश्यते अद्भुतरसस्य प्रयोगः । दिङ्मात्रम् उदाहरणं तावत् –

**"आ – तत् कथमेवं प्रलपसि तारस्वरेण मार्गे दण्डायमानः?**

**खः – किमहं जीवामि न वेति प्रत्यक्षीकर्तुम्। अपि च गृहे मे कण्ठस्वरो न स्फुरति । अतः पथि मनोगतं भावं प्रकाशयामि । नायं मार्गः कस्यापि पितुरधिकारे,**

**यथेच्छमहम् (क्रमेणोच्चैः स्वरेण) अत्र प्रलपामि, तदेव कथयामि यदेवायाति मे जिह्वामूले, उच्चैः कथयामि , तारस्वरेण ..."[218]।**

**अथवा –**

**"गः – किम् ? निर्वाचनम् ? – भोटरङ्गम् ? वारं वारं निर्वाचनपत्रे एकस्यैव नाम्नः पार्श्वे चिह्नमङ्कितं मया, वारे तु अस्मिन् सर्वेषामेव नाम्नां पार्श्वे चिह्नान्यङ्कयिष्यामि ।**

**कः – (उपसृत्य) स्वगात्रेऽपि कति चिह्नान्यङ्कितव्यानि।**

**घः – (गाम्भीर्यमवलम्ब्य) नैतत् सन्नागरिकस्य कर्तव्यम्।**

**कः – सङ्घः ? दलम् ? पार्टीति ख्यातम् ? नानतन्त्रध्वजावाहिनामेतेषां कदा नु भवेद्विलयः"[219] इति।**

वस्तुतः, क-ग-घचरित्राणां मध्ये कथोपकथनावसरे दृश्यते यन्निर्वाचनविषये गकारस्य मनसि विस्मयो जायते । वयं जानीमो यद्विस्मयादेवाद्भुतरस्योत्पत्तिः। तत्रालम्बनविभावो नामालौकिकं वस्तु । उद्दीपनविभावस्तावदलौकिकवस्तूनां गुणमहिमा। निर्वाचनव्यवस्था तस्य सकाशे अलौकिकं किमपि वस्तु। एतेन चरित्राणां मनसि गाम्भीर्य्र-नेत्रविकाशाद्यनुभावो जायते । स्वाभाविकगत्या निर्वाचनव्यवस्थाया अप्रयोजनीयताम् अनुभूय सर्वेषां मनसि सन्देहो जायते। ततः वितर्कस्योद्भवः। अत्र दृश्यते मिथश्चरित्रेषु प्रश्न-विचार-भ्रूक्षेप-मस्तकसञ्चालनादिरूपाः व्यभिचारिभावाः अभिनीता भवन्तीति कृत्वा अद्भुतरसस्याभिव्यक्तिर्भवति ।

---

[218]अथ किम्, संस्कृतसाहित्यपरिषद्-ग्रन्थमालायाम् 38संख्यको ग्रन्थः, पृष्ठा – ४

[219]तत्रैव (पृष्ठा -७)

इत्थं वक्तुमलं यत् अर्वाचीनसंस्कृतरूपकेषु विशेषेण प्रहसन-व्यङ्ग्यविधात्मकरूपकेषु प्रायेणैव अद्भुतरसः रूपककृद्भिः व्यवह्रियते इति संक्षेपः।

# समीक्षात्मकं मूल्यायनम्

नाट्यशास्त्रानुसारं नाटकस्याङ्गिरसो भवेच्छृङ्गार उत वीरः । तथाहि उक्तमालंकारिकैः विश्वनाथैः – 'एक एव भवेदङ्गी शृङ्गारो वीरो एव वा' इति। अन्ये सर्वे रसा अङ्गत्वेन विवेच्यन्ते नाटके। अत्रेदमुल्लेख्यं यत् करुणरसो नाटके अङ्गी भवति चेदपि तन्न नाट्यशास्त्रसम्मतम्। पुनः,नाटकं काव्यं वा समाजस्य प्रतिफलनम्–'literature is the reflection of the society'उत 'A nation is known by its own theatre.'अर्वाचीनालंकारिकैरुक्तम् –

'साहित्ये जीवनं सर्वं सर्वाङ्गीनं नवं नवम्।

प्रतिविम्बत्वञ्चायाति समुल्लसति च वर्धते' ॥

अत एव, वास्तवजीवनं सर्वदा सुखकरं भवेदिति न चिन्तनीयम्। अस्मज्जीवने सुख-दुःख-हास-रति-विस्मयादीनां सर्वेषां भावानां सार्थकपरिणतिर्दृश्यते। क्वचित् सुखस्य, क्वचिद्वा दुःखस्य, क्वचिच्च हासस्य, कुत्रचित् विस्मयस्यापि प्रभावेन प्रभावितं भवति अस्मज्जगत्प्रपञ्चम्। परं प्रजापतितुल्येन कविना स्वमनसो माधुरीं संयोज्य तथा च तस्य 'अपूर्ववस्तुनिर्माणक्षमया कारयितृप्रतिभया' तत्सुख-दुःख-विस्मयादयो भावा आनन्दत्वेन पर्यवस्यन्ते। आनन्दमेव तु काव्यस्य मूलीभूतं वस्तु। आनन्दं चेत्काव्यस्य नाटकस्य वा सर्वस्वं भवेत्, तदा कदापि नाटकं वास्तवजीवनस्य प्रतिफलनं न भतितुमर्हेत्। तथाहि आलंकारिकैः शृङ्गार-वीररसौ अतिरिच्य काव्य-नाटकादिषु शान्त-करुण-रौद्र-अद्भुतादिरसप्रयोगस्य संस्थानं विहितम्। तथैव संस्कृतनाट्यतत्त्वेतिहासेऽद्भुतरस्य विशिष्टं स्थानं भजते। भरत-धनञ्जय-विश्वनाथादिभिरालंकारिकैस्तदीयेष्वलंकारग्रन्थेषु रसस्यास्य

गुरुत्वमभ्युपगतम्। तेषामाशयोऽयं यत् 'कार्यं निर्वहणेऽद्भुतम्'। मूलतः निर्वहणसन्धौ अद्भुररसव्यवहारोऽत्यावश्यको निर्देशो नाट्याचार्याणामिति मन्मतम् । अर्थान्नाटकस्यान्ते अद्भुतरसस्यावस्थितिः नाट्यकौशलदृष्ट्या अत्यावश्यकः इति निश्चप्रचम्। परमत्रेदमुल्लेख्यं यदद्यतकालं यावदद्भुतरसमाश्रित्य किमपि नाटकं न विरचितम् । किन्तु प्रायेण सर्वैः काव्यकृद्भिस्तदीयकाव्य-नाटकानां स्थलविशेषेऽद्भुतरस्य बहुविचित्रितः प्रयोगऽकारि ।

एतावत्कालं यावदद्भुतरसमुपजीव्याङ्गुलिमेयानि गवेषणाकर्माण्यभवन् । तानि तावत्-

**1. Adbhutarasa in Classical Sanskrit Dramas (Saraj Arvind Deshpande, Poona University, 1982)**

**2. Adbhutarasa – Prāchina Saṁskṛta Nātakome - Kāvya śāstriya Vivechana (Bhāsa se Joydev tak), (Minu Saxsena, Jaipur University) (In Progress)**

**3. Adbhutarasa – Siddhānta aur Prayoga (Nirupama Sukla, Lucknow University (In Progress)**

किन्तु मम गवेषणाकर्मणि सामूहिकतया प्रायेण सर्वेषां प्राचीनाधुनिकानां नाटकानामद्भुतरसप्रयोगविधिः पर्यालोचिता। अपि च, मया अस्मिन् शोधबन्धे आदावेव संस्कृतालंकारिकैरभ्युपगतमद्भुतरस्य प्राधान्यम्, संस्कृतनाटकेषु रसस्यास्य युक्त्या नाङ्गिरसत्वस्वीकारः, कालिदास-भास-भवभूत्यादिनाट्यकृतामद्भुतरसस्य सार्थकप्रयोगश्चेत्यादिविषयाः युक्त्या निरूपिताः। किञ्च, कालिदास-भास-भवभूत्यादिनाट्यकाराः स्वकारयितृप्रतिभया प्रमाणयन्ति यदद्भुतरसेनापि सार्थकाभिनयोऽपि

भवितुमर्हति । सर्वेषां संस्कृतनाटकानामद्भुतरसव्यवहारान् सूक्ष्मेक्षिकया पर्यालोच्यते चेद्वक्तुमलं यद्भास-भवभूत्योरपेक्षया कालिदासोऽद्भुतरसस्य प्रयोगेऽप्रतिद्वन्द्वीति सत्यम्।

तत्र प्रथमेऽध्यायेमया संस्कृतालंकारिकाणां नये रसालोचनात्परमेवाद्भुतरसलक्षणं स्वरूपञ्च विविधदृक्कोणतो विव्रियते युक्त्या। आलंकारिकाणां मतमनुसृत्य मया भास-कालिदास-भवभूत्यादिमहाकवीनां रूपकेष्वद्भुतरसस्य प्रयोगक्षेत्रं परिशीलितम्। अत्र सागरनन्दिनो नाटकलक्षणरत्नकोषस्यद्भुतरसस्य लक्षणानि वैशिष्ट्यानि च सर्वालंकारग्रन्थेभ्यः सुष्ठुतया उक्तानि। तन्नयानुसारं मयका संस्कृतसाहित्यस्य केषुचिद्रूपकेषु रसस्यास्य व्यवहारो दर्शितः। प्रसङ्गतः, विश्वनाथस्य मतानुसारि अद्भुतरसस्वरूपम् व्याख्यानावसरे विशेषेण युक्तिग्राह्यमिति मनुते। तत्र द्वितीयेऽध्याये महाकवेः कालिदासस्य रूपकत्रितये यत्र यत्राद्भुतरसस्य प्रयोगक्षेत्राणि नयनयोरापतन्ति, तानि च मया युक्त्या व्याख्यातानि। अद्भुतरसस्य प्रयोगविधौ कालिदासः पूर्वाचार्यान् भासान् तथा चोत्तरवर्तिनो नाट्यकारानतिशेते । अत्रैव कालिदासस्य महत्त्वम् । कविकुलगुरुः कालिदासो न केवलमुपमाद्यलंकारप्रयोगे सुतरामेव निष्णातश्चापि विविधरसप्रयोगे तत्र विशेषेण शृङ्गार-वीरयोर्व्यवहारे यथा धुरी तथैवाद्भुतरसप्रयोगविधौ । कालिदासस्य नाटकेषु 'अभिज्ञानशकुन्तल'मिति रूपके तस्याद्भुतरसप्रयोगनैपुण्यं सर्वापेक्षया सहृदयहृदयमनोरञ्जकमिति मामकी मतिः।

तृतीये अध्याये भास-भवभूत्योः निर्वाचितेषु रूपकेष्वद्भुतरसस्य व्यवहारो मया दर्शितः। भासस्य 'स्वप्नवासवदत्त'मिति रूपके, 'अभिषेके', 'ऊरुभङ्ग'मिति रूपकद्वितये चाद्भुतरसस्य प्रयोगक्षेत्राणि दरीदृश्यन्ते । वस्तुतः, संस्कृतरूपकेष्वद्भुतरसस्य क्षेत्राणि सत्यमेव दुर्लभ्यानीति दृश्यन्ते कालिदास-भास-भवभूत्यादिनाट्यकृतान् विहाय । तथापि

भासाद्भवभूतेर्नाटकेष्वद्भुतरसः प्राप्यते । यद्यपि करुणरसप्रयोगे भवभूतिः सर्वान् पूर्वोत्तराचार्यान् अतिशेते, तथापि अद्भुतरसव्यवहारे ध्रुवमेव स स्वककारयितृप्रतिभया परिचयः प्रादात् । विशेषेणोत्तररामचरितस्य केषुचित् क्षेत्रेष्वद्भुतरसस्य व्यवहारे भवभूतिर्मन्ये सूक्ष्मातिसूक्ष्मगवेषणाञ्चकार। महावीरचरितेऽपि क्षेत्रपञ्चकं विद्यमानं, यत्राद्भुतरसः सहृदयानां मनो मोदते । चतुर्थेऽध्यायेऽर्वाचीनसंस्कृतरूपकानि निर्मथ्य केषुचिद्रूपकेषु नाम प्रहसनेषु वङ्गप्रदेशस्याद्भुतरसस्य स्वल्पानि नामाङ्गुलिमेयान्युदाहरणानि परिप्राप्यन्ते । साम्प्रतं रचितेषु रूपकेषु श्रीजीवन्यायतीर्थेषु प्रहसनाख्यरूपकेषु नाम ‘क्षुतक्षेमीयम्’, ‘शतवार्षिकम्’, ‘चण्डताण्डव’मिति अद्भुतरसव्यवहारो नयनयोरापतति । ततःपरं सिद्धेश्वरचट्टोपाध्यायस्य ‘अथ किम्’ तथा च ‘धरित्रीपतिनिर्वाचन’मिति व्यङ्गविधयोः रूपकयोरद्भुतरसस्य द्वित्राः क्षेत्राण्युपलभ्यन्ते । किन्तु उल्लेख्यं यदर्वाचीनरूपकेषु प्रायो न लक्ष्यतेऽ द्भुतरसप्रयोगस्तत्र वास्तवोचितविषयमूलकत्वात्। परं वङ्गप्रदेशाद्बहिः रचितेषु रूपकेषु मन्ये अधिकतया अद्भुतरसस्य व्यवहारयुक्तानि क्षेत्राणि ग्रन्थकृद्भिः संनिविश्यन्ते । आधुनिकरूपकेषु कलाकैवल्यवादापेक्षया वास्तववादस्य व्यवहारोऽधिकतया अलक्षि । तस्मात् कविभिर्नाट्यकृद्भिः शृङ्गार-वीर-करुण-अद्भुतरसानां व्यवहारात् वास्तवजीवनसम्पृक्तानि रसोचितवृत्तानि अधिकतया काव्येषु नाटकेषु च विरच्यन्ते ।

परिशेषे वक्तव्यं यन्नाटकस्य रसप्रयोगे कवि-सहृदययोर्मध्ये गभीरसम्बन्धो वर्तते। तत्र रसप्रयोगोपलब्ध्योर्मध्ये रसप्रयोगः कविगतः, परमुपलब्धिः सहृदयनिष्ठेति । कविना तदीयेषु काव्येषु नैके रसाः प्रयुक्ताः, परं सहृदयो यदि तद्रसान् सम्यक्तयास्वादयितुं उपलब्धुञ्चालं, तर्हि कवेर्नाट्यकृतो वा प्रयासोऽयं सार्थको भवेदिति । अन्ततो गत्वा मम राद्धान्तोऽयमेव यत्

प्राचीननाट्यकृद्भिः शृङ्गार-वीर-करुणरसानां व्यवहारे प्रयोगे वा यावान् दक्षो न तथा अद्भुतरसस्य।

कालिदास-भास-भवभूतिभिः प्रयुक्तान्यद्भुतरसक्षेत्राणि वक्तव्यस्य चित्रायमानतां सम्पाद्य काव्ये विद्यमानानां श्लोकादीनां सहृदयहृदयग्राहितां यथा वर्धयन्ति तथा समग्रस्य काव्यस्य स्वरूपसौन्दर्य्यमपि प्रकटीकुर्वन्ति। एतदेव कवीनां प्रतिभाया निरवद्यमवदानम्। अन्तिमे मम सिद्धान्तोऽयं यत् अस्मिन् गवेषणाप्रबन्धे उल्लिखितनाट्यकारेषु कालिदासकृतिषु अद्भुतरसप्रयोगस्य यादृशी स्वच्छता सावलीलता च परिप्राप्यते, तादृशी स्वच्छता सावलीलता च भासवत् प्राचीनानां तथा च भवभूति-श्रीजीव-सिद्धेश्वरप्रमुखानाम् उत्तरकालिकानां काव्येषु नोपलभ्येते इति विस्तरेणालम्॥

*************************************************************

# BIBLIOGRAPHY

## Primary Source

1. Ānandabardhana. *Dhvanyāloka.* Ed. Bimolakanto Mukhopadhyay. Kolkata : Sanskrit Pustak Bhandar, Rpt-2008.
2. Ānandabardhana. *Dhvanyāloka*. Ed. K. Krishnamoorthy. Delhi : MLBD, 1982.
3. Ānandabardhana. *Dhvanyāloka*. Ed. TVR Diksitra. Delhi : MLBD, 1982.
4. Bhāmaha. *Kāvyālaṁkāra*. Ed. Batuknath Sarma. Varanasi : Chowkhamba Sanskrit Sansthan, 1981.
5. Bhāmaha. *Kāvyālaṁkāra*. Ed. Satyadev Chowdhury. Delhi: Primal Prakasana, 1990.
6. Bhāmaha. *Kāvyālaṁkāra*. Ed. Srikrishna Suri with Comm Kamadhenu. Delhi: Srabanibilas Press, 1909.
7. Bhānumiśṛa. *Rasataraṅginī.* Ed. Khemaraja Srikṛiṣṇadasa with Comm of JīvanattaJī. Bombay (Now Mumbai) : 1831 (Eng)
8. Bharatamuni. *Nāṭyaśāstra*. Ed. N.P. Unni. Vols. II. Delhi : Nag Publishers, 1998.
9. Bharatamuni. *Nāṭyaśāstra*. Ed. R.S. Nagar. Vols.1. Delhi : Parimal Publications, 1981.
10. Bhāsa. *Abhishekanātaka.* Ed. T. GaṇapatiSāstrī. Trivandrum: Travancore Government Press, 1913, Trivandrum Sanskrit Series, No XXVI.
11. Bhāsa. *Chārudatta.* Ed. C.R. Devadhar. Poona: Oriental Book Agency, 1943. Poona Oriental Series No – 65. Edn – 2nd (Revised)
12. Bhāsa. *Chārudatta.* Ed. Kumudranjan Roy. Calcutta (Now Kolkata): Kamala Printing Works, Date not found. Edn. – 2nd (Revised), 1967(A Sanskrit Drama in four Acts Attributed to Bhāsa, Critically edited with Introduction Notes and Translation).

13. Bhāsa. *Chārudatta*. Ed. T. Gaṇapati Sāstrī. Trivandrum: Travancore Government Press, 1914, Trivandrum Sanskrit Series No XXXIV.

14. Bhāsa. *Pratimā-Nātaka.* Ed. Asokanath Shastri & Maheshwar Das. Calcutta (Now Kolkata) : Modern Book Agency, 1958. Edn-2nd (Revised & Enlarged), 1958.

15. Bhāsa. *Pratimā-Nātaka.* Ed. Sri Murendramahan. Calcutta (Now Kolkata) : Chhatra Pustakalaya, 1942.

16. Bhāsa. *Svapnavāsavadatta*. Ed. C.R. Devadhar. Poona: Oriental Book Agency. Edn, 1928-2nd& Rev.

17. Bhāsa. *Svapnavāsavadatta*. Ed. H.B. Bhide. Bhavnagar : The Indian Printing Works, 1916.

18. Bhāsa. *Svapnavāsavadatta*. Ed. S.K. Mitra. Calcutta (Now Kolkata) : The Book Company Ltd. 1936.

19. Bhāsa. *Svapnavāsavadatta.* Ed. T. GaṇapatiSāstri. Trivandrum: Travancore Government Press, 1915, End.-2nd Trivandrum Sanskrit Series No – XV.

20. Bhāsa. *Svapnavāsavadatta.* Ed. V.M. Apte. Ahmedabad: Aditya Press, 1926. English Introduction and with Complete Text.

21. Bhāsa. *Avimāraka.* Ed. T. GaṇapatiSāstrī. Trivandrum: Travancore Government Press, 1912, Trivandrum Sanskrit Series No XX.

22. Bhāsa.*Bālacarita*. Ed. T. GaṇapatiSāstri. Trivandrum: Travancore Government Press, 1912, Trivandrum Sanskrit Series No XXI.

23. Bhāsa. *Pratijñāyougandharāyaṇa*. Ed. Pandit T. GaṇapatiSāstrī: Trivandrum: Sridhara Power Press, 1920, Trivandrum Sanskrit Series, Edn-3rd.

24. Bhāsa.*Pratijñāyougandharāyaṇa*. Ed. T. GaṇapatiSāstrī. Trivandrum: Travancore Government Press, 1912, Trivandrum Sanskrit Series No XVI.

25. Bhāsa's. *Pratimā-Nātaka.* Ed. Satyendranath Sen. Calcutta (Now Kolkata): New Mahamaya Press, July 1943. Vidyodoya Series No – 23.

26. Bhāsa's. *Svapnavāsavadatta.* Ed. Ashokanath Shastri & Sarojendranath Bhavja. Calcutta (Now Kolkata): Modern Book Agency Private Ltd., 1963. Rev. Dilleep Kumar Kavjilal, Edn. 4th.

27. Bhāsa's. *Svapnavāsavadatta.* Ed. Madhabdas Chakravorti. Calcutta (Now Kolkata): Kamala Book Depot Ltd, Date not found.

28. Bhavabhūti. *Mahāvīracharita.* Ed. Jībānandavidyāsāgarabhaṭṭācharya. Kolkata: Gobordhon Pan Press, 1906 Edn-3rd.

29. Bhavabhūti. *Mahāviracharita*. Ed. T.R. RatnamAiyar and S. Rangachariya with Comm. Of Vīrarāghava. Bombey (Now Mumbai) : Nirnaya-Sagar Press, 1926. Forth Edn. Revised by Wāsudev Laxmaṇ Shāstrī Paṇśīkar.

30. Bhavabhūti. *Uttara-Charita.* Ed. Saradaranjan Ray with Sanskrit Comm., English Translation, Critical and Explanatory Notes and Introduction. Kolkata: Name of Publisher not found, Sept. 1924. Seventh revised and enlarged Edn. On 1966 – Kumudranjan Ray.

31. Bhavabhūti. *Uttararāmacharita.* Ed. P.V. Kane with the Commentary and with notes and Introductions. Delhi : Varanasi: MLBD, 1962. (Fourth Revised Edn.).

32. Chattopadhyay, Rita. *Ādhunik Sāṃaskrita Sāhitye Choṭagalpa O Nāṭak 1910-2010*. Kolkata: Prograsiv Publisher April 2012.

33. Daṇdin. *Kāvyadarśa*. Ed. Chinmoyi Chattapadhyay. Kokkata: Pascimbanga Rajya Pustaka Parst, 1994.

34. Jagannātha. *Rasagaṅgādhara*. First Ānana. Ed. Chinmayi Chatterjee with Comm of Marmaprakāśa by Nāgesa Bhaṭṭa as also Bengali and English Translations. Vol. 5 Kolkata-16: The Asiatic Society, 1stEdn 1992.

35. Jagannātha. *Rasagaṅgādhara*. First Ānana. Ed. Sri Madhusudan Shastri with Comm of Marmaprakāśa by NāgeśaBhaṭṭa. Varanasi : Banaras Hindu University, year not found.

36. Kālidāsa. *Abhijñānaśakuntala*. (A Synthetic Study) Ed. Ramendra Mohan Bose. Calcutta (Now Kolkata): Modern Book Agency, 1960. Edn-3rd (Thoroughly Revised).

37. Kālidāsa. *Abhijñānaśakuntala*. Ed. Haridāsaridhantabāgīśa with Comm. Abhijñakaumudī. Kolkata: Devalenākhavtmatha-Siddhānta-Vidyālayāt, 1883. Edn-3rd.

38. Kālidāsa. *Abhijñānaśakuntala*. Ed. Satyanarayana Chakrobarty with Comm Arthodyotanikā of Rāghavbhṭṭa. Kolkata: Sanskrit Pustak Bhandar, 1988.

39. Kālidāsa. *Mālavikāgnimitra* Ed. Bhuvana Chandra Vasaka. Calcutta (Now Kolkata): Sangbaba Jnanaratnakara Press, 1871.

40. Kālidāsa. *Malavikāgnimitra.* Ed. Gurunathavidyanidhi and KalipadaTarkacharya with Vijoyā Comm. Calcatta (Now Kolkata) : Chātra-Pustakalaya, 1341 (Beng).

41. Kālidāsa. *Mālavikāgnimitra.*Ed. M.R. Kale. Delhi : MLBD, Dt. Not found, Rpt. – 1984, Delhi.

42.Kālidāsa. *Mālavikāgnimitra* Ed. Haridāsasiddhāntavagisa with Sandīpanī Comm. Nakipura: Haricharaṇa Catuṣpāthī, 1329 (Beng.) Edn-2nd.

43. Kālidāsa. *Vikramorvaśīya.* Ed. M.R. Kāle with a new Sanskrit Comm and Arthaprakashka, various Readings, Introduction, A literal translation, Exhaustive notes in English and Appendices. Delhi: MLBD. XI EDn 1967. Rpt.-1991.

44. Kālidāsa. *Vikramorvaśīya.* Ed. Shankar Pāndurang Pandit and Bhāskar Rāmchandra Arte with English Notes containing extracts prom two commentaries. Bombay (Now Mumbai) : Government Central Book Depot, 1901. Edn-III. (BSS No XVI).

45. Kālidāsa. *Vikramorvaśīya.* Ed. Sitanath Acharya and Devkumar Das. Kolkata: Sanskrit Pustak Bhandar, Edn-1st 1999.

46. Mammaṭa. *Kāvyaprakāśa.* Ed. Nārāyṇa with comm of Jālkīkara. Delhi: Parimal Publications, (Rpt. 2008).

47. Sāgarnandin. *Nāṭakalakṣaṇaratnakośa*. Ed. Myles Dellon. Oxford University Press: Humphrey Milford, 1937.

48. Śāradātanaya. *Bhāvaprakāsana.* Ed. Madan Mohan Agrawal. Mathura : Radhakrishna General Store, 1978. (1stEdn 1978)

49. Śiṇgabhūpāla. *Rasārñavasudhākara.* Ed. T. Gaṇapatiśāstri. Trivandrum: 1916.

50. Viśvanātha. *Sāhityadarpaṇa*. Ed. Gurunātha Vidyānidhy and Janakinath Kāvyatirtha. Calcutta (Now Kolkata) : Brothers ChhatraPustakalaya, 1927.

51. Viśvanātha. *Sāhityadarpaṇa*. Ed. P.V. Kane. Delhi: MLBD, 1974. (Edn-VI).

52. Viśvanātha. *Sāhityadarpaṇa*. Ed. Yogeśwara dattaŚarmā. Delhi: Nag Publishers, 1999. (Edn-1st 1999).

## **Secondary Source**

1. Bhattacharya, Bisnupada, : Kāuyamimamśā, Jijnasaprakasana, Kolkata, 1982.

2. Chattapadhyay, Rita. *Modern Sanskrit Literature*: *Some Observations*. Kolkata: Sanskrit Pustak Bhandar, 2004. DSA (Sanskrit) Jadavpur University.

3. Chattopadhyay, Jayashri, : Alaṁkārsāhityer Samṛddha Itihāsa, Sanskrit Pustak Bhandar, Kolkata, 2nd Edn, Beng 1413.

4. Chattopadhyay, Siddheswar: Nāṭakalakṣaṇaratnakośa of Sāgarnandin, Sanskrit Pustak Bhandar, Calcutta (Now Kolkata), 2017(Beng 1424).
5. Dasgupta, Surendranath, : Kāvyabicāra, Chirayataprakasana, Kolkata, 1939.
6. Kane, P.V. : History of Sanskrit Poetics, MLBD, Delhi, Rpt. 1987.
7. Misra, Gopalchandra: Sanskrit Farcical Plays And Those Of Śrījībanyāyatīrtha of Bengal, Sanskrit Pustak Bhandar, Calcutta (Now Kolkata), 15th August 1999.
8. Misra, Jagadischandra, : Alaṁkāraśāstrasyetihāsa, Chowkhamba Surobharati Prakasan, Varanasi, 1987.
9. Mootry, C. Lakshinarasimha : Research Trends in Sanskrit, C.B. H. Publication, Trivandrum, 1991.
10. Mukhopadhyay, Ramaranjan, Rasasamīkhā, Sanskrit Pustak Bhandar, Kolkata, Beng 2001.
11. Pāñḍeya, Bhṛgunatha : Rasavimarsa. New Delhi : Published with financial assistance from the Rātriya Sanskrit Saṅsthāna, 1885.
12. Sanskrita Sahityasambhar. Calcutta (Now Kolkata): Navapatra Prakāśana, Vol. XI, Edn-1st 14th September, 1981 Vols.VI, IX, X, XI, XII, XII.
13. Sastri, Ashoknath, Rasa O Vhāba, Sanskrit Pustak Bhandar, Kolkata, Beng 1405.
14. Śukla, Rameschandra : Rasadarśana (Sahityaśāstriyaprabandha). Delhi : DevebaṇīPariśada, 1983.(1stEdn. 1983).
15. Waeder, A.K.: *Indian Kāvya Literature.* Delhi: MLBD, 1972. 2nd Revised Edn. 2009. Vol-I.

## **Reference**

http://epgp.inflibnet.ac.in/ahl.php?csrno=36

# निर्वाचितसंस्कृतनाटकेषु अद्भुतरसविमर्शः

# (NIRVĀCITASAṀSKṚTANĀṬAKEṢU ADBHUTARASAVIMARŚAḤ)

THESIS SUBMITTED FOR THE DEGREE
OF DOCTOR OF PHILOSOPHY IN
SANSKRIT UNDER THE
FACULTY OF ARTS
RABINDRA BHARATI UNIVERSITY

BY
SOMNATH CHATTOPADHYAY

DEPARTMENT OF SANSKRIT
RABINDRA BHARATI UNIVERSITY
KOLKATA, WEST BENGAL

2018

# समीक्षात्मकं मूल्यायनम्

नाट्यशास्त्रानुसारं नाटकस्याङ्गिरसो भवेच्छृङ्गार उत वीरः । तथाहि उक्तमालंकारिकैः विश्वनाथैः – 'एक एव भवेदङ्गी शृङ्गारो वीरो एव वा' इति । अन्ये सर्वे रसा अङ्गत्वेन विवेच्यन्ते नाटके । अत्रेदमुल्लेख्यं यत् करुणरसो नाटके अङ्गी भवति चेदपि तन्न नाट्यशास्त्रसम्मतम् । पुनः,नाटकं काव्यं वा समाजस्य प्रतिफलनम्–'literature is the reflection of the society'उत 'A nation is known by its own theatre.'अर्वाचीनालंकारिकैरुक्तम् –

'साहित्ये जीवनं सर्वं सर्वाङ्गीनं नवं नवम् ।

प्रतिविम्बत्वञ्चायाति समुल्लसति च वर्धते' ॥

अत एव, वास्तवजीवनं सर्वदा सुखकरं भवेदिति न चिन्तनीयम् । अस्मज्जीवने सुख-दुःख-हास-रति-विस्मयादीनां सर्वेषां भावानां सार्थकपरिणतिर्दृश्यते । क्वचित् सुखस्य, क्वचिद्वा दुःखस्य, क्वचिच्च हासस्य, कुत्रचित् विस्मयस्यापि प्रभावेन प्रभावितं भवति अस्मज्जगत्प्रपञ्चम् । परं प्रजापतितुल्येन कविना स्वमनसो माधुरीं संयोज्य तथा च तस्य 'अपूर्ववस्तुनिर्माणक्षमया कारयितृप्रतिभया' तत्सुख-दुःख-विस्मयादयो भावा आनन्दत्वेन पर्यवस्यन्ते । आनन्दमेव तु काव्यस्य मूलीभूतं वस्तु । आनन्दं चेत्काव्यस्य नाटकस्य वा सर्वस्वं भवेत्, तदा कदापि नाटकं वास्तवजीवनस्य प्रतिफलनं न भतितुमर्हेत् । तथाहि आलंकारिकैः शृङ्गार-वीररसौ अतिरिच्य काव्य-नाटकादिषु शान्त-करुण-रौद्र-अद्भुतादिरसप्रयोगस्य संस्थानं विहितम् । तथैव संस्कृतनाट्यतत्त्वेतिहासेऽद्भुतरस्य विशिष्टं स्थानं भजते। भरत-धनञ्जय-विश्वनाथादिभिरालंकारिकैस्तदीयेष्वलंकारग्रन्थेषु रसस्यास्य

गुरुत्वमभ्युपगतम्। तेषामाशयोऽयं यत् 'कार्यं निर्वहणेऽद्भुतम्'। मूलतः निर्वहणसन्धौ अद्भुररसव्यवहारोऽत्यावश्यको निर्देशो नाट्याचार्याणामिति मन्मतम् । अर्थान्नाटकस्यान्ते अद्भुतरसस्यावस्थितिः नाट्यकौशलदृष्ट्या अत्यावश्यकः इति निश्चप्रचम्। परमत्रेदमुल्लेख्यं यदद्यतकालं यावदद्भुतरसमाश्रित्य किमपि नाटकं न विरचितम् । किन्तु प्रायेण सर्वैः काव्यकृद्भिस्तदीयकाव्य-नाटकानां स्थलविशेषेऽद्भुतरस्य बहुविचित्रितः प्रयोगऽकारि ।

एतावत्कालं यावदद्भुतरसमुपजीव्याङ्गुलिमेयानि गवेषणाकर्माण्यभवन् । तानि तावत्-

**1. Adbhutarasa in Classical Sanskrit Dramas (Saraj Arvind Deshpande, Poona University, 1982)**

**2. Adbhutarasa – Prāchina Saṁskṛta Nātakome - Kāvya śāstriya Vivechana (Bhāsa se Joydev tak), (Minu Saxsena, Jaipur University) (In Progress)**

**3. Adbhutarasa – Siddhānta aur Prayoga (Nirupama Sukla, Lucknow University (In Progress)**

किन्तु मम गवेषणाकर्मणि सामूहिकतया प्रायेण सर्वेषां प्राचीनाधुनिकानां नाटकानामद्भुतरसप्रयोगविधिः पर्यालोचिता। अपि च, मया अस्मिन् शोधबन्धे आदावेव संस्कृतालंकारिकैरभ्युपगतमद्भुतरस्य प्राधान्यम्, संस्कृतनाटकेषु रसस्यास्य युक्त्या नाङ्गिरसत्वस्वीकारः, कालिदास-भास-भवभूत्यादिनाट्यकृतामद्भुतरसस्य सार्थकप्रयोगश्चेत्यादिविषयाः युक्त्या निरूपिताः। किञ्च, कालिदास-भास-भवभूत्यादिनाट्यकाराः स्वकारयितृप्रतिभया प्रमाणयन्ति यदद्भुतरसेनापि सार्थकाभिनयोऽपि

भवितुमर्हति । सर्वेषां संस्कृतनाटकानामद्भुतरसव्यवहारान् सूक्ष्मेक्षिकया पर्यालोच्यते चेद्वक्तुमलं यद्भास-भवभूत्योरपेक्षया कालिदासोऽद्भुतरसस्य प्रयोगेऽप्रतिद्वन्द्वीति सत्यम्।

तत्र प्रथमेऽध्यायें मया संस्कृतालंकारिकाणां नये रसालोचनात्परमेवाद्भुतरसलक्षणं स्वरूपञ्च विविधदृक्कोणतो विव्रियते युक्त्या । आलंकारिकाणां मतमनुसृत्य मया भास-कालिदास-भवभूत्यादिमहाकवीनां रूपकेष्वद्भुतरसस्य प्रयोगक्षेत्रं परिशीलितम्। अत्र सागरनन्दिनो नाटकलक्षणरत्नकोषस्यद्भुतरसस्य लक्षणानि वैशिष्ट्यानि च सर्वालंकारग्रन्थेभ्यः सुष्ठुतया उक्तानि । तन्नयानुसारं मयका संस्कृतसाहित्यस्य केषुचिद्रूपकेषु रसस्यास्य व्यवहारो दर्शितः। प्रसङ्गतः, विश्वनाथस्य मतानुसारि अद्भुतरसस्वरूपम् व्याख्यानावसरे विशेषेण युक्तिग्राह्यमिति मनुते । तत्र द्वितीयेऽध्याये महाकवेः कालिदासस्य रूपकत्रितये यत्र यत्राद्भुतरसस्य प्रयोगक्षेत्राणि नयनयोरापतन्ति, तानि च मया युक्त्या व्याख्यातानि । अद्भुतरसस्य प्रयोगविधौ कालिदासः पूर्वाचार्यान् भासान् तथा चोत्तरवर्तिनो नाट्यकारानतिशेते । अत्रैव कालिदासस्य महत्त्वम् । कविकुलगुरुः कालिदासो न केवलमुपमाद्यलंकारप्रयोगे सुतरामेव निष्णातश्चापि विविधरसप्रयोगे तत्र विशेषेण शृङ्गार-वीरयोर्व्यवहारे यथा धुरी तथैवाद्भुतरसप्रयोगविधौ । कालिदासस्य नाटकेषु ‘अभिज्ञानशकुन्तल’मिति रूपके तस्याद्भुतरसप्रयोगनैपुण्यं सर्वापेक्षया सहृदयहृदयमनोरञ्जकमिति मामकी मतिः।

तृतीये अध्याये भास-भवभूत्योः निर्वाचितेषु रूपकेष्वद्भुतरसस्य व्यवहारो मया दर्शितः। भासस्य ‘स्वप्नवासवदत्त’मिति रूपके, ‘अभिषेके’, ‘ऊरुभङ्ग’मिति रूपकद्वितये चाद्भुतरसस्य प्रयोगक्षेत्राणि दरीदृश्यन्ते । वस्तुतः, संस्कृतरूपकेष्वद्भुतरसस्य क्षेत्राणि सत्यमेव दुर्लभ्यानीति दृश्यन्ते कालिदास-भास-भवभूत्यादिनाट्यकृतान् विहाय । तथापि

भासाद्भवभूतेर्नाटकेष्वद्भुतरसः प्राप्यते । यद्यपि करुणरसप्रयोगे भवभूतिः सर्वान् पूर्वोत्तराचार्यान् अतिशेते, तथापि अद्भुतरसव्यवहारे ध्रुवमेव स स्वककारयितृप्रतिभया परिचयः प्रादात् । विशेषेणोत्तररामचरितस्य केषुचित् क्षेत्रेष्वद्भुतरसस्य व्यवहारे भवभूतिर्मन्ये सूक्ष्मातिसूक्ष्मगवेषणाञ्चकार। महावीरचरितेऽपि क्षेत्रपञ्चकं विद्यमानं, यत्राद्भुतरसः सहृदयानां मनो मोदते । चतुर्थेऽध्यायेऽर्वाचीनसंस्कृतरूपकानि निर्मथ्य केषुचिद्रूपकेषु नाम प्रहसनेषु वङ्गप्रदेशस्याद्भुतरसस्य स्वल्पानि नामाङ्गुलिमेयान्युदाहरणानि परिप्राप्यन्ते । साम्प्रतं रचितेषु रूपकेषु श्रीजीवन्यायतीर्थेषु प्रहसनाख्यरूपकेषु नाम 'क्षुतक्षेमीयम्', 'शतवार्षिकम्', 'चण्डताण्डव'मिति अद्भुतरसव्यवहारो नयनयोरापतति । ततःपरं सिद्धेश्वरचट्टोपाध्यायस्य 'अथ किम्' तथा च 'धरित्रीपतिनिर्वाचन'मिति व्यङ्गविधयोः रूपकयोरद्भुतरसस्य द्वित्राः क्षेत्राण्युपलभ्यन्ते । किन्तु उल्लेख्यं यदर्वाचीनरूपकेषु प्रायो न लक्ष्यतेऽ द्भुतरसप्रयोगस्तत्र वास्तवोचितविषयमूलकत्वात्। परं वङ्गप्रदेशाद्बहिः रचितेषु रूपकेषु मन्ये अधिकतया अद्भुतरसस्य व्यवहारयुक्तानि क्षेत्राणि ग्रन्थकृद्भिः संनिविश्यन्ते । आधुनिकरूपकेषु कलाकैवल्यवादापेक्षया वास्तववादस्य व्यवहारोऽधिकतया अलक्षि । तस्मात् कविभिर्नाट्यकृद्भिः शृङ्गार-वीर-करुण-अद्भुतरसानां व्यवहारात् वास्तवजीवनसम्पृक्तानि रसोचितवृत्तानि अधिकतया काव्येषु नाटकेषु च विरच्यन्ते ।

परिशेषे वक्तव्यं यन्नाटकस्य रसप्रयोगे कवि-सहृदययोर्मध्ये गभीरसम्बन्धो वर्तते। तत्र रसप्रयोगोपलब्ध्योर्मध्ये रसप्रयोगः कविगतः, परमुपलब्धिः सहृदयनिष्ठेति । कविना तदीयेषु काव्येषु नैके रसाः प्रयुक्ताः, परं सहृदयो यदि तद्रसान् सम्यक्तयास्वादयितुं उपलब्धुञ्चालं, तर्हि कवेर्नाट्यकृतो वा प्रयासोऽयं सार्थको भवेदिति । अन्ततो गत्वा मम राद्धान्तोऽयमेव यत्

प्राचीननाट्यकृद्भिः शृङ्गार-वीर-करुणरसानां व्यवहारे प्रयोगे वा यावान् दक्षो न तथा अद्भुतरसस्य।

कालिदास-भास-भवभूतिभिः प्रयुक्तान्यद्भुतरसक्षेत्राणि वक्तव्यस्य चित्रायमानतां सम्पाद्य काव्ये विद्यमानानां श्लोकादीनां सहृदयहृदयग्राहितां यथा वर्धयन्ति तथा समग्रस्य काव्यस्य स्वरूपसौन्दर्य्यमपि प्रकटीकुर्वन्ति। एतदेव कवीनां प्रतिभाया निरवद्यमवदानम् । अन्तिमे मम सिद्धान्तोऽयं यत् अस्मिन् गवेषणाप्रबन्धे उल्लिखितनाट्यकारेषु कालिदासकृतिषु अद्भुतरसप्रयोगस्य यादृशी स्वच्छता सावलीलता च परिप्राप्यते, तादृशी स्वच्छता सावलीलता च भासवत् प्राचीनानां तथा च भवभूति-श्रीजीव-सिद्धेश्वरप्रमुखानाम् उत्तरकालिकानां काव्येषु नोपलभ्येते इति विस्तरेणालम् ।।

*************************************************************